M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref, / Ser, 789

Title : Jāgadīś

789

दीधीति ~~मणि:~~ टीका (by जगदीश)

Deedhiti- ~~Mani~~ ṭīkā	Title
Jagadisha	Author
	Editor
	Year, Vols.
	Publisher
789 Slightly moth-eaten	Remarks

आ.ग.अ.
१

॥श्रीगणेशाय नमः॥ ॥श्रीललितायै नमः॥ ॥सस्मिताननसरोजमङ्गणे रिङ्गमाणमतिलोलकुन्तलं॥ रोचनोल्लसितभाल
मस्तु मे केशवं मनसि शैशवं वपुः॥१॥ प्राचीनैरनुचितः विविधः श्लोकैः कृतुषी हतोप्यधुना॥२॥ धितिमुणिरेष श्रीजगदीशप्र
काशेन स्फुरतु॥३॥ ॐ नम इति परमात्मने॥ सर्वोत्कृष्टात्मने नमः॥ प्रकर्षश्चात्र उत्पत्तिस्थित्यादिकर्तृत्वं॥ तस्यैव कर्तृसंभवेन
सहस हकार्यतरं विनेत्यत उक्तं॥ ॐ मिति॥ ब्रह्मविष्णुशिवात्मकायेत्यर्थः॥ तथा च तत्र शरीरसहकारादेकस्यापि नानाकार्यक
र्तृत्वं नानुपपन्नमिति भावः॥ यद्यपि सुखादिसमवायिकारणतावच्छेदकत्वेन दृश्यमानस्य प्रतिविषयविधया कारणतावच्छेदक
त्वेन वा सिद्धया आत्मत्वजातेरीश्वरवृत्तित्वादात्मन इत्यसंगतं॥ नित्यत्वेत्यादिव्याप्तेरप्रयोजकत्वेन तादृशजातेरीश्वरवृत्तित्वो
पगे तु गगनादावपि तज्जातिप्रसंगात् द्रव्यत्वमेव वा सुखादिसमवायिकारणतावच्छेदकं भवेदिति प्रसंगस्य तुल्यत्वात्॥ अतएव
वज्राघवेनात्मत्वजातेरेवात्मपदप्रवृत्तिनिमित्ततया आत्मपदगर्भश्रुतिरेव तत्रात्मत्वजातिसत्त्वे प्रमाणमित्युक्तावपि न नि
स्तारः॥ ज्ञानत्वावच्छेदकतया जातिसिद्धेरपसिद्धांतत्वात् तथापि अत्रात्मपदं रूपावरर्पकमित्याहुः॥ नमस्यता प्रयोजकं रूपां
तरमप्याह॥ सर्वेति॥ सर्वभूतानि॥ सर्वप्राणिनः॥ विश्वस्य स्वकर्मणि नियोज्यपरिति इत्यर्थः॥ केचित्तु॥ भूतपदं यथाश्रुता रामः १
र्थकमेव विभोरपि संयोगविशेषः॥ न च विभुद्वयसंयोगास्वीकारादाकाशेन समं तदसंभवादसंगतिः॥ नव्यमते तु गगनस्य
ईश्वरानतिरिक्तत्वात्॥ अत्र च स्वप्रतियोगिकसंयोगविरहेपि स्ववृत्तिसंयोगानपायादित्याहुः॥ वस्तुतः आकाशानतिरिक्तत्वम
स्मानानां मते आत्मा वृत्तिविशेषगुणवत्त्वमेव भूतत्वं तथा चाकाशस्यात्मानतिरेकात् भूतत्वं पृथिव्यादिचतुष्टयमात्रवृत्तीति नो

क्तदोष इति ध्येयं॥ केचित्तु विष्टंभ आरंभकसंयोगः भूतपदं जन्यभूतपदं जनकत्वं द्वितीयार्थः॥ तथा च जन्यसर्वभूतजनकसं
योगानुकूलकृतिसमानाधिकरणतादृशसंयोगात्तरस्यैव परिश्रयतावत इत्यर्थ इति प्राहुः॥ अखंडो नित्यो ज्ञानं दृग्बोधो यस्य
तस्मै॥ न च सुखत्वावच्छेदेन पुण्यजन्यतया नित्यसुखासंभवः॥ श्रुतिवाक्यो नित्यसुखसिद्धौ सुखत्वावांतरजातेरेव पुण्यजन्य
यो तावच्छेदकत्वकल्पनात्॥ ज्ञानं दृग्रूपस्तु गादिरूपा यबोधो यस्य तादृशो अखंडो यो अखंडो नित्यस्तस्यै इति वार्थः॥ अखंडो दुःखा
नवच्छिन्नज्ञानं दो यस्मादेतादृशो बोधो यस्य तस्मै षष्ठ्यर्थस्तु विषयतेत्यपि कश्चित्॥ पूर्णायेति॥ स्वनिष्ठसुखदुःखाभाववतो वैरेष्वा
वच्छिन्नायेति॥ इदानीं ग्रंथस्य निगूढार्थकत्वं दर्शयति॥ परजुष्टेति॥ तदानीमात्मनो निगूढतत्त्वं व्यंजनया प्रतिपादयति॥ न्याय्यमिति॥
इदानीं विनयपुरस्सरं ग्रंथस्य निर्दोषत्वं व्यंजनया प्रतिपादयति॥ मान्या इति॥ निपुणं विभाव्येति॥ वस्तुतः निपुणं विभावने
स्वयमेव दोषाः प्रयास्यंतीति भावः॥ संगतिप्रदर्शनप्रतिज्ञयोरर्थांतरत्वं निरानिरि किर्षुस्तयोः प्रकृतोपयोगितां प्रदर्शयति॥ पू
र्वेत्यादिना॥ अत्र च संगतिप्रदर्शनस्य फलमेकवाक्यताप्रतिपत्तिः प्रतिज्ञायास्तु फलं शिष्यावधानं तत्र चोत्तरग्रंथप्रवृत्त्यनुकूल
व्यापारवत्त्वरूपं तत्प्रवृत्त्यनुकूलवर्त्तमानकृतिसाध्यताज्ञानादिपर्यवसितं॥ शक्तिश्चोत्तरग्रंथे पूर्वग्रंथार्थसंगतार्थकत्वहेतुना
पूर्वग्रंथेन सह हेकप्रयोजनहेतुप्रतिपत्तिकत्वरूपस्य पूर्वग्रंथैकवाक्यत्वस्यानुमानं तच्चोत्तरग्रंथे तानस्येष्टसाधनत्वधीपर्यव
सन्नमतः प्रस्तुतप्रवृत्त्युपयोगितया संगतिप्रदर्शनस्य नार्थांतरत्वं॥ एवं प्रतिज्ञापि पुनरनुमाननिरूपणे ज्वदा व्याप्या वर्त्त
मानकृतेः साध्यत्वं बोधयंती उत्तरग्रंथे प्रवृत्त्युपयोगिनो वर्त्तमानकृतिसाध्यताज्ञानस्य प्रयोजकेति भावः॥ वक्ष्यते॥ अत्र च व्या

जाग॰ ख्येयग्रंथस्य स्वरसंवलितस्यैव धारणं संप्रदायसिद्धमतः प्रत्यक्षेत्यपहाय प्रत्यक्षवित्युत्क्रमिति तु भ्रमः दीधितिकृतैव व्या
२ प्त्यनंतरमिति प्रत्यक्षतायां पस्य व्याप्तिप्रकारेण धृतत्वात् तादृशनियमस्य संप्रदायासिद्धत्वात् ॥ परं तु न नियमः क्वचिदेवं क्व
चिदन्यथापि धारणमिति ध्येयं ॥ वस्तुतः प्रत्यक्षानंतरमित्यस्य धारणं भ्रमव्युदासार्थं तथोक्तं अनुमाननिरूपणस्यैव प्रतिज्ञेय
त्वेऽनुमितेरप्रतिज्ञातायाः अग्रे निरूपणमर्थांतरग्रस्तं स्यात् इतोऽनुमितेरनुमानस्य च द्वयोरेव निरूपणस्य प्रतिज्ञेयतामावे
दयितुमाह ॥ अत्र चेति ॥ अत्र प्रत्यक्षोपजीवकत्वादित्यादिग्रंथेन समभ्यर्थः प्रतिपाद्यत्वं फलतः ॥ फलयोः साक्षात्कारानुमित्योः स्वरू
पतः प्रत्यक्षप्रमाणानुमानप्रमाणस्वरूपयोः उपजीव्योपजीवकभावः प्रत्यक्षोपजीवकत्वादित्यादिग्रंथप्रतिपाद्य इत्यर्थः ॥ तथा
च मूले प्रत्यक्षपदस्य प्रत्यक्षप्रमितितत्करणोभयपरतया अनुमानपदस्य च भावपदस्य व्युत्पत्तिभ्यामनुमितितत्करणोभयपर
तया अनुमितेस्तत्करणस्य च द्वयोरेव निरूपणस्य प्रतिज्ञातत्वादनुमितिनिरूपणे अर्थांतरत्वमिति भावः ॥ केचित्तु ॥ आचार्यमतेनि
त्यस्य ज्ञानादेरपि अनुमानत्वात् वक्ष्यमाणस्यानुमानतावच्छेदेन प्रत्यक्षोपजीवकत्वस्य संगतित्वलाभायोक्तं फलत इति ॥ फलदार
क इत्यर्थः ॥ तथा च प्रत्यक्षफलोपजीवकत्वमेव संगतिः ॥ तथा च स्वाश्रयकरणत्वपरंपरासंबंधेन अनुमानगतत्वं साक्षात्संबं राम॰ १
धेन प्रत्यक्षोपजीवकत्वस्य संगतित्वलाभार्थं लिंगस्यानकारणतावादिनो मणिकारस्य मतमादायोक्तं स्वरूपत इत्याहुस्तत् २
न्न ॥ लिंगस्यानित्यत्वेऽप्यनुमितीत्यादिग्रंथविरोधात् ॥ ननूपजीवकत्वं न संगतिरनंतराभिधानव्याप्यस्यैव संगतित्वात् ॥ अनु
मित्युपजीवकस्य तत्साक्षात्कारस्यानुमित्यनंतरमनिरूप्यतया यस्य प्रमाणफलस्योपजीवकं यत्प्रमाणफलं तत्तन्निरूपण

नंतरं निरूप्यमिति व्याप्तिविरहादत आह प्रत्यक्षफलस्येत्यादि ॥ ननु विषयतानवच्छिन्नोपजीवकत्वं तथा वाच्यं तथा चोक्तस्य जे
अनुमितिविषयविधयैव उपजीवकत्वं तत्राह ज्ञानादिति ॥ अनुमित्यनुव्यवसायादेरित्यादि ग्रहेणानुमित्युपनीतधर्मप्रकार
कप्रत्यक्षसंग्रहः ॥ न स वेति ॥ अयं घट इत्यादिप्रत्यक्षस्यैव नानुमित्यनुपजीवकत्वादिति ॥ तथा चोपजीवकत्वमात्रस्यानंतराभि
धानव्याप्यत्वाभावेपि प्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टमुपजीवकत्वं तादृशाभिधानव्याप्यमेवेति स्यादेवोपजी
वकत्वं संगतिरिति भावः ॥ ननु प्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टं साक्षात्कारोपजीवकत्वं अनुमितावप्रसिद्धं ज्ञा
नादिपरामर्शादप्यनुमित्युत्पत्त्या अनुमितित्वावच्छेदेन साक्षात्कारोपजीवकत्वाभावात् तत्कुतोऽस्य संगतित्वमत आह ॥ अनुमि
तपर्यवसितिः ॥ साक्षादिति ॥ तथा चोपजीवकत्वं प्रयोज्यतामात्रं न तु जन्यत्वमसिद्धत्वघटितमपीति भावः ॥ नन्वेवमुक्तस्यैवोपजी
वकताविशेषस्यैवानंतराभिधानव्याप्यत्वे प्रत्यक्षोपजीवकत्वादित्युपजीवकत्वमात्रस्य व्याप्यताप्रत्यायकमूलग्रंथो विरुद्ध
इत्यत आह ॥ पुरस्कृत इति ॥ अयं प्रमाणविभाजकोपाधिव्यापकत्वरूपोत्कर्षो ग्रंथकृतापि तात्पर्यविषयीकृतः ॥ सामान्यशब्द
स्य लक्षणया विशेषबोधकत्वादिति भावः ॥ ननु परंपरोपजीवकत्वस्यापि संगतित्वे प्रमाणफलविभाजकोपाध्यवच्छिन्नोपजीव
कत्वमपि न तादृशाभिधानव्याप्यं प्रत्यक्षप्रमितावनुमितेस्तादृशोपजीवकत्वसत्त्वेप्यनुमित्युत्तरं तदनिरूपणात् तत्कुतोऽस्य सं
गतित्वमित्याशंकते ॥ यद्यपीति ॥ दृष्टजननीमिति ॥ तत्प्रयोजिकामित्यर्थः ॥ समयः ॥ शक्तिः मत्कर्तव्यताहीत्यादिपदादि
ष्टसाधनताद्यैः परिग्रहः ॥ अयं भावः कार्यमात्रं प्रत्यदृष्टस्य हेतुतया साक्षात्कारं प्रत्यपि धर्मादिकं हेतुः तत्र स्वकारणीभूतं

ज्ञा.ग. यागादिकं यागादिविषयगोचरवृत्तिं यागादिमत्वविशिष्टयागादिगतेष्टसाधनत्वधियं तादृशधीभावे हि विनानुपपद्यमाना वे
३ दस्थपदानां शक्तिग्रहमपेक्षते । इदं पदमत्र शक्तमस्मात् इत्येतरे वृद्धेऽत्र प्रयुज्यमानत्वादित्याद्यनुमितिरूपशक्तिग्रहं
विना वेदवाक्यार्थावगमासंभवात् ॥ एवं प्रवृत्तिजनिकाया गोमत्त्वनिमाध्य इत्यादिधीरपि आनुमानिकी मतभावेन विधेः
शक्त्यभावात् । इदं तु चिन्त्यते । यत्र शक्त्यादिघटकप्रत्येकपदार्थोपस्थित्या मनसैव शक्तेर्मत्कर्त्तव्यत्वादेर्वा ग्रहात्प्रवृत्तिः तत्र
त्वादृष्टजन्यप्रत्यक्षव्यक्तेरेवानुमित्यनुपजीवकत्वात्स्वकत्वमेवेत्याद्युक्तमिति ॥ किंच यत्र दृतभावेन सामान्यव्याप्तौ व्यभिचा
रेपि अनुमितिमिष्टप्रत्यक्षोपजीवकत्वस्य तादृप्येण प्रत्यक्षानन्तरमभिधानव्याप्यतादेव तत्रसंगतिलक्षणसंभवात् साक्षात्कारा
दावनुमित्युपजीवकत्वहेतोर्व्यभिचारप्रदर्शनानौचित्यादिति दिक् ॥ ननु प्रत्यक्षफलमात्रस्यानुमित्युपजीवकत्वेपि तज्जन्यत्वम
नुमित्युपजीवकत्वं न प्रमाणफलविभाजकधर्मव्यापकं प्रमाणफलविभाजकस्य साक्षात्कारत्वस्यानित्यज्ञानेपि सत्त्वादत
आह ॥ ईश्वरेति ॥ तथा च जन्यसाक्षात्कारत्वं प्रमाणफलविभाजकं न तु साक्षात्कारत्वमात्रं नित्येऽपि प्रसक्तत्वात् तद्व्याप
कत्वविशिष्टमनुमित्युपजीवकत्वं चानुमित्यनन्तराभिधानव्याप्यमिति व्यभिचारस्तदवस्थ एवेति भावः ॥ दृष्टेति ॥ दृष्टद्वारकत्वं रामः
तन्मात्रद्वारकत्वं अदृष्टद्वारकत्वपर्यवसितं । तेनादृष्टद्वारकस्यापि प्रवृत्त्यादिरूपदृष्टद्वारकतया नोक्तदोषः ॥ तथा च प्रमा ३
णफलविभाजकोपाध्यवच्छिन्नमुपजीवकत्वं ॥ इतरस्याउक्तधर्मानवच्छिन्नोपजीवकतामात्रस्याज्ञवनिगम्यत्वात् । अनंतराभि
नरूपं यत्साध्यं तदत्वव वर्त्तते न तु तदभाववतीति विनिगमनायाअविषयत्वात् व्यभिचारित्वादिति यावत् ॥ प्रमाणं यस्यो

पजीवकं तन्न तदनन्तरं निरूप्यमिति व्याप्तेरनुमानोत्तरानिरूपिते प्रत्यक्षप्रमाणे व्यभिचारात् तत्त्वरूपतउपजीवतापि प्रमाकरणतावच्छे
दकोपाध्यवच्छिन्नैव ग्राह्या इत्याशयेनाह । सर्वमिति ॥ व्याप्तिबुद्धीनामेवानुमानतानासांच सर्वासामेव मनःस्वरूपप्रत्यक्षे प्रमाणे
धीनत्वादिति भावः ॥ अपानुमितिप्रमाकरणतावच्छेदकं व्याप्तिज्ञानत्वं नदवच्छिन्नं न प्रत्यक्षप्रमाणोपजीवकत्वं व्याप्तिज्ञानत्वस्ये
श्वरबुद्धावपि इत्येरिति प्रकृतासिद्धिरत आह ॥ अनुमितिमित्यादि ॥ भावयतो जनयत ॥ तत्कारणेनेति ॥ अनुमितिकरणतया नि
र्वाहिकाघटिकाया प्रत्यासत्तिः संबंधो जन्यत्वे वैशिष्ट्यरूपस्तद्विरहेणाअनतत्वात् अनुमित्यकरणत्वात् इत्यर्थः ॥ व्याप्तिज्ञानत्वं नानु
मितिकरणतावच्छेदकं तथा सति तद्वतो नित्यज्ञानस्य स्वरूपयोग्यतया ततोऽनुमित्यात्मकफलावश्यंभावापत्तेः ॥ किंतु जन्यत्ववि
शिष्टं व्याप्तिज्ञानत्वं तदवच्छिन्नं च भवत्येव प्रत्यक्षप्रमाणोपजीवकत्वं अतो नासिद्धिरिति भावः ॥ अनुमानत्वावच्छेदेन प्रत्यक्षोपजीव
कत्वं संपाद्य प्रत्यक्षत्वावच्छेदेनानुमानोपजीवतस्य व्यतिरेकमाह ॥ सर्वं पुनरिति ॥ ननु व्याप्तिज्ञानत्वमेवानुमितिकरणतावच्छेदकं
नित्यस्य स्वरूपयोग्यत्वेत्यादि व्याप्तेरप्रयोजकत्वात् प्रयोजकत्वे वा समवायिकारणस्यज्ञौपत्वात्तन्नैव ग्राह्ये तादृशव्याप्तेः स
र्वैर्वोभावितत्वात् । तथा च हेत्वसिद्धिरित्यत आह ॥ दृष्टद्वारेति ॥ दृष्टमात्रद्वारेत्यर्थः ॥ तथा चादृष्टमद्वारीकृत्य यत्प्रमाणं यदुपजी
वकं तत् तदनन्तरं निरूप्यमित्येव व्याप्तिः न तु प्रमाणतावच्छेदकोपाध्यवच्छिन्नमपि निवेश्यमिति भावः ॥ निरुक्तमनुमानोप
जीवकत्वं न प्रत्यक्षेऽस्ति यतो व्यभिचारः स्यादित्याह ॥ न चेति ॥ अपिना नित्येन्द्रियं संतु नरानां नानुमानमपेक्षत इति सूचितं ॥ अपअदृ
ष्टमद्वारीकृत्य यत्प्रमाणं यदुपजीवकं तत्तदनन्तरं निरूप्यमित्यपि न व्याप्तिः । यत्र चक्षुर्घर्षणे सविशेषपानादापूर्वं चक्षुर्न्नष्टानं

न्या० तरं चक्षुरंतरोत्पादः तत्रादृष्टद्वारकस्य पर्षणेरसपानादिप्रयोजकत्वे इष्टसाधनताद्यनुमानस्योपजीवके अनुमानानंत
५ रं निरूपिते रंडचक्षुषि रसपानाधीनप्रकृष्टचक्षुषि च व्यभिचारात् न चात्रोपजीवकत्वं जन्यत्वरूपमेव घटकं उक्तस्य सेतु
चक्षुषोऽनुमानप्रयोजनत्वमेवेत्यदोषः तथा सति अदृष्टद्वारकविशेषणे वैयर्थ्यापत्तेरित्याशयेन शंकते अथेति ॥ उपजीव
कमिति ॥ अदृष्टमद्वारीकृत्येत्यादिः एवं कार्यमित्यत्रापि क्वचिदिति यत्रोक्तप्रमाणाच्चक्षुरंतरोत्पादः तत्रेत्यं कार्यमित्यर्थः ॥
प्रत्येरनंतराभिधानव्याप्यस्यैव संगतित्वमिष्टमतस्तन्मतमनुसृत्यैव प्राक् प्रपंचितं वस्तुतस्तादृशनियमाभावेपि नस्य
तिः प्रत्यक्षोपजीवकत्वादित्यत्र पंचमी हेतुतायां किंतु ज्ञानजन्यजिज्ञासाप्रयोज्यतायां सुखादौ त्रिवर्त्तत इत्यादौ तथा व्युत्पत्तेरि
त्याशयेन परिहरति ॥ किं चात इति ॥ अनंतराभिधानव्याप्यस्यैव संगतिपदार्थत्वे तद्दोषतादवस्थ्यं मतोऽन्यथैव संगतिपदा
र्थं विविनक्ति अनंतरेति ॥ तदभिधानानंतरं तदभिधानप्रयोजिकाया जिज्ञासा तज्जनकज्ञानविषयो योऽर्थः स तस्य तत्र संग
तिरित्यर्थः अत्र च प्रत्यक्षं कस्य चित्कारणमिति ज्ञानोत्तरं प्रत्यक्षकार्यत्वेन सामान्यतः प्रत्यक्षकार्यज्ञानं ततः सामान्यधर्म
प्रकारेण ज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकतया विशेषतः प्रत्यक्षकार्यज्ञानं भवति [illegible] किमस्य का रामः
र्यमित्याकारा ततश्च विशेषतः प्रत्यक्षकार्यज्ञानस्य इष्टस्य साधनतयाऽनुमानादिरूपप्रत्यक्षकार्यबोधकानां वाक्यानां ज्ञा ५
नानंतरं ज्ञातत इष्टस्य तादृशवाक्यस्य साधनताज्ञानात् कंगभिघाते ज्ञात इष्टस्य कंगभिघातस्य साधनताज्ञानात् कंग
क्रियायामिव ततः कंगक्रियायां गुरोः प्रवृत्तिः ततस्तु कंगक्रियानंतरमभिघातादिक्रमेण प्रत्यक्षकार्यात्मकानुमानबोधकवा

क्यानंतराभिधानरूपस्य निष्पत्तिरिति प्रत्यक्षानंतरमनुमानाभिधानस्य परंपरया प्रयोजिकायाः किं प्रत्यक्षकार्यमित्या
कारकजिज्ञासायाः जनकं यत्प्रत्यक्षकार्यज्ञानं इष्टसाधनमित्याकारकं ज्ञानं तत्स्य विषयः प्रत्यक्षकार्यत्वमिति तत्र लक्षणस्य
मन्वयः जिज्ञासाजनकज्ञानविषयत्वमात्रस्य तादृशत्वे अतिप्रसक्तत्वेन प्रयोजकांतं जिज्ञासाविशेषणं प्रत्यक्षानंतरमनुमाना
भिधानप्रयोजिका प्रत्यक्षकार्याभिधाने इच्छापि इति तज्जनकज्ञानस्य विषये प्रत्यक्षकार्याभिधानादावतिव्याप्तिरतो जिज्ञासानु
सरणं प्रत्यक्षकार्यज्ञानस्य यत्फलं सुखादि तज्जोत्तरज्ञानस्यापि तादृशजिज्ञासाप्रयोजकत्वात् तद्विषये सुखादावतिव्याप्ति
रतस्तादृशजिज्ञासायाः प्रयोजकत्वमुपेक्ष्य जनकत्वमुक्तं ॥ फलेच्छायै वा न्यथासिद्धस्य फलज्ञानस्योपायेच्छां प्रत्यहेतुत्वात् ता·
दृशजिज्ञासाजनिकायाः फलेच्छाया विषये फलादौ तथाप्यतिप्रसंगः अतो ज्ञानपदं यत्र क्रमेण दंडचक्रयोर्निरूपणोत्तरं दं
डस्य किं कार्यमिति जिज्ञासया घटो निरूपितस्तत्र दंडकार्यत्वमपि घटे चक्रस्य संगतिः स्यात्तस्य चक्राभिधानानंतरं घटाभिधा
नप्रयोजकजिज्ञासाजनकज्ञानविषयत्वादत उक्तं मर्थ इति ॥ तज्ज्ञानजन्यतद्विशेष्यकयथार्थस्मृतिप्रकारकतापन्न इतित
र्थः तथा चोक्तस्थले दंडज्ञानेनैव दंडकार्यत्वप्रकारेण घटः स्मारितो न तु चक्रज्ञानेनेति नातिव्याप्तिः एवं यत्र चक्रज्ञानोत्तर
मेव दंडकार्यत्वप्रकारेण घटं स्मृत्वा तस्य निरूपणं तत्र दंडकार्यत्वमपि घटे चक्रस्य प्रसंगरूपा संगतिर्भवत्येव न च यथार्थ
पदवैयर्थ्यं यत्र दंडकार्यं किमिति जिज्ञासया भ्रमवशेन दंडोत्तरं गगनादिकं निरूपितं तत्र गगनादौ दंडकार्यत्वस्य संगतित्वाप
त्तेः न चैवं यत्र प्रथमत एव घटबोधेच्छया घटस्य निरूपणं तत्र कस्यापि संगतिर्घटे न स्यादिति वाच्यं ॥ इष्टत्वात् तदनंतरनिरू

ख्यातस्यैवतत्त्वंगृहीतत्वनियमेननिरूपणमात्रस्यसंगत्यनियतत्वात्।यद्यपिचैवमपिप्रत्यक्षकार्यज्ञानंइष्टसाधनमित्येवंबोध
स्यैवप्रत्यक्षकार्यंकिमितिजिज्ञासायाःकारणत्वात्तद्विषयेणज्ञानेनज्ञानतादात्म्येष्टसाधनतादौवातिव्याप्तिः।तथापिपदधर्मविशिष्ट
विषयकज्ञानधर्मिकेष्टसाधनताज्ञानत्वेनतदनंतरंतदभिधानप्रयोजकजिज्ञासांप्रतिजनकत्वंतादृशबोधधर्मस्यतत्रसंगति
रितिविवक्षितं।अत्रचतदनंतरंतदभिधानंप्रतियद्रूपेणजिज्ञासायाःप्रयोजकत्वंतद्रूपावच्छिन्नकार्यताप्रतियोगिकमेवतादृश
जिज्ञासाजनकत्वंवक्तव्यं।तेनयत्रकोघटःकिंचद्रव्यमितिसमूहालंबनजिज्ञासयानीलोघटइत्येवाभिधानंतत्रनद्रव्यत्वेऽति
प्रसक्तिः।नीलोघटइत्येवाभिधानंप्रतिकोघटइतिजिज्ञासात्वेनैवप्रयोजकतयातदवच्छिन्नंप्रतिद्रव्यत्वविशिष्टविषयकज्ञानध
र्मिकेष्टसाधनताज्ञानत्वेनाहेतुत्वात्।नचपदधर्मविशिष्टविषयकज्ञानेष्टत्वेनजिज्ञासायाःअनंतराभिधानप्रयोजकत्वंनतत्त्व
मित्येवसम्यक्जनकज्ञानविषयतादिनिवेशोव्यर्थइतिवाच्यं।तस्यजनकज्ञानत्वेपियथासन्निवेशोवैयर्थ्यविरहात्।अतए
वतदनंतराभिधेयवृत्तित्वेसतितज्ज्ञानजन्यस्मृतिप्रकारतापन्नत्वमित्येवमस्यापीत्यपिसमाहितं।नव्यास्तु।अनंतराभिधानेत
दःस्वार्थधीद्वाराअनंतराभिधानस्यप्रयोजिकानिवर्त्यायाजिज्ञासाप्रत्यक्षकार्यंकिमित्याकारकतस्याजनकंविषयविधया
जनकतावच्छेदकंयज्ज्ञानंतस्यविषयोविषयतावच्छेदकःप्रत्यक्षकार्यत्वमित्यर्थइतिवदंति॥यत्तु॥कार्यतावच्छेदकत्वंसंगतित्व
मिति।तन्न।तदनंतरमनुरूपितेपितत्कार्यतादेःसंगतित्वापत्तेः।किंचप्रमेयनिरूपणानंतरंप्रमेयवत्किमितिजिज्ञासायांयत्रप्रमे
यवान्निरूपितस्तत्रप्रमेयस्वरूपायांप्रसंगसंगततावत्याप्तेःप्रमेयभेदाप्रसिध्यातदन्यतमत्वस्यदुर्वचत्वादितिध्येयं।संग

तिःषड्विधा।तदुक्तमभियुक्तैः।सप्रसंगउपोद्घातहेतुतावसरस्तथा।निर्वाहकैककार्यत्वेषोढासंगतिरिष्यते।इति।तत्रनिर्दि
ष्टोपपादकत्वमुपोद्घातत्वं।चिंतांप्रकृतसिद्ध्यर्थामुपोद्घातंविदुर्बुधाइतिप्राचीनगाथायामपिचिंतापदंकृदभिहितोभावइति
न्यायेनचिंतनीयपरं।तथाचतस्याअपिप्रकृतसिध्युपपादकतया।चिंतनीयत्वंप्रकृतसिध्युपपादकत्वपर्यवसन्नमेवा
र्थः।हेतुत्वंकारणत्वं।अवसरो।अनंतरवक्तव्यत्वं।अनंतरोद्दिष्टत्वंतथेतितुन्यायभास्कारकृतः।निर्वाहकंकारणतानिर्वा
हकंकार्यत्वमितियावत्।एककार्यत्वंएककार्येपयोरितिव्युत्पत्त्याएककार्यकारित्वं।प्रसंगत्वंतुसंगतित्वेसत्युपोद्घातादिभि
न्नत्वंस्मृतस्यउपेक्षानर्हत्वंप्रसंगइतिप्रवादेपिस्मृतत्वमनंतराभिधानप्रयोजकजिज्ञासाजनकस्मृतिविषयत्वंउपेक्षानह
त्वंचप्रसंगलक्षणेउपेक्षाहार्येउपोद्घातादयस्तदन्यत्वंतेनततोपिप्रागुक्तस्यैवस्वार्थस्यलाभइतिसंक्षेपः।कारणत्वस्यकार्यत्व
स्यचेति।यथार्थःप्रकारित्वं।तथाचकार्यज्ञानेकारणत्वप्रकारेणकारणस्यज्ञानात्किमस्यकारणमितिजिज्ञासाकारणज्ञा
नेकार्यत्वप्रकारेणकार्यस्यज्ञानात्किमस्यकार्यमितिजिज्ञासेत्यन्वयः।कार्यकारणज्ञानयोस्तुकार्यकारणज्ञानजनकत्वमेक
संबंधिज्ञानस्यापरसंबंधिस्मारकतयेतिभावः।जिज्ञासेति।तदुत्तरंचकार्यादिधीजनकवाक्योच्चारक्रमेणकार्याद्यभिधानमि
तिशेषः।इत्थंचेति।संगतेरनंतराभिधानव्याप्यत्वादिघटितत्वेचेत्यर्थः।तुल्यत्वेपीति।यथाप्रत्यक्षोपजीवकत्वमनुमानेत
थाअनुमानोपजीवकत्वस्यप्रत्यक्षेसत्वेपीत्यर्थः।तथाचव्याप्यतारक्षार्थंप्रागुक्तउत्कर्षोनादरणीयः।प्रत्यक्षोपजीवकत्वादि
तिपंचमीतुज्ञानजन्यजिज्ञासाप्रयोज्यतायानतुहेतुतायामितिभावः।लाघवायेति।संगतिप्रदर्शनस्ययत्फलंमेकवा

ख्यातानुमानं तत्राप्यवायेत्यर्थः॥ अनुमानोपमाने पक्षीकृत्य समूहालंबनैकवाक्यतासाध्यकानुमित्यपेक्षया उपमानध
र्मिकैकवाक्यतानुमित्यंतरकल्पनायां गौरवादिति भावः॥ अथ अनुमानगतत्वं बहुवादिसम्मतत्वं कथमुपमाने संगतिर
त्याह। सुप्रसिद्धतयेति। इष्टसाधनीभूतप्रतिपत्तिकतयेत्यर्थः॥ सुप्रतिपदतया। अनिष्टाजनकप्रतिपत्तिकत्वेन। अत्र
हेतुर्निरसनीयेत्यादि। तथा चानुमानप्रतिपत्त्या विष्टसाधनत्वबलवदनिष्टाजनकत्वयोः सत्त्वात्तत्प्रतीतात्त्वेवोत्प
न्नोबाधकं नास्तीति भावः॥ नोपमानइति। जिज्ञासेत्यनुषज्यते। अप्रसिद्धत्वादिति। येषामुपमाने विमतिस्तेषामुपमानज्ञाना
त्मनो धर्मिण एवासत्त्वात्कुत्रेच्छा स्यादिति भावः॥ परस्योपमाने सम्मतिस्तस्याप्युपमानप्रतिपत्तौ बहुतरदुःखानुबंधित्वग्रहा
न्नेच्छासंभव इत्याह॥ निरसनीयेति। अत्र तिद्रुरूहतं। बहुतरदुःखानुबंधिप्रतिपत्तिकत्वं। ननु बहुतरदुःखानुबंधिन्यपिप
दार्थे तादृशदुःखवत्त्ववद्वेषाभावदशायां प्रथमं जिज्ञासा जायत एवेत्यत आह। औत्सर्गिकीमिति॥ प्रायशो बहुतरदुःखा रामः
नुबंधित्वेन ग्रहे द्वेषो भवत्येवेति रीतिमनुरूप्येत्यर्थः॥ तथा चेति। प्रथममनुमानजिज्ञासोत्पत्तौ तन्निरूपणेन तन्निवृत्तौ ६
वुपमाननिरूपणमिति भावः॥ ननु प्रतिबंधकीभूतशिष्यजिज्ञासानिवृत्तिरूपस्यावसरस्य कुतः संगतित्वं तत्राह कारकजिज्ञा
सानंतरमनभिधानारुतत्राह॥ यथावेति॥ अवसरस्य। अवसरपदार्थस्य आकरे। पंचमतत्वबोधादौ पंचनंतरवक्तव्यत्वमेवा
वसरः तत्त्ववत्त्वं परं किं वक्तव्यमिति जिज्ञासयेवानंतराभिधानात्संगतिलक्षणव्याप्तिरिति भावः॥ आनंतरोद्दिष्टत्वमेवा
वसरः अत एव अवसरतः कथकाशक्तिनिरूपणमिति परिशिष्टव्याख्याने न्यायभास्करकृतो द्दशा लक्षणं बाध्ये संगतिरि

त्युक्तमित्यपि केचित्॥ सार्वभौममतमाह॥ शब्दांतरेति॥ गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानस्य गवादिपद
शक्तिग्रहं विनानुपपत्तेर्गोपदं गवि शक्तं असति वृत्त्यंतरे वृद्धैस्तत्र प्रयुक्तत्वात् इत्याद्यनुमानापेक्षा उपमित्यात्मकस्य गव
यादिपदशक्तिग्रहस्य उपमानाधीनत्वात्पूर्वं तत्रापेक्षितमतः शब्दांतरेत्युक्तं। गवयादिपदस्य निःशक्तिकत्वग्रहे सत्यतिदे
शवाक्यार्थज्ञानासंभवात्तत्प्रतिबंधा यं गवयादिपदं किंचिद्वृत्तिमत् शक्तिमत् साधुपदत्वादित्येवंविधमुपमितिविषयीभू
तस्य गवयादिपदस्यापि शक्तानुमानं प्रागपेक्षितं भवतीत्याशयेनाह अस्त प्रवृत्तिनिमित्तेत्यादि॥ ननु यत्र मनसैव गवय
पदवाच्यत्वज्ञानं सहकृत सादृश्यज्ञानादुपमितिस्तत्रोपमानस्य शक्तानुमानानपेक्षितत्वात्तन्निखिलोपमाने अनुमान
पेक्षितत्वमसंभवीत्यत आह॥ अंततइति। बहुवादीत्यादि ग्रंथतस्तादृशसंगतेरलाभ एव। केचिदित्यत्रास्वरसः अयो
पजीवकत्वसंगतेरनंतराभिधाननियामकत्वापेक्षायां अनुमानोत्तरमेव प्रत्यक्षं किं न निरूपितमत आह। संभवतीवे
ति। इह। प्रत्यक्षस्यानुमानस्य यो निरूपणमत्र ज्ञानं न तु तदर्थकः शब्दः प्रत्यक्षबोधकशब्दस्यानुमानार्थकशब्दं प्रत्यहे
तुत्वात् गतपाच प्रत्यक्षस्य प्राग् ज्ञाने अनुमानधीरेव न स्यात् कारणं विना कार्यानुत्पत्तेः अतः प्रत्यक्षं प्राक् निरूपितमिति
भावः॥ ननु अनुमानत्वादिरूपेणानुमानज्ञाने व्यभिचारात् प्रत्यक्षनिरूपणं नानुमाननिरूपणे हेतुरत आह॥ अथ तत्पूर्व
कमिति॥ तथा च सामान्यतो व्यभिचारेपि प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणे प्रत्यक्षज्ञानसापेक्ष्यमिति भावः॥ अथ तत्पू
र्वकमनुमानं त्रिविधं पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति सूत्रं। अथ प्रत्यक्षानंतरं अनुमानं निरूप्यत इति शेषः॥ तद्वि

जाग०
७

त्रिविधं॥ तदा कार्यकारणेह। पूर्ववदित्यादि। पूर्वं कारणं तद्वल्लिंगकं यथा आर्द्रेंधनप्रभववह्निना धूमानुमानं शेषः कार्यं तद्वत्
तल्लिंगकं यथा धूमादिना वह्न्याद्यनुमानं कार्यकारणभिन्नलिंगकं तु सामान्यतो दृष्टं यथा पृथिवीत्वादिना द्रव्यत्वादेरनुमान
मिति॥ वाचस्पतिमिश्रास्तु। दृष्टमिति सर्वत्रान्वितं तथा च पूर्वमन्वयसहचारस्तद्वत्तया दृष्टं गृहीतं शेषो व्यतिरेकसहचारस्त
द्वत्तया गृहीतं सामान्यतस्तदुभयसहचारवत्तया गृहीतमित्येवं त्रैविध्यविवरणमाहुः तद्दूषणं सौत्रेण। व्याप्त्यादीति। व्या
प्त्यादेः प्रत्यक्षं यस्मादिति व्युत्पत्त्या प्रत्यक्षप्रमाणपरामर्शादित्यर्थः यथाश्रुते व्याप्त्यादिसाक्षात्कारपूर्वकत्वेनानुमाननिरू
पणस्य सूत्राल्लाभेपि प्रत्यक्षप्रमाणनिरूपस्यानुमाननिरूपणहेतुत्वलाभादसंगत्यापत्तेः न व्याप्तस्तु॥ प्रत्यक्षफलानुमान
फलयोः क्रमेण निरूपणे नियामकाकांक्षामाह। संभवतीति। तत्पूर्वकमित्यादिसूत्रे चानुमानपदं भावव्युत्पत्त्यानुमिति
परं। एवं च व्याप्त्यादिप्रत्यक्षेति यथाश्रुतमेव सम्यगिति प्राहुः नन्वेतावता सौत्रक्रमस्योपपादितत्वेपि प्रकृतग्रंथक्रमो
नोपपादित इत्यत आह। अत्रापीति॥ अनुमानखंडेपीत्यर्थः सहचारेति॥ अत्र प्रत्यक्षत्वमिंद्रियसन्निकर्षजन्यज्ञानत्वरूपं
प्रत्यक्षमप्युक्तं ग्राह्यं। न तु साक्षात्कारत्वरूपं तथा सति प्रत्यक्षप्रमाणनिरूपणस्य अनुमाननिरूपणहेतुत्वाप्राप्तेरित्यवधा
तव्यं। तन्निरूपणेत्। अनुमाननिरूपणात्॥ तस्य चेति॥ प्रत्यक्षपूर्वकत्वेन सहचारप्रत्यक्षजन्यत्वेन चानुमाननिरूपणस्ये
त्यर्थः। अनुमानोपमानयोरपि क्रमेण निरूपणे कार्यकारणभावमेव नियामकं इत्याह। एवमिति॥ अथानुनपदेन भावव्युत्
त्याऽनुमितेरपि निरूपत्वेन प्रतिज्ञातत्वात्तत्रेत्यत्र तच्छब्देनानुमितेपरामर्शः। अनुमितौ वविशेषणत्वान्न तत्र स्वयोसंगतिरतः

रामः
७

करणव्युत्पत्त्यालब्धमनुमानमेव परामृश्यमाचष्टे तत्रेति। प्रकारांतरेण व्याप्तिज्ञानत्वानुमितिकरणत्वादिना निरूपणीये।
अनुमाने व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वप्रकारेणानुमितेरविशेषणत्वात् तत्रेत्यत्र सम्बन्धपर्यंतादृशाविशेषण
त्वमुपपादयितुं मध्ये पूरयति लक्षणस्वरूपप्रामाण्यादिभिरिति॥ आदिना विभागपरिग्रहः अत्र तृतीयार्थः प्रकारता सम्बन्धः
विशेष्यत्वं निरूपणीये कर्त्तव्यनिरूपण इति बोध्यं। तत्करणमित्यादिना लक्षणस्य। तद्व्यलिंगेत्यादिना स्वरूपस्य। अथानुमानमि
त्यादिना प्रामाण्यस्य च निरूपणे यदनुमानं निविष्टं तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनैवानुमितेर्विशेषण
त्वान्न सम्बन्धपर्यासंगतिरिति भावः ननु प्रागुक्तक्रमेणानुमित्यनुमानयोर्द्वयोरेव निरूपणस्य प्रतिज्ञातत्वादनुमाननिरूपणपू
र्वमेवानुमितिः कथं निरूपितेत्यत आह। करणस्येति। क्रियाया योभेदो व्यावर्त्तकधर्मो व्याप्त्यादिज्ञानजन्यज्ञानत्वरूपोनुमिति
त्वादिस्तेन भिन्नाघटिता मूर्त्तिः शरीरं अनुमितिकरणत्वादिरूपं यस्य तादृशत्वेनेत्यर्थः। तथा च विशिष्टबुद्धेर्विशेषणज्ञानं वि
नानुत्पत्त्या पूर्वमनुमितिर्निरूपितेति भावः। प्रांचस्तु। नन्वनुमानस्य निरूप्यत्वेन प्रतिज्ञातत्वादनुमितेर्निरूपणमयुक्तमित्यत
मत आह। करणस्येति वदंति। तन्मते तावताप्यनुमितेः प्रथमतो निरूपणे अप्राप्तकालत्वतादवस्थ्यात्। किंच व्याप्तिविशिष्टपक्ष
धर्मताज्ञानजन्यज्ञानकरणत्वेनानुमाननिरूपणे हेतुभूतस्य व्याप्त्यादिज्ञानजन्यज्ञानत्वेनानुमितिज्ञानस्य संपत्त्यर्थं प्रागेवानु
मितेर्निरूपणं नहि व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं यज्ज्ञानं तत्करणमनुमानमित्येवमल्पिकारो ब्रूयात्तावतैव विशेषणज्ञा
नसंपत्तेः कृतमनुमित्याद्यभिलापेन॥ अत्र उपजीव्योपजीवकभाव इत्यादिनाऽर्थांतरनिरासः इति तु न वाच्यं तस्य प्रकारांतरेण

संगमादिति दिक्। आह। मणिकारोक्तवानित्यर्थः। व्याप्तीति। स्वातंत्र्येणपादधारणं यथाश्रुते व्याप्तीत्यनेन क्रियालक्षणस्यैवो
क्तत्वात् संगतेः तल्लक्षणं इत्यनंतरं वक्तुमिति पूरणीयं। आह। अनुमितिलक्षणमाहेत्यपि कश्चित्। क्रियालक्षणपूर्वकं अनुमान
रूपक्रियाविशेषलक्षणपूर्वकमिति कः स्वार्थस्तथा चानुमानलक्षणपूर्वमित्यर्थः। तल्लक्षणमाह। अनुमितिलक्षणमाह। क्वचि
दाकांक्षावैचित्र्येण समासैकदेशस्यापि तत्पदेन परामर्श इति तु नव्याः॥ व्याप्तीत्यादौ त्वेवं पाठ इत्यनेन व्याप्तीत्यत्रेति शब्दस्या
दर्थबोधकत्वमित्यन्ये तयोः सम्यक्त्वमेव पदिता दृशग्रंथस्यापि पुनः पुनर्धारणं संप्रदायसिद्धं॥ पक्षपत्युपाध्यायमतमुपस्थाप
यति। अत्रेति। अर्थ इति परेणान्वयः। व्याप्तीति। व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्यसंसर्गविधया पक्षावगाहितेवह्नि
व्याप्तिवैशिष्ट्यवत्पर्वते वैशिष्ट्यवान्धूम इत्याकारकं वह्निव्याप्तिवैशिष्ट्यवत्पर्वतवैशिष्ट्यं धूमे इत्याकारकं वा ज्ञानं तज्जन्यत्वमि
त्यर्थः। पदार्थतावच्छेदके ति। नवक्रांतस्य विशिष्टपदस्य वैशिष्ट्याश्रयबोधकत्वात् व्याप्तिवैशिष्ट्याश्रयत्वमेव पदार्थतावच्छेदकं तत्
प्रकारकं वा ज्ञानं नोपाध्यायमतेपि हेतुरिति वाच्यं। भावविहितक्तांतस्य विशिष्टपदस्य वैशिष्ट्यपरतया व्याप्ते वैशिष्ट्यं यत्रेति
व्युत्पत्त्या व्याप्तिवैशिष्ट्यस्यैव व्याप्तिविशिष्टपदार्थतावच्छेदकत्वादिति भावः। वचनतादिति। सामानाधिकरण्यसंबंधेन विशेष रामः ८
णतावच्छेदकविशिष्टस्य विशेष्यतावच्छेदकस्यैव कर्मधारयोत्तरभावप्रत्ययार्थत्वादिति भावः। इत्थं च नीलोत्पलत्वमित्यादौ ता
दृशसंसर्गेण नीलत्ववदुत्पलत्वस्यैव तादृशभावप्रत्ययार्थस्य प्रकृत्यर्थे नीलोत्पले न यान्नीलोत्पलीयं नीलत्ववदुत्पलत्वं इत्य
न्वयबोधः। एतेन तादृशभावप्रत्ययस्य यदि सामानाधिकरण्येन शक्तिस्तदा पदार्थतावच्छेदकयोरेकदेशतया तत्रान्वयासंभ

वः। यदि च तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन शक्तिस्तदा तादृशसामानाधिकरण्यस्य पदार्थतावच्छेदकद्वयमात्र
वृत्तित्वात् प्रकृत्यर्थस्य तत्रान्वयप्रसंगः कथंचिदवच्छेदकत्वादिसंबंधेन प्रकृत्यर्थस्य तत्रान्वयसंभवेपि उत्पलत्वे नीलोत्पलत्वमि
त्यादिव्यवहारप्रसंगः तादृशसामानाधिकरण्यस्योत्पलत्वेपि सत्वात् नीलोत्पलत्वं न समवेतमित्यादिप्रयोगापत्तिश्चेत्यादिकं स
माहितं। यत्तु ताद्विशेषणतावच्छेदकादिभेदादनंतशक्तिकल्पनापत्तेः न कर्मधारयोत्तरभावप्रत्ययस्य उक्तरूपेण शक्तिः किंतु
वृत्तित्वमात्रे तथा च नीलोत्पलत्वमित्यादौ भावसामान्यशक्त्योपस्थापितस्योत्पलत्वादेर्नीलान्वितवृत्तित्वेन सहान्वयान्नीलव
दुत्पलत्वं वाक्यार्थ इति मतं। तन्न। नीलोत्पलत्वमित्यादौ नीलोत्पलयोरभेदानुभवस्यापलापप्रसंगात्। वस्तुतो घटत्वमित्यादौ घटे
तरावृत्तित्वे सति सकलघटवृत्तित्वरूपेण घटत्वस्यानुभवः सर्वसिद्धस्तत्र च घटस्य घटपदादेव लाभादितरावृत्तित्वादौ भावप्रत्य
यस्य शक्तिः तत्रापीतरत्वमात्रयोर्वृत्तिमान्साकल्यघटकीभूतं प्रतियोगित्वमवच्छेदकत्वं च प्रत्येकमर्थः। तथा च प्रकृत्यर्थस्य
घटस्येतरत्वेनस्य चाश्रये आश्रयस्य वृत्तिमति वृत्तिमतः पुनरितरत्वेऽन्वयादितरावृत्तित्वसत्त्वं तदन्यस्य लाभः। एवं प्रकृत्यर्थ
स्य घटस्य वृत्तिमति तस्य चेतरत्वे इतरत्वस्य च प्रतियोगित्वे प्रतियोगित्वस्य चावच्छेदके तस्य च पुनरितरत्वेऽन्वयात् घटवृत्य
न्योन्याभावप्रतियोगितावच्छेदकभिन्नत्वरूपस्य सकलघटवृत्तित्वस्य लाभः॥ व्युत्पत्तिवैचित्र्यादेकपदार्थानां परस्परमन्वयः
। न च विशिष्टस्यापदार्थत्वे प्रथमं विशिष्टवैशिष्ट्यान्वयबोधो न स्यादिति वाच्यं। इष्टत्वात्। क्वाचित्कस्य प्रथमं विशिष्टवैशिष्ट्यबोधस्य
विशिष्टलक्षणादितो युपपत्तेः प्रकृत्यर्थतावच्छेदकस्य पादृशसंबंधोभासते तादृशसंबंधावच्छिन्नं तु वृत्तिमत्तादिकं ग्राह्यं तेन

ज्ञा.ग. घटत्वादिजातेः कालिकसंबंधेन घटेतरवृत्तित्वेपि न क्षतिः। न वा विषयितासंबंधेन घटत्ववतो भेदस्य घटवृत्तित्वेपि घटत्वादेर्घटवृत्त्य
९ न्योन्याभावप्रतियोगितानवच्छेदकत्वहानिः सत्त्वं प्रमेयत्वमित्यादौ च सहितरावृत्तित्वादेर्भानमप्रसिद्धत्वात् किंतु सवृत्तिभेदप्रति
योगितानवच्छेदकत्वादिरूपं सकलसवृत्तित्वादिमात्रे भासते। न चैवमपि घटत्वमित्यादितो भावस्य गगनादेर्वा भानप्रसंगः स्वातंत्र्ये
णापि वृत्तिमत्तो। इत्थं च नीलोत्पलत्वमित्यादिकर्मधारयस्थलेपि नीलाभिन्नोत्पलस्य भावप्रत्ययार्थेन सहान्वयेन नीलत्वसमवायि
समवायरूपस्य पदार्थतावच्छेदकसामानाधिकरण्यस्य भानं भवत्येव। वचोक्तरीत्या भावप्रत्ययस्य शक्तिकल्पने गुरुत्वमित्यादितो
रसवत्त्वस्य संयोगवत्त्वमित्यादितो द्रव्यत्वस्य तद्रूपवत्त्वमित्यादितस्तद्रसवत्त्वस्य प्रतीत्यापत्तेः प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्ट
प्रकृत्यर्थतावच्छेदकताघटकसंबंधेन वृत्तिमत्त्वस्यैव शक्यतावच्छेदकत्वे तु तत एव निरुक्तजातिप्रसंगभंगादितरावृत्तित्वादौ शक्तिक
ल्पनायां मानाभाव इति वाच्यं। तादृशेणानुभवानुरोधादेव तत्र शक्तेः कल्पनाद्व्यावर्तकस्यापि शक्यतावच्छेदकत्वादिति संप्रदायः।
केचित्तु धर्मत्वेनैव धर्मे भावप्रत्ययस्य शक्तिः। तत्र च प्रकृत्यर्थतावच्छेदकनिष्ठाधेयत्वसंबंधेनैव प्रकृत्यर्थान्वयस्य व्युत्पन्नत्वाद्घ रामः १
टत्वमित्यादितो न द्रव्यत्वादेर्भानं। न वा घटादौ पटधर्मस्य द्रव्यत्वादेः सत्त्वेपि पटादौ घटत्वं नास्तीत्यस्य वाक्यस्यायोग्यत्वमित्याहुः॥ ९
॥तन्मंदं॥ घटे घटत्वमित्यादिवाक्यस्य निराकांक्षत्वापत्तेः घटधर्मत्वावच्छिन्नघटवृत्तितस्यान्वयबोधे उद्देश्यतावच्छेदकविधेय
योरैक्यस्यावश्यकत्वादिति। न चास्तु घटवत्त्वमन्यत्वमित्यादिमुख्यप्रयोगसंभवाल्लाघवेन घटत्वादिकं जातिभेदत्वादिररखंडो
पाधिर्भावप्रत्ययस्य शक्यतावच्छेदकं घटत्वमित्यादौ घटत्वत्वादिप्रकारेणाखण्डैव बुद्धिरिति प्राहुः॥ तन्मंदं। तथा सति घटत्व

त्वमित्यादौ प्रकृत्यर्थस्य घटपदादेर्भावप्रत्ययार्थघटत्वादावाधेयत्वसंबंधेनान्वयस्यानुपपत्तेः घटादिविशिष्टे घटादेरिव घटा
दौ घटादिमद्वृत्तित्वस्याप्यन्वयस्य निराकांक्षत्वात् घटवान् घटवान् इत्येव घटवति घट इत्यादावप्यन्वयबोधानुत्पादस्य स
र्वानुभवसिद्धत्वादिति संक्षेपः॥ ननु वह्निव्याप्तिवैशिष्ट्यवत्पर्वतवृत्तितावद् द्रव्यत्वं इत्येवं परामर्शजन्यानुमितावतिव्याप्तिः। तत्र व्या
त प्तिविशिष्टसमानाधिकरणपक्षधर्मतायाः द्रव्यत्वेभावात्तस्याह। ज्ञानेति। ध्वांतानुमितिः ध्वांतस्यानुमितिः। तथा च तत्र
व्याप्तिविशिष्टत्वसमानाधिकरणस्य पर्वतवृत्तित्वं पर्वतरूपारोप्रसिद्धं तस्य द्रव्यत्वादावारोपमादायैव लक्षणसंगम इति भा
वः। यद्वा ननु कांचनमयपर्वतो वह्निमानित्याद्यनुमितावव्याप्तिः तादृशपक्षवृत्तिताप्रसिद्धेरत आह ज्ञानपदेति। तथा च वह्न्या
दिव्याप्तिविशिष्टत्वसमानाधिकरणतत्तद्धर्मिवृत्तितायास्तद्रूपावच्छिन्नवृत्तित्वेन ज्ञानजन्यज्ञानत्वं तत्तद्रूपावच्छिन्नतत्तद्धर्मि
कवह्न्यादिसाध्यकानुमितेर्लक्षणतामेति भावः। यत्तु। ह्रदो वह्निमान्धूमादित्यादौ व्याप्तिविशिष्टत्वसमानाधिकरणह्रदधर्मता
प्रसिध्यात्तत्ज्ञानासंभवात् व्याप्तिरत उक्तं। ज्ञानपदेत्यादि। तन्तुच्छं। तत्र तादृशसामानाधिकरण्याप्रसिध्यात्तत्ज्ञानासंभव
स्यानुपदं वक्ष्यमाणत्वेन संदर्भविरोधात्। केचित्तु बाधिताबाधितसाधारणेत्यस्य सद्धेतुसाधारणेत्यर्थः। तथा च सद्धेतुपरागे
णास्तीति भानस्य टीकाकृतास्वीकारात् सद्धेतुसामानाधिकरण्यमादाय ह्रदो वह्निमानित्यनुमित्यव्याप्तिनिरासाभिप्रायकोयं ग्रं
थ इत्याहुः। परे तु पक्षवह्निव्याप्तिविशिष्टत्ववद्गुणसंयुक्तत्ववान्धूम इत्यादिपरामर्शाद्गुणो वह्निमानित्यनुमितिकरणाव्याप्तिः गुणसं
युक्तत्वरूपस्य पक्षधर्मत्वस्याप्रसिध्यात्तत्ज्ञानासंभवादत आह। ज्ञानेति। बाधिताबाधितेत्यस्य सद्धेतुसाधारणस्य पक्षवृत्तित्व

ज्ञा॰ग॰ स्य ज्ञानत्वाभावादित्यर्थ इत्याहुः॥ तन्मते सदुपरागेणमतः संसर्गमर्यादया भानस्फुटीकृतत्वादि प्राचीनसम्मतत्वेन प्रकारवि
१० धयाञ्जलीकस्य गुणसंयुक्ततादेर्भानासंभवात्॥ अन्यथा परमता विशेषप्रसंगादिति॥ नव्यास्तु ननु बाधकालीनस्य परामर्शस्या
नुव्यवसाये॰तिव्याप्तिः॥ न च घटज्ञाने॰ बाधितत्वं विशेषणं अप्रामाण्यज्ञानविशिष्टबाधकालीनस्य परामर्शजन्यानुमितौ अव्या
प्तिप्रसंगादत आह॥ ज्ञानेति॥ बाधिताबाधितेति॥ बाधिताबाधितसाधारणपरामर्शत्वेनुज्ञानस्य कारणत्वलाभादित्यर्थः॥ तथा
च तादृशकारणतावच्छेदकत्वं निविष्टमिति नातिव्याप्तिः॥ अत एवाबाधितपदमपि साधु संगच्छते इति प्राहुः॥ केचित्तु॥ ननु चरमज्ञानस्य
परस्य भ्रमपरत्वे भ्रमानुमितौ प्रमापरत्वे च भ्रमानुमितावतिव्याप्तिरत उक्तं ज्ञानेनेति॥ क्रमेणावतारणिकामाहुः॥ तद्धित्यादि व
स्तुगत्या तादृशपक्षधर्मतायाः ज्ञानमात्रनिवेशो धूमवान्पर्वत इति ज्ञानजन्यबुद्धावतिव्याप्तिरतस्तादृशसामानाधिकरण्याव
गाहिज्ञानं निवेश्यमित्याशयेन दूषयति॥ परामर्शेनेति॥ अनुमितिजनकतानेनेत्यर्थः॥ नियमत इति॥ तथा च वह्निव्याप्तिसंबं
धविशिष्टपर्वतसंबंधवान्धूमो वह्निव्याप्यधूमवांश्च पर्वत इत्यादिसमूहालंबनजन्यानुमितौ लक्षणसत्त्वेपि वह्निव्याप्यधू
मवान्पर्वत इत्यादिधीजन्यप्रमानुमित्यव्याप्तिरिति भावः॥ ननु व्याप्तिसंबंधविशिष्टपक्षसंबंधनिश्चयत्वेन हेतुत्वादुक्तस्य जन्या राम॰ १०
नुमितिरेवाप्रसिद्धा कुतोऽव्याप्तिरत आह॥ गौरवेणेति॥ लाघवात्पक्षवृत्तिव्याप्तिविशिष्टत्वनिश्चयत्वेन पक्षे वा व्याप्तिविशिष्टवैशि
ष्ट्यावगाहिनिश्चयत्वेन हेतुत्वादिति भावः॥ ननु व्याप्तिविशिष्टबुद्धित्वं न व्याप्तिसंबंधावगाहिबुद्धित्वं व्याप्तितत्संबंधादिसमूहा
लंबनादप्यनुमित्यापातात्॥ किंतु व्याप्तिसंबंधसंबंधावगाहिबुद्धित्वमेव तत्कुतो लाघवमित्यत आह॥ संबंधेत्यादि॥ तद्धिशि

ष्टबुद्धित्वं तत्प्रकारकज्ञानत्वं॥ ननु पूर्वोक्तसंबंधसंबंधावगाहित्वं तत्संबंधसंबंधावगाहिसमूहालंबने॰ति प्रसक्तेः॥ अन्यथा
दंडी पुरुष इत्यादितोपि दंडपुरुषसंयोगा इत्यस्यैवैलक्षण्यानुपपत्तेः प्रकारता च विषयताविशेषः स च स्वरूपसंबंधरूपसंबंधः प
दार्थांतरं वा॥ अत एवाधिकरणाभावयोः संबंधस्य स्वरूपानतिरेकेपि न हीयसमूहालंबनविशिष्टबुद्ध्योर्भेदः॥ न च तुल्यविषयक
त्वेपि विषयितावैलक्षण्येन बुद्धिभेदेपि साकारवादापत्तिरिति वाच्यं॥ बाह्यवस्तूनां प्रामाणिकतया अपह्नोतुमशक्यत्वादित्यादे
बौद्धाधिकारदीधित्यामुक्तत्वादिति भाव इति प्राञ्चः॥ तन्मते॥ विशिष्टबुद्धेः संबंधसंबंधावगाहित्वमतेपि व्याप्तिविशिष्टबुद्धित्वापे
क्षया व्याप्तिसंबंधविशिष्टबुद्धित्वस्य गुरुत्वया तुल्यत्वायोगादिति॥ नव्यास्तु॥ ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानं नानुमिति
जनकं व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्यावगाहितावच्छेदकत्वात् इत्यनुमाद्युक्तगौरवं प्रामाणिकमेवेत्यत आह॥ संबं
धेत्यादि॥ व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्याग्रहेपीत्यर्थः॥ विशिष्टज्ञानत्वस्य विशिष्टस्यज्ञानत्वं यत्रेति व्युत्पत्त्या अ
नुमितिजनकीभूतविलक्षणज्ञानस्योपपादितत्वात् मिश्रादिभिरुपपादितत्वादित्याहुः॥ ननु व्याप्तिविशिष्टत्वसमानाधिकर
णपक्षधर्मताया विशिष्टवैशिष्ट्यनिरूपितविषयिताविशेषेण ज्ञानपदार्थे अन्वयात् विलक्षणज्ञानलाभात् वह्निव्याप्यधूमवा
न्पर्वत इत्यादिधीजन्यप्रमानुमित्यव्याप्तिरत आह॥ भ्रमस्थल इति॥ तज्ज्ञानेति॥ व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्व
ज्ञानेत्यर्थः॥ तथा च ह्रदो वह्निमानित्यादिभ्रमानुमितौ अव्याप्तिरिति भावः॥ अपास्त इव वह्निव्याप्तिविशिष्टत्वसमानाधिकरण
ह्रदवृत्तित्वं भ्रमस्थले प्रसिद्धमत आह॥ असदिति॥ अजीके चक्षुःसंन्निकर्षादेर्व्यापारे॰ ग्राह्यादेश्च विरहेण प्रत्यक्षादिप्रमाणतः

न्याग० स्तत्ख्याप्रसंभवात् सत्त्वे वासत्त्वव्याघातात्। विनापि प्रमाणव्यापारं तदभ्युपगमे च शशविषाणादिप्रतीतिदशायां वंध्यासुते
११ ऽरपि ग्रहप्रसंगात् अगृहीतशशादिकस्य पुंसः शशविषाणमित्यादिप्रतीत्यनुत्पत्त्या स्फुरत्शशादिविषयतामाहत्यत्र मते नै
वतादृशप्रतीत्युत्पत्त्यावतिरिक्ताखंडालीकविषयत्वेमानाभावात् शशविषाणयोः संबंधोऽलीक इत्यादिव्यवहारस्य चापार्थ
कत्वात् शशो विषाणमसदित्यादिस्थले चासत्त्वस्यात्यंताभावप्रतियोग्यर्थकत्वादिति भावः। न चासतो प्रसिध्या तत्ख्यातिनि
षेधस्यायोगः तदीयसंसर्गतावच्छेदेन तत्प्रमात्वघटकत्वोपगमेनार्थतस्तन्निरासादिति भावः। न व्याप्तु। लिंगासंसर्गाग्रहा
द्वेंगिकासंसर्गाग्रहस्योपेयत्वात् भ्रमस्य लेऽनुमित्यनुत्पत्तेः कुत्राव्याप्तिरत आह। अस्मदिति। अस्मतः प्रमापरामर्शादनुत्प
न्नस्य ख्यातिनिरस्या इत्यनुमितिभिन्नत्वनिरासादिति वदंति। लक्षणे व्याप्तिमुद्राव्य लक्षणे वा कातः शाब्दबोधोप्यनुपपन्न इत्य
हा। अवांतरेति। अयोग्यतासंशयस्याप्रतिबंधकत्वादुक्तं। निर्णयेति। तथा च स्फुरद्धर्मतानव्याप्तिविशिष्टत्वसमानाधिक
रणेत्यवांतरवाक्यार्थायोग्यत्वनिर्णयेना हृदापक्षधर्मतायाञ्ज्ञानपदार्थः अन्वयः संभवतीति भावः। अत्रैव दृष्टांतयति वि
षाणइति। विषाणत्वावच्छेदेनेत्यर्थः। शशसंबंधीति शशविषाणेत्यत्र तत्पुरुषे शशपदेन लक्षितस्य शशसंबंधिनस्तादात्म्ये शम: ११
न विषाणेऽन्वये शशसंबंधिभेदग्रहस्येव शशासंबंधाभावग्रहस्यापि स्वतो विरोधित्वात् शशसंबंधाभावेत्यस्येव वा शशसंसं
बंधेनाभाव इतिव्युत्पत्त्या शशसंबंधावच्छिन्नप्रतियोगिताकोभेदोऽर्थः। तथा विषाणजन्यं कार्मुकमित्यादिवाक्यस्य लीपान्व
यबोधाभिप्रायेण इदं निपातार्थस्य शशसंबंधादेस्साक्षादेव विषाणादिना नामार्थेनान्वयसंभवादिति तु परमार्थः। वैयाक

रणमते शशविषाणमित्यादिवाक्यतः शशसंबंधवन्विषाणमित्याकारकोबोधस्तेनुभवविभक्तिप्रतिसंधानस्यान्वयबोध
सहकारित्वस्वीकारात् नामार्थयोर्भेदेनान्वयबोधस्य समासातिरिक्तस्थलेएवाव्युत्पन्नतया मणिकृन्मतेपि शशपदस्य
शशसंबंधपरतयावेति तु नव्याः। अनुभवानुरोधेनासमानाकारस्यापि विरोधित्वमित्यपि कश्चित्। अपरे तु। शशस्य संब
धोयत्रेति व्युत्पत्त्या शशसंबंधाभाववदित्यस्य शशासंबंधिभेदस्य लाभाद्यथाश्रुतमेव सम्यगिति प्राहुस्तच्चिंत्यं। नवेति। वाक्य
मितिपरेणान्वयः। प्रमैवेति। प्रकृतपक्षधर्मिकप्रकृतसाध्यकप्रमानुमितिरेवेत्यर्थः। तेन ह्रदो वह्निमानित्यादिभ्रमानु
मितेरप्रमातः प्रमात्वेपि न क्षतिः। प्रमापदस्य भ्रमसामान्यभिन्नार्थकत्वे ह्रदः पर्वतश्च वह्निमानित्यादिसमूहालंबनानुमि
तेरलक्ष्यत्वापत्तेः इष्टापत्तौ चोपाध्यायमतेपि तादृशसमूहालंबनानुमित्यावेवातिप्रसंगासंभवादग्रे यदिचेत्यभिधान
स्य संदर्भविरोधापत्तेरिति भावः। सल्लिंगपरामर्शादित्यत्र सल्लिंगपरामर्शमात्रादित्यर्थः इत्यपि वदंति। ननु अत्र भ्रम
स्य अलक्ष्यत्वे पृथिवीत्वादिहेतुकायां गंधप्रागभावावच्छिन्नो घटो गंधवानित्यादिभ्रमानुमितौ महानसीयेतरवह्निबाधस
हकृताद्यथार्थवह्निपरामर्शाज्जायमानायां पर्वतो महानसीयवह्निमानित्यादिभ्रमानुमितौ वाति व्याप्तिरत आह। यदि चे
त्यादि। पक्षतावच्छेदकसामानाधिकरण्येनैव गृहीतव्यापकतावच्छेदकरूपेण वा च पक्षे साध्यस्यानुमितिरित्युपाध्यायमत
मालंब्योक्तं। यदिचेति। प्रथमज्ञानपदस्य प्रमापरत्वे तद्दोषतादवस्थ्यमतस्त्वरमेति।। प्रमापरमिति। प्रकृतपक्षधर्मिकप्रकृ
तसाध्यकत्वप्रमापरमित्यर्थः। ह्रदो वह्निमान्पर्वतश्च वह्निमानिति प्रमानुमितेरंशतः भ्रमत्वेपि न तत्राव्याप्तितादवस्थ्यं। यत्र

ग्राग०
१२

व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वस्य हेतौ न भ्रमः किंतु पक्षधर्मे हेतौ व्याप्यत्वमात्रस्य व्याप्ये वा हेतौ पक्षधर्म
त्वमात्रस्य भ्रमस्तादृशपरामर्शजन्यप्रमायामव्याप्तिमाह। अव्याप्येत्यादिना। वस्तुत इति। वस्तुगत्या तथा च वह्निव्याप्यद्रव्यत्ववा
न्तादृशमहानसत्ववान्वा पर्वत इत्याकारकः परामर्शः यत्र द्रव्यत्वगतमेव पक्षधर्मत्वं महानसत्वगतमेव व्याप्यत्वं विष
यीकरोति तत्रत्यायां पर्वतो वह्निमानिति प्रमायामव्याप्तिरिति भावः। ननूक्तानुमितिमात्रस्यैव साध्यव्याप्यवत्पक्षावगाहित्वादु
क्तस्थलीयानुमितिर्लिंगांशे भ्रमरूपैव सा चेन्न लक्ष्या भ्रमसामान्यभिन्नत्वरूपस्यैव प्रमात्वस्य लक्ष्यलक्षणयोर्निवेशनीयत्वे
त्पर्वतोऽयं द्रव्यवह्निमानित्यादिसमूहालंबनानुमितेरलक्ष्यत्वेपि क्षत्यभावात् कुतो व्याप्तिरित्यत आह। लिंगेति। साधकाभावादि
त्यादिः। न च धूमादिपरामर्शजन्यतावच्छेदकतयैवानुमितेर्वह्निव्याप्यधूमादिविषयकत्वसिद्धिः। अन्यथा विनापि धूमादिपरा
मर्शमालोकपरामर्शादुक्तानुमितेरुत्पत्त्यापत्तेरिति। तौ वतापि द्रव्यत्ववत्पर्वतधर्मिकवह्निभावानुमितित्वावच्छिन्नं प्र
त्येव वह्निव्याप्यद्रव्यत्ववज्ज्ञानं निश्चयत्वेन हेतुतया तादृशानुमितेश्च प्रमात्वनियमेन तत्राव्याप्तितादवस्थ्याल्लाघवादेक
विधव्याप्तेरेवानुमितिप्रयोजकतया व्यवस्थापयत्वादिति भावः। ननु पक्षस्य वस्तुगत्या साध्यवत्त्वेन तत्रेश्वरीयस्य व्याप्ति
विशिष्टत्वसमानाधिकरणपक्षधर्मताज्ञानस्य जन्यतासत्त्वान्नाव्याप्तिरत आह। ईश्वरेति। अतिप्रसंजकत्वात् प्रत्यक्षादि
साधारणत्वात्। इदमुपलक्षणं। व्याप्तिविशिष्टपक्षधर्मतेत्यस्य वैयर्थ्यमपि द्रष्टव्यं। तथा च तादृशज्ञानत्वावच्छिन्नमेव
जनकत्वं लक्षणे प्रवेश्यं। तच्च प्रकृतानुमिताविश्वरज्ञानस्य नास्तीति भावः। यद्यपि व्याप्तिविशिष्टत्वसमानाधिकरणपक्ष

गमक० १२

धर्मताविषयिताविशेषेण ज्ञानेऽन्वयात्तादृशज्ञानमेव लक्षणे प्रवेश्यं। अन्यथा परामर्शो न नियमत इत्युक्तदोषतादवस्थ्या
त्। तत्र च प्रकृतसाध्यीयव्याप्तिप्रवेशे मानाभावात् यत्किंचित्साध्यीयव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मतावि
षयिताविशेषेण ज्ञानमादाय लक्षणसंभवान्न कुत्राप्यतिव्याप्तिसंभावना। तथापि प्रकृतव्याप्तिविशिष्टवैशिष्ट्यनिरूपितवि
लक्षणविषयितासंबंधेन धर्मत्वस्यैव ज्ञानपदार्थेऽन्वयात्सर्वसामंजस्ये पक्षपदार्थपर्यंतप्रवेशवैयर्थ्यान्नैवमन्वयो वाच्य
इत्याशयः। न च साध्यादिभेदेन व्याप्तेर्भेदादेकोपादानेऽन्यसाध्यकानुमित्यव्याप्तिरतो जातिगर्भत्वध्रौव्येण न कुत्राप्यति
व्याप्तिरिति वाच्यं। तत्पक्षकतत्साध्यकतद्धेतुकानुमितित्वेन विशिष्यैव लक्षणतया जातिघटनाया अनावश्यकतया तत्तदेकवि
धव्याप्तेरेव सर्वत्रानुमितौ हेतुत्वादित्याशयादिति। अत एवोक्तानुमित्यव्याप्तेरेव विशेषविधिं विना कारकविभक्तिमंतर्भाव्यै
व तत्पुरुषस्याव्युत्पन्नत्वादाह। तत्ज्ञानवेति। व्याप्तिविशिष्टपक्षधर्मताज्ञानमिति ज्ञानांतं न तत्पुरुषोऽपि नेत्यर्थः। आदिपदा
व्याप्तिविशिष्टा व्याप्तिसमानाधिकरणा या पक्षधर्मतेत्यादिकर्मधारयपरिग्रहः। मिश्रमतमुपन्यस्यति। व्याप्तिविशिष्टमिति।
अपचार्थे द्वंद्व इति पाणिनिसूत्रेण चार्थे समस्यमानपदार्थयोर्भेदे द्वंद्वस्य विधानादुक्तवाक्यतः सल्लिंगकपरामर्शालाभः।
तत्र व्याप्तिविशिष्टस्यैव पक्षधर्मतया तदुभयोर्भेदविरहादत आह। पदार्थयोरिति। न्यायसूत्रे तादृशविधस्यैव प्रमेयस्य प्रावि
ष्टत्वात्तस्य भेदः प्रमाणेरस्त्येवेत्यत उक्तं। अन्यत्र चेति। अन्यत्र नीलघटयोरभेद इत्यादि वाक्ये। तथा च सूत्रे चार्थो भेदः समस्य
मानपदप्रतिपाद्यतावच्छेदकयोर्ग्राह्यः। स च प्रकृतेऽपि व्याप्तिविशिष्टत्वपक्षधर्मतयोर्भेदस्त्येवेति भावः। ननु पदार्थतावच्छेदकयो

भेदेन द्वंद्वविधाने घटावित्यादिसरूपैकशेषो न स्यात् द्वंद्वापवादकस्य तस्य द्वंद्वाप्रसक्तावसंभवात्। न च पदबोध्यभेद एव द्वंद्वः तथा च घटावित्यत्रापि घटपटबोध्यानां घटव्यक्तीनां परस्परभेदसत्त्वान्न द्वंद्वाप्रसक्तिरिति वाच्यं। तथा सति घटकलशावित्येवमपि द्वंद्वप्रसंगात् अनुशासनाभावेन तत्रैकशेषस्य कर्तुमशक्यत्वादिति चेन्न। तत्र सरूपैकशेषासत्वेपि क्षत्यभावात्। यत्र विसुत्वसिंहत्वादिकं विभिन्नमेव हरिपदार्थतावच्छेदकं तत्रैव तत्संभवाच्चेति दिक्। अत्र च नीलघटयोरभेद इत्यादिस्थले विभक्त्युपस्थाप्यं द्वित्वादिकं न विशेष्यान्वितं तत्स्यैकत्वेन बाधात्। नापि तद्विशेषणीभूते नीलत्वघटत्वादावन्वितं तयोः पदार्थतावच्छेदकत्वेनाविरहात् किंतु नान्वितमेव। न चैवं द्विवचनवैयर्थ्यं हास इत्यत्र बहुवचनवत् सुप्त इत्यत्रैकवचनवच्च पदसाधुत्वार्थमेव तदुपयोगादिति ध्येयं। स्वामिनो देवदेवरावित्यत्रैव व्युत्पत्तिवैचित्र्यात् पदार्थतावच्छेदकेपि विभक्त्यर्थस्य द्वित्वादेरन्वय इति। अत एव जात्याकृतिव्यक्तयः पदार्थ इति न्यायसूत्रे पदार्थ इत्यत्रैकवचनं जात्यादित्रयस्यैकशक्तिविषयत्वाभिप्रायमिति वार्त्तिकव्याख्या इत्यपि वदंति। ननु पदार्थतावच्छेदकयोर्भेदे न द्वंद्वविधाने नीलोत्पलमित्यादिकर्मधारयस्थलेपि तदापत्तिरत आह। पदार्थेति। भेदः। तादात्म्यातिरिक्तः संबंधः। भेदकत्वादात्म्यं। तथा चैकपदार्थधर्मिकपदार्थांतरवैशिष्ट्यविषयता बहिर्भूतविभिन्नधर्मावच्छिन्नपदार्थद्वयविषयताकबोधजनकत्वेनेत्यर्थः पदार्थयोर्भेदे द्वंद्वविधानेपि न क्षतिरित्याशयेनाह विशिष्टपदस्येति व्याप्तिविशिष्टपक्षधर्मयोर्द्वंद्वे विशेषणविधिं विना अल्पस्वरस्य पक्षधर्मपदस्य पूर्वनिपातापत्तिरत आह।। विशिष्टपदस्येत्यपि कश्चित्। ननु व्याप्तिविशिष्टेन पक्षधर्मता यादृशवह्निव्याप्यद्रव्यत्त

वान् पर्वत इत्यादिपरामर्शेण व्याप्तिविशिष्टस्याविषयीकरणात्तज्जन्यानुमितावव्याप्तिरतो वैशिष्ट्यपरतामाह। धर्मेति। वैशिष्ट्यपरतयेत्यर्थः। न च विशिष्टपदस्य तत्परत्वे न लक्षणया तस्य वाक्यत्वेन शक्त्यभावादिति वाच्यं। धातोरेव शक्ता वैशिष्ट्यपरत्वात्। भावविहितक्तप्रत्ययस्य निरर्थकत्वात्। एतदाशयेनैव प्रागपि विग्रहवाक्ये व्याप्तिविशिष्टमिति क्लीबनिर्देशः कृतः। नपुंसके भावे क्त इत्येवानुशासनादिति भावः। उक्तत्वादिति। तत्र व्याप्तिविशिष्टेत्यादिमूलस्य तद्ग्रंथेनैकधर्मिणो मूलकृतोक्तत्वादित्यर्थः। उक्तत्वात्। विवक्षितत्वादित्यर्थ इत्यपि केचित्। द्रव्यमिति। तत्र व्याप्तिविशिष्टधूमस्यैव द्रव्यत्वेन पक्षधर्मतावगाहनादिति भावः। मीमांसकेति। मीमांसकैरनुमितित्वेनाभिमते ज्ञाने उक्तलक्षणस्यानुप्रवेशात् गतत्वादित्यर्थः। तथा च वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शजन्यानुमितावव्याप्तेर्जातिगर्भतया वारणेपि वह्निव्याप्यो धूमो धूमवांश्च पर्वत इत्याकारकसमूहालंबनस्यानुव्यवसायेनेति व्याप्तिरिति भावः। ननु व्याप्तिसंबंधपक्षसंबंधयोः परस्परं वैशिष्ट्यावगाहित्वं वाच्यं तथोक्तसमूहालंबनस्यातथात्वान्नोक्तातिव्याप्तिरत आह। अव्यापकत्वात्। वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञाने एवासत्वात्। तथा च तादृशपरामर्शस्य जीयानुमित्यव्याप्तिरिति भावः। लक्षणस्य जन्यपदं जन्यता विशेषविशिष्टपरमतो धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्ति इत्यादिज्ञानजन्येनाति व्याप्तिरित्याशंक्य निराचष्टे। नन्वेति। तदुभयविषयकत्वनियतेति व्याप्तिसंबंधविषयकत्वाभावस्य तादृशविषयकान्यत्वस्य वा पक्षधर्मताविषयकत्वाभावस्य तादृशविषयकान्यत्वस्य वा अधिकरणवृत्तीत्यर्थः। व्याप्तिविशिष्टत्वपक्षधर्मतोभयविषयकत्वनियतो यो धर्मः परामर्शत्वं तदवच्छिन्नकारण

जा.ग. तान्निरूपितकार्यत्वमनुमितावस्तीति तल्लक्षणसत्त्वं। परामर्शाद्यनुव्यवसायेनेतु परामर्शत्वादिना हेतुत्वं किंतु प्रत्यक्ष
१४ मात्रे विषयत्वेन तच्चन तदुभयविषयकत्वनियतं घटज्ञानादौ व्यभिचारात् तत्तत्परामर्शप्रत्यक्षे विषयविधया घटादि
स्मृतौ चोद्बोधकविधया तत्तत्परामर्शव्यक्तित्वेन हेतुता सत्त्वेतु धर्मपदं नानाव्यक्तिवृत्तिधर्मोपकं वाच्यमिति भावः। वैय
र्थ्यादिति। स्वव्यापक तदुभयविषयकत्वसामानाधिकरण्यात्मकेन तदुभयविषयकत्वनियमेस्वव्यापकव्याप्तिविषय
कत्वसमानाधिकरणधर्मावच्छिन्नेत्यस्यैव सम्यक्त्वादिति प्राचः। तदुभयविषयकत्वाभाववद्वृत्तित्वलक्षणनियमस्य
निवेशे स्वं अभावघटकतया पक्षधर्मताविषयकत्वस्य वैयर्थ्यविरहेप्यनतिप्रयोजकत्वादित्यर्थः। इति कश्चित्। नन्व
व्याप्तिविशिष्टबुद्धौ व्याप्तिज्ञानत्वेन हेतुतात्त्रातिव्याप्तिवारणार्थमेव पक्षधर्मताप्रवेशः। तन्निवेशेपि व्याप्तिविशिष्टवैशि
ष्ट्यबुद्धौ अतिव्याप्तिरतस्तद्वारणार्थं चरमज्ञानस्य व्याप्यविषयकत्वेनावश्यं विशेषणीयत्वे तत एव व्याप्तिविशिष्टबुद्धा
वप्यतिव्याप्तेर्निरासात्। नचैवं व्याप्यविषयकत्वे सति व्याप्तिज्ञानजन्यत्वमित्यस्यैव सम्यक्त्वे व्याप्तिविषयकत्वनियत राम: १४
धर्मावच्छिन्नकारणत्वव्यपदेशो व्यर्थ इति वाच्यं। परमेश्वरीयव्याप्तिज्ञानजन्यस्य वह्न्यादिप्रत्यक्षस्य वारकत्वेनैवा
स्य सार्थकत्वात्। यद्यपि पक्षधर्मताविषयकत्वनियतधर्मावच्छिन्नकारणत्वेत्यादेरेव सम्यक्त्वाद्व्याप्तिपदोपादानवैय
र्थ्यमित्यपि वक्तुं युज्यते। नचैवं धूमवत्पर्वतविशिष्टबुद्धावतिव्याप्तिः चरमज्ञानस्य पक्षधर्मताविषयकत्वेन विशेष
णीयत्वे वासंभवः। अनुमितिमात्रस्यैव साध्यांशे पक्षसंबंधविषयकत्वादिति वाच्यं। साध्यादिभेदेन व्याप्तेरिव पक्षादिभेदे

न पक्षधर्मतायामपि भिन्नतया धूमवत्पर्वतविषयकत्वनियतधर्मावच्छिन्नकारणताकत्वे सति धूमवत्पर्वतविषयक
त्वज्ञानत्वमित्युक्तावसंभवविरहात्। तथाप्यभावविषयकत्वपर्यवसन्नस्य व्याप्यविषयकत्वस्य चरमज्ञानविशेषणत्वे
लाघवं पक्षधर्मताविषयकत्वप्रवेशे तु गौरवमेव धूमत्वाविषयकत्वेनोक्तौ गौरवविरहेपि धूमवान्पर्वतो वह्निमानित्याका
रिकैवानुमितिरिति लिंगोपधानमतस्य प्रामाणिकत्वे सर्वत्रैवोक्तप्रकारेण संभवतीत्याशयेन पक्षधर्मतापदस्य वैयर्थ्य
मुक्तं संज्ञापदस्य कार्यतावच्छेदकत्वे साधारणधर्मदर्शनविधया हेतुमत्तानिश्चयजन्ये साध्यादिसंशये अतिव्याप्तिभिया
व्याप्तिविशिष्टपदं वैयर्थ्यमित्यपि कश्चित्। केचित्तु। यत्र साध्यस्यैव हेतुत्वं अनुमित्सया चानुमितिः तादृशस्थलीयपक्ष
धर्मतामंतर्भाव्योक्तक्रमेण लक्षणकरणस्यासंभवाद्व्याप्तिपदवैयर्थ्यं नोक्तमित्याहुः। इति तु स्यादिति। यद्यपि धूमो व
ह्निव्याप्यो द्रव्यं पर्वतवृत्तीत्यादिज्ञानस्यापि निरुक्तरूपत्वात्तदनुव्यवसायेतिव्याप्तिः। पक्षधर्मांशे व्याप्तिप्रकारकत्ववि
वक्षणे तु मिश्रोक्तदूषणपरित्यागापत्तिस्तत्राप्युक्तविवक्षासंभवात्। तथापि व्याप्यप्रकारकोयस्येति व्युत्पत्त्या व्याप्तिप्रकारकमि
त्यस्य व्याप्यवच्छिन्नप्रकारताकमित्यर्थः। तथा चतानांतकर्मधारये अन्वयितावच्छेदकावच्छेदेन विधेयतावच्छेदकावच्छिन्नान्वय
स्य व्युत्पत्तिसिद्धतया पक्षधर्मतावगाहितावच्छेदेन व्याप्यवच्छिन्नप्रकारताकत्वस्य शब्दाल्लाभान्न विवक्षाद्वैतुस्तातंत्र्येणैव
तद्विवक्षणमिति पूर्वतो वैलक्षण्यमिति भावः। अत्रापीत्यपिकारेण प्रागुक्तसकलसमासः समुच्चीयते वह्निव्याप्येंधनवानितु
क्तौ तु साध्यवदन्यावृत्तित्वरूपव्याप्तिमादाय कदाचित्तत्सिद्धिं कुर्यादतो विशिष्य निर्दिशति। इंधनसमानाधिकरणेति। अखंड

जाग. १५

व्याप्तेरिति। निरुक्तनीलघटपिततमोऽन्यं रूपवत्त्वादित्यादौ नीलतमस्समवेतत्वरूपस्य पक्षधर्मत्वस्याप्रसिद्ध्याऽव्याप्तिसंभवात्
॥ न तदनुक्तयान्यूनत्वमिति वाच्यं॥ पक्षाद्यादिपदेन तस्यापि विवक्ष्यत्वादिति भावः॥ ननु साध्ये हेतुव्यापकत्वावगाहितानिरूपितं पदे
तो साध्यसामानाधिकरण्यावगाहित्वं तद्वेव व्याप्तिप्रकारकत्वं वाच्यमतो नोक्ताव्याप्तिरित्यत आह। अत्रमानुमितेरिति। वृत्त्यनिया-
मकसंयोगादिसंबंधेन साध्यहेतुभावे एवं व्याप्तेरप्रसिद्ध्यात् तत्रत्यानुमितावव्याप्त्यसंभवाद्वृत्तिनियामकसंबंधेन साध्यत्वसा
धनत्वयोः सूचनार्थमत्रेत्युक्तं। नितरामिति। अव्याप्तिरिति पूर्वेणान्वयः। साध्ये हेतुव्यापकत्वावगाही साधने साध्यसामाना
धिकरण्यावगाही यज्ज्ञानं तस्यैव व्याप्तिप्रकारकपदेन विवक्षिततया कथंचित्पूर्वोक्ताव्याप्तिवारणेऽपि। अत्र हेतुव्यापकत्वसा
ध्यसामानाधिकरण्ययोरप्रसिद्ध्या तदुभयावगाहित्वमंतर्भाव्य व्यापिलक्षणस्य कर्तुमशक्यत्वादव्याप्तिरेवेति भावः। तावदिति।
प्रागुक्तक्रमेणान्वयव्याप्तिघटकेत्यादिः। तथाविधं अनुमित्युपयोगि यत्परस्परसंबंधावगाहित्वं विशिष्टवैशिष्ट्यविषयितावि
शेषरूपं तदेव विवक्षितं व्याप्तिप्रकारकपदेनेत्यर्थः। तेन धूमस्याधिकरणमधिकरणे वृत्तिरभाव इत्याकारकस्य तावत्पदार्थ राम॰ १५
गोचरस्य समूहालंबनस्य व्युदासः। यद्यप्यन्योन्याभावादिगर्भान्वयव्याप्तिज्ञानस्थलीयानुमितावव्याप्तिः संभवति अत्यंता
भावगर्भान्वयव्याप्तिनिविष्टवस्तूनामेव तावत्पदार्थेत्यादिना परामृष्टत्वात्। तथाप्यव्याप्तीनां मध्येऽत्यंताभावगर्भायाः सिद्धां
तोक्तव्याप्तेरेवानुमित्युपयोगित्वमनुसृत्य शंकते। न चेति। व्यतिरेकिणीति व्यतिरेकव्याप्तिज्ञानजन्यानुमिताविति अर्थः। अत्र
परामर्शस्य पक्षे साध्याभावव्यापकीभूताभावप्रतियोगित्वेन हेत्ववगाहितया अन्वयव्याप्तिप्रकारकत्वाभावादिति भावः॥

केचित्तु निरुक्तावगाहिताशून्यपरामर्शजन्यानुमिताविति अर्थः। तथा चान्योन्याभावगर्भव्याप्त्यवगाहिपरामर्शस्यापि संग्रहान्न
दोषः। अग्रे विरोधप्रदर्शने अत्यंताभावप्रदर्शनमुपलक्षणमिति वदंति। व्याप्तिद्वये व्यभिचारधीविरोधित्वं ग्राहयति। भवति हीति।
धूमत्व इति। गृहीत इत्यग्रेऽन्वितं। ननु धूमव्यापकवह्निसमानाधिकरणे रासभवान्पर्वत इति ज्ञानसत्त्वेपि धूमे व्यभिचारज्ञानानु
दयात्तस्यापि व्यभिचारधीविरोधित्वमतस्तज्जन्यानुव्यवसाये अतिव्याप्तिरत आह। तथाविधेति। वह्निव्याप्येत्यर्थः। न तथा। न पक्ष
धर्मांशे व्यभिचारधीविरोधि तथा च तद्वच्छिन्नविशेष्यकव्यभिचारधीविरोधिधीविषयकप्रकारकत्वं तद्वच्छिन्नवत्ताधीजन्यत्व
मित्यर्थः। प्रागुक्तबुद्धिस्तु न रासभत्वावच्छिन्नविशेष्यकव्यभिचारज्ञानस्याविरोधिनी धूमत्वावच्छिन्नविशेष्यकव्यभिचारधीविरोधि
त्वेपि न तस्य पक्षधर्मतयाभानं अतो न दोष इति भावः। नव्यास्तु। ननु धूमव्यापकवह्निसामानाधिकरण्यमात्रं अन्वयव्याप्तिस्त
स्याश्च न व्यभिचारधीविरोधित्वं धूमव्यापकवह्निसमानाधिकरणे रासभ इति ग्रहेपि रासभो वह्निव्यभिचारीति प्रत्ययात्तत्कथं व्य
भिचारधीविरोधिधीविषयत्वेन तदनुगम इत्यत उक्तं तथाविधेति। तथाविधं धूमव्यापकवह्निनिरूपितं धूमनिष्ठं सामानाधिक
रण्यं। न तथा। तथा व्याप्तिः रासभादौ पक्षवृत्तिरासभादौ। व्यभिचारग्रहात् अनुमित्यात्मककार्यस्यान्वयव्यभिचारग्रहात्। त
था चैतद्रूपमेव धूमव्यापकवह्निसमानाधिकरणधूमत्वपर्यंतं प्रागुक्तमिति भाव इति प्राहुः। ननु साध्यसामानाधिकरण्यस्या
पि व्यभिचारधीविरोधिधीविषयतया तत्प्रकारकस्य वह्निसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानस्य जन्ये तदनुव्यवसाया
दावतिव्याप्तिः यादृशविशिष्टविषयकत्वेन व्यभिचारज्ञानं प्रतिविरोधित्वं तत्प्रकारकत्वोक्तौ चान्वयव्याप्त्यसंग्रहः केवलं धूमव्याप

को वह्निरिति ग्रहेऽपि धूमो वह्निव्यभिचारीति ज्ञानानुदयात् धूमत्वविशिष्टे वह्निव्यभिचारग्रहं प्रति वह्नौ धूमव्यापकतानिश्चयत्वे नैव प्रतिबंधकत्वे धूमो व्याप्तिनिश्चयत्वेन पृथक् प्रतिबंधकत्वाकल्पनात्। वस्तुतस्समानाकारस्यैव ज्ञानस्य प्रतिबंधकत्वे या द्योरपि व्याप्तिव्याप्तिबुद्ध्योर्व्यभिचारधीप्रतिबंधकत्वाभावात् अनुगमासंभवः। न च व्यभिचारधीपदेनान्वयव्याप्तेर्व्यतिरेकव्याप्तेश्चाभावविषयकं ज्ञानविशेषमुपादाय तद्बुद्धिप्रतिबंधतावच्छेदकप्रकारितात्वेनान्वयव्यतिरेकव्याप्तिप्रकारितादृयमनुगमय्य तादृशप्रकारितावच्छिन्नपक्षधर्मताज्ञानजन्यत्वमर्थ इति वाच्यं। धूमो वह्निव्याप्यो नेति बुद्धावधिकरणे न धूमी पर्वतत्वादिज्ञानस्यापि विरोधितया निर्धूमधूमवान्पर्वत इत्यादिज्ञानस्यापि निरुक्तरूपतया तज्जन्यानुव्यवसायादावतिव्याप्तिः प्रतिबंधकतावच्छेदकादिभेदेन प्रतिबंधकत्वादिभेदादेवमप्यनुगमस्य कर्तुमशक्यत्वाच्चेत्यस्वरसादाह।। व्यतिरेकेति। तथा च व्यतिरेकव्याप्तिज्ञानहेतुरेव न कुत्रापि तज्जन्यानुमितावव्याप्तिरिति भावः। स्वयं व्यतिरेकपरामर्शजन्यबुद्धेरर्थापत्तित्वोपगमात्। आश्रयणादित्युक्तं आचार्यैराश्रयणादित्यर्थः। अयं स्थाणुत्ववत्त्वयं न स्थाणुः स्थाणुर्न वा इत्यादिभ्रमसंशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमानयमित्यादिविशेषदर्शनजन्ये। यं स्थाणुरित्यादिप्रत्यक्षेऽतिव्याप्तिः। व्याप्तिविशिष्टपक्षधर्मत
ज्ञानजन्यत्वस्यापि तत्र सत्वादित्याशंकते। नचेति। भ्रमसंशयेति। यद्यपि स्वमतेऽपि विशेषणज्ञानत्वेन उपनयविधया चाविशेषदर्शनस्य संशयोत्तरप्रत्यक्षे हेतुताऽहेतुतामत इत्युक्तं। न पापि प्रत्यक्षादिज्ञानस्यापि कालोपाधितया परामर्शजन्यत्वान्तद्वारणार्थमेवावश्यं किंचिद्विशेष्यकत्वावच्छिन्नप्रतियोगीभूतपर्वतादिविशेष्यकतावच्छिन्नं वा परामर्शजन्यत्वमेव लक्षणे निवेश्यं त

थाच तत्तत्प्रकारकबुद्धित्वावच्छिन्नं प्रत्येव तद्विशेषणज्ञानत्वादिना हेतुत्वात् तद्विशेषणज्ञानादिजन्यतायाः किंचिद्विशेष्यकत्वानवच्छिन्नत्वान्तमादाय दोषः। किंतु संशयोत्तरप्रत्यक्षत्वावच्छिन्नं प्रतिजन्यतामादायैव तादृशजन्यतायां धर्म्यंशे तत्सावश्यावश्यकत्वादिति भावः। विशेषदर्शनस्यैव विशेषदर्शनत्वेन हेतुता मत इत्यपि कश्चित्। यत्तु कालोपाधिविधया परामर्शजन्यतामादाय प्रत्यक्षादावतिव्याप्तिं निराकर्तुं प्रमितिविभाजकोपाध्यवच्छिन्नमेव परामर्शजन्यत्वं लक्षणे निवेश्यं नातादृशं चानविशेषणज्ञानजन्यत्वं विशिष्टबुद्धित्वेनैव तदवच्छेदादतो हेतुतामत इत्युक्तं। न च तथापि तदलौकिकप्रत्यक्षं तत्तत्प्रकारकप्रत्यक्षं प्रत्येव वा तद्विषयकज्ञानत्वेन हेतुत्वात् व्याप्त्याद्युपनयजन्यतामादाय स्वमतेऽपि संशयोत्तरप्रत्यक्षेऽतिव्याप्त्या हेतुता मत इत्यसंगतमेवेति वाच्यं। तादृशहेतुतायां मानाभावात् अप्रसिद्धसाध्यकानुमितेः साध्यविशेषणकत्ववारणाय तत्तत्प्रकारकानुभवत्वावच्छिन्नं प्रत्येव तद्विषयकज्ञानत्वेन हेतुत्वावश्यकत्वे तत एवोपनीतप्रत्यक्षसंभवादिति मतं।। तच्चिन्त्यम्। एतावतापि भावस्य स्थाणुत्वादेरलौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तद्गोचरज्ञानत्वेन हेतुतायां बाधकाभावात्तदुपनीतभानात्मके संशयोत्तरप्रत्यक्षे हेतुत्वस्य क्लृप्तत्वात् स्वमतेऽप्यतिव्याप्तिसंभवात् अभावसाध्यकानुमितेरेवाप्रसिद्धसाध्यकत्वेनाभावप्रकारकानुभवत्वावच्छिन्नं प्रत्येव तद्गोचरज्ञानत्वेन हेतुत्वस्य क्लृप्तत्वात्। अप्रसिद्धसाध्यकपरामर्शस्य साध्यविशेष्यकानुमितिं प्रत्येव हेतुत्वात्ततः साध्यविशेषणकानुमितेरसंभवाच्चेति ध्येयं। अत्र भ्रमसंशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वे मानाभावः विशिष्टबुद्धिसामान्यसामग्री तत एवं संशयाद्युत्तरप्रत्यक्षस्यापि संभवादेककोटिविशेषदर्शनस्यापरकोटिविशिष्टबुद्धिप्रतिबंधकतयैवोपयोगात्। न चैवं तदीयसं

जाग० शयोत्तरं प्रत्यक्षं प्रति तद्धीयविशेषदर्शनस्य हेतुत्वे संशयोत्तरं विशेषदर्शनोत्पत्तिदशायामपि तद्वत्तानिश्चयात्मकप्रत्यक्ष
१७ स्योत्पत्तिः स्यादिति वाच्यं इष्टत्वात्। क्षणविलंबस्य शपथनिर्णेतव्यत्वात्। न च वह्निव्याप्यधूमवत्तानिश्चयोत्तरं वह्न्यनुमितिदर्शना
त्पर्वतधर्मिकवह्निविधेयकतावच्छिन्नं प्रत्येव वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुत्वमुच्यतां लाघवात् न तु तादृशानुमितित्वा
वच्छिन्नं प्रति हेतुत्वं गौरवात् स्वीक्रियतां च तादृशविधेयताकत्वमनुमिताविव भ्रमसंशयोत्तरनिश्चयात्मकप्रत्यक्षेऽपीति तत एव
विशेषदर्शनोत्पत्तिकाले संशयोत्तरप्रत्यक्षस्य वारणं संभवतीति वाच्यं अनुमिताविव पक्षनिष्ठविशेष्यतानिरूपितसाध्यप्रकार
तानतिरिक्तस्य विधेयत्वस्य सर्वानुभवसिद्धतया निरस्यतया प्रत्यक्षे तद्विधेयकत्वस्य शंकानास्पदत्वादिति भावः। किंच भ्रमसंश
योत्तरतद्धर्मिकतद्विपरीतज्ञानत्वेनानुगमय्य तादृशज्ञानाव्यवहितोत्तरतद्धर्मिकतत्प्रकारकनिश्चयात्मकप्रत्यक्षतावच्छिन्नं प्रत्ये
वतद्धर्मिकतद्व्याप्यदर्शनस्य हेतुत्वं वाच्यं अन्यथा व्यभिचारात्। न चेदं युक्तं व्यवहितोत्तरत्वस्य स्वत्वादिगर्भत्वेनाननुगतत्वा
त्। विशिष्टबुद्धिसामान्यं प्रत्येव विपरीतनिर्णयस्य प्रतिबंधकतया बाधभ्रमसत्त्वे तद्वत्प्रत्यक्षस्य विशेषदर्शनसहस्रेणाप्यसंभ रामः
वात्। निश्चयत्वस्यार्थसमाजग्रस्तत्वेन कार्यतावच्छेदकता संभवाच्च। न च तद्धर्मिकतद्वत्तावधारणात्मकप्रत्यक्षं प्रत्येव तद्धर्मिकत १७
द्व्याप्यवत्तादर्शनस्य हेतुत्वं नियमविषयकत्वस्यावधारणत्वस्य सर्वत्र भ्रमसंशयोत्तरप्रत्यक्षेऽसंभवात् तस्याप्यर्थसमाजग्र
स्तया कार्यतानवच्छेदकत्वाच्च। विषयिताविशेषरूपस्यावधारणत्वस्य च मानाभावेन निरस्तत्वादित्याशयेन हेतुतामत इत्युक्ते
स्वरसो व्यंजितः। तथाविधनिश्चयत्वेनेति। पक्षधर्मिकव्याप्यवत्तानिश्चयत्वमात्रेणेत्यर्थः। नन्वेवं प्रामाण्यज्ञानास्कंदितत्वस्या
तत्रद

पिकारणतावच्छेदकत्वप्रवेशे तन्मात्राभिधानमयुक्तं परामर्शधर्मिकतदप्रामाण्यज्ञानाभावस्य स्वातंत्र्येणैवानुमितिहेतुत्वात्।
अन्यथा विशेष्यविशेषणभावभेदेन विनिगमनाविरहेण गुरुतरानंतकार्यकारणभावप्रसंगात्। गृह्यमाणाप्रामाण्यकस्यैक
स्य परामर्शस्योत्तरं अन्यपरामर्शात् क्षणविलंबेनैवानुमितेः स्वीकारात्तदुत्तरपरामर्शाभावविशिष्टतत्तदप्रामाण्यज्ञानत्वाव
च्छिन्नाभावत्वेनैव वा हेतुत्वस्य वक्तव्यत्वादिति भावः। केचित्तु भ्रमेत्यादि तथाविधनिश्चयत्वेनेत्यंत एक एव ग्रंथः। तेन विशेषदर्शन
स्य विशेषणज्ञानविधया कृतविजनकत्वेपि हेतुतामत इत्यस्य नासंगतिरित्याहुः। ननु निश्चयत्वेन हेतुत्वाविवक्षणेऽप्यतिव्याप्तिता
दवस्थ्यं नहि विशेषदर्शनस्यापि तद्व्याप्यवत्तानिश्चयत्वादत आह। विशेषदर्शनस्येवेति। तथा विशेषदर्शनस्य भ्रमादिविरोधित्वेनैकार
णत्वं अनुमितौ तु व्याप्यवत्तानिश्चयत्वेनापि वैलक्षण्यमिति भावः। भ्रमादीति। अन्यथा तमसि घटसंयोगोत्तरं विनापि व्याप्यदर्शनमा
लोकसंयोगमात्रेण घटनिर्णयो न स्यादिति भावः। तत्त्वं। हेतुत्वं। व्याप्यप्रकारकज्ञानं व्यावर्त्तकधर्मदर्शकव्यंजकधर्मदर्शनालोक
संयोगादिसाधारणं भ्रमादिविरोधित्वमप्येकं दुर्वचमित्यावेदयितुमुक्तं उक्तत्वादिति। वस्तुतः तदपि वचनमात्रं न तु दोषस्यज्ञा
यपीतत्वाभाववाव्याप्यदर्शनव्याहतं संभवतीति भावः। यद्यपि वह्निव्याप्यवत्तानिश्चयत्वघटकतद्वयस्य विशेषणविशेष्यभावे
न गुरुतरकार्यकारणभावद्वयकल्पनामपेक्ष्य तत्तद्धर्मकत्वघटकानुमितिं प्रति तद्विशेष्यकतद्व्याप्याभावप्रकारकज्ञानत्वे
न प्रतिबंधकतया एव लाघवेन कल्पनात् व्याप्यसंशयतोनुमित्युत्पत्तिसंभवाद्व्याप्यवत्तानिश्चयत्वेन नानुमितौ हेतुत्वं किंतु
व्याप्यप्रकारकज्ञानत्वमात्रेण तत्र च भ्रमत्वज्ञानास्कंदितत्वमेवापेक्षितं न तु तन्निश्चयानास्कंदितत्वं संशयसाधारणस्य व्याप्य

जा॰ग॰ १८ व्याज्ञानस्य क्वचिदप्यनुमित्यनुपधायकत्वात् व्याप्याभावप्रकारकत्वेन प्रतिबंधकतायामपि भ्रमत्वनिश्चयानास्कंदितत्वस्य भ्रम
त्वज्ञानानास्कंदितत्वस्य वा निवेशो भ्रमत्वनिश्चयास्कंदिताद्व्याप्याभावसंशयादप्यनुमित्यापत्तेः। यत्र च व्याप्याभावस्य भ्रमात्
संशयाद्वा अनंतरं व्याप्यपरामर्शस्तत्र भ्रमादेर्नाशोत्तरमेवानुमितिः गुरुतरं व्याप्यनिश्चयत्वेन हेतुत्वमपेक्ष्य लक्षण विलंबक
ल्पनाया न्याय्यत्वात् तथापि व्याप्यतदभावसमुच्चयात्मकपरामर्शादनुमित्युपपत्तये व्याप्याभावप्रकारकत्वानवच्छिन्नव्या
प्यप्रकारकत्वावच्छिन्नपक्षविशेष्यताकज्ञानत्वरूपं पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं गुरुतरमपि हेतुतावच्छेदकीकृतमिति।
प्रांचः। न व्यास्तु॥ व्याप्यप्रकारत्वान्यप्रकारतानवच्छिन्नपक्षनिष्ठविशेष्यताकज्ञानत्वमेव पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं
वाच्यं अतस्तादृप्येणानुमितिहेतुतायां न विनिगमनाविरहावकाशः पक्षस्साध्यव्याप्यवान्न वेत्यादिसंशयस्य व्याप्यप्रकार
तानिरूपितपक्षनिष्ठविशेष्यत्वं तदेव व्याप्यप्रकारताभिन्नेत्वव्याप्याभावप्रकारतेनावच्छिन्नमतस्तादृशसंशयान्नानुमित्यु
त्पत्तिः संशयमात्रस्यैव प्रकारताद्वयनिरूपितैकविशेष्यतावत्वात्। अत एव लीलावतीप्रकाशेपि विरोधिनानारूपावच्छिन्नवि
षयताप्रतियोगितानं संशयः समूहालंबने तु विरोधिप्रत्येकप्रकारतावच्छिन्नाविभिन्नैव विशेष्यता न तु विरोधिनानारूप
निरूपितैकेति संशयग्रंथे स्फुटमभिहितमिति प्राहुः। अत एवेति। तादृशनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वादेवेत्यर्थः। लिंग रामः १८
वत्त्वेति। लिंगं व्याप्यं आदिपदे पक्षपरिग्रहः। लक्षणपदं स्वरूपपरं। तथा च व्याप्यवत्तारूपो अतिदेशवाक्यार्थस्तस्य यज्ज्ञानं व
ह्निव्याप्यधूमवत्पर्वतसदृशं चत्वरपदवाच्यमित्याकारकं तज्जन्यायामिदं चत्वरपदवाच्यमित्याकारकोपमितावित्यर्थः। तथा

विधेति॥ तादृशो योऽतिदेशवाक्यार्थः सादृश्यं तत्प्रतिसंधानत्वेनेत्यर्थः। न तु वाक्यार्थत्वस्यापि प्रवेशो गौरवात् मानाभावाच्चेति ध्ये
यं। न चेति। वाच्यमिति परेणान्वयः। न्यायार्थेति। चिंतामणिकृन्मते तेषां वावयवजन्यविशिष्टवैशिष्ट्यबुद्धिस्वीकारात्। स्वमते तूप
नयार्थविशेष्यनिगमनार्थविशेषणप्रकारकबोधेतिप्रसंगो द्रष्टव्यः। ननु वह्निव्याप्यधूमवानयमित्युपनयार्थज्ञानं नूपन्येर्थ
र्थ प्तिविशिष्टप्रकारकं मतु बंस्य वह्निव्याप्यधूमसंबंधिन एव तत्र तादात्म्येन प्रकारत्वात् लक्षणघटकं चेत्तादृशमेव ज्ञानमतो नाति
व्याप्तिः। तथाचायमित्यादिप्रयोगे तु न सर्वसंमत इत्यत आह। तद्बुद्धेनेति। ननु यत्र सोस्तीत्यादिवाक्याद्वह्निव्याप्यधूमवत्पर्वतो
स्तीति धीस्तत्रैव कारस्य लक्षणव्याप्त्यादिघटकीभूतप्रत्येकपदार्थ एव तद्बुद्धिशक्तिज्ञानात्प्रत्येकपदार्थोपस्थित्या परस्परमन्व
यबोधो न त्वाहत्यैव तत्पदाद्वह्निव्याप्यधूमवत्पर्वतस्योपस्थितिरतो नातिव्याप्तिरित्येवं यदि ब्रूयात्तदाप्याह। संकेतितेति। यत्
त्र वह्निव्याप्यधूमवत्पर्वत एव डित्थपदस्य संकेतग्रहः प्रथमं जातः तत्र डित्थोस्तीत्यादिवाक्यजन्ये वह्निव्याप्यधूमवत्पर्वतो
स्तीत्याकारकशाब्दबोधेऽतिव्याप्तिरित्यर्थः। शांतरे निरुक्तव्युत्पत्तेरसत्वादिति भावः। ननूपनयार्थज्ञानं न न्यायार्थता
ने हेतुः तद्घटकप्रत्येकपदजन्यपदार्थस्मृतेर्महावाक्यार्थधीपर्यंतमसत्वेन अवांतरवाक्यार्थबोधस्य महावाक्यार्थबुद्धा
वहेतुत्वात्कथं तत्रातिव्याप्तिरत आह। व्युत्पादयिष्यते चेति। तद्घटकप्रत्येकपदजन्यपदार्थस्मृतेर्महावाक्यार्थबोधपर्यंत
मसत्वेपि पदजन्यपदार्थस्मृतिमात्रं नान्वयबोधे हेतुः किंतु पदप्रयोज्यं पदार्थज्ञानमात्रं तच्चावांतरवाक्यार्थबोधमादाये
वतावत्पर्यंतमस्तीति भावः। ननु तच्छब्दाद्बुद्धिस्थत्वेनैव पदार्थोपस्थितिरतः सोस्तीत्यादिवाक्यजन्यबोधे कथमतिव्याप्तिरु

जा० ग० केऽत्पत्तस्त्राह॥ तदादेस्त्वेति। उपस्थापकत्वमिति व्युत्पादयिष्यत इति पूर्वेणान्वयः। व्याप्यवत्त्वादेः संस्कारद्वयस्मरणोपि उपेक्षा
१९ न्यतद्वत्तानिश्चयत्वेन हेतुत्वस्य प्रामाणिकत्वे तत्रातिव्याप्तिवारणाय तथाविधनिश्चयत्वमात्रावच्छिन्नमेव हेतुत्वं लक्षणे प्रक्षेप
मित्याशयेनाह। तन्मातिरिक्तस्येति। पदजन्यत्वस्येति। कारणत्वादिसंबंधेन घटादिपदादुपस्थितस्यापि आकाङ्क्षादेः शाब्दबोध
स्यानुत्पत्त्यापदजन्यपदार्थोपस्थितित्वेनैव तच्छाब्दबोधं प्रति हेतुतादित्यर्थः। ननु चरमज्ञानपदस्यानुभवपरत्वेनैव स्मृ
तेर्वारणसंभवात्तथाविधनिश्चयत्वमात्रावच्छिन्नहेतुत्वलक्षणेन निवेशः किं तु तादृशनिश्चयत्वेन हेतुत्वमेवान्यथानुमिताव
पि भ्रमत्वज्ञानानास्कंदितव्याप्यवत्तानिश्चयत्वेनैव हेतुत्वादसंभवापत्तेः तत्कुतः शाब्दधीवारणमत आह निश्चयत्वस्येति॥
ननु तच्छाब्दबोधे तदर्थकपदज्ञानत्वेनैव हेतुत्वं तत्र च वृत्त्यास्वजन्यपदार्थोपस्थितेः कारणतावच्छेदकप्रत्यासत्तित्वादेवोक्ता
तिप्रसंगनिरासस्संभवे पदार्थोपस्थितिहेतुतायां न पदजन्यत्वप्रवेशो मानाभावादित्यतिव्याप्तितादवस्थ्यमत आह।
निश्चयत्वस्येत्यपि कश्चित्। स्मृतिशाब्दरूपाया एव पदार्थोपस्थितेर्व्यापारत्वात्तस्याश्च निश्चयत्वनियमाच्छाब्दबोधे प ग० म० १
दार्थस्मृतित्वेन वृत्तिज्ञानजन्यपदार्थोपस्थितित्वेनैव वा हेतुत्वं न तु निश्चयत्वेनेति नातिव्याप्तिरिति भावः। न चैतेनाव्याप्ति १९
निपरेणान्वयः। तथापि पदार्थोपस्थितिजन्यतयातिव्याप्तेर्निरासेपि। अत्र च घटवदित्यादिविशिष्टवैशिष्ट्यबुद्धौ न घटत्वादि
निश्चयत्वेन हेतुत्वं किं तु घटत्वादिप्रकारकज्ञानत्वमात्रेण यथा टम्नवेति संज्ञा योत्तरमपि तादृशबुध्युत्पादात् किं तु यत्र विशेष
णतावच्छेदकांशे धर्मितावच्छेदकतया किंचिद्भासते तत्रैव तत्प्रकारकनिश्चयत्वेन हेतुत्वं यथा नीलघटवदित्यादौ घटत्ववि

शिष्टविशेष्यकनीलनिश्चयत्वेन हेतुत्वमित्यावेदयितुं तत्रेत्यभिहितमिति ध्येयं। वस्तुतः पर्वतो वह्निव्याप्यधूमवानित्या
दिसंशयदशायां वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नप्रकारताकस्यैव तादृशविशिष्टपर्वतत्वावच्छिन्नविशेष्यताकस्यापि ज्ञान
स्यानुत्पादादुभयत्रैव पर्वतविशेष्यकवह्निव्याप्यधूमवत्तानिश्चयत्वेन हेतुत्वं जन्यतातु वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नवि
षयताकज्ञानत्वेनैव बोध्या। विशेष्यत्वप्रकारतयोर्द्वयोरपि तादृशविषयत्वात्। एवं च विशिष्टस्य वैशिष्ट्यबुद्धौ एकविशिष्टस्य
परवैशिष्ट्यबुद्धौ चोभयत्रापि विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वमित्यावेदयितुं तत्रेत्यभिहितमिति ध्येयं॥
विशेष्ये विशेषणं तत्रापि च विशेषणांतरमिति ज्ञानस्यापि विशिष्टवैशिष्ट्यज्ञानतया तत्र च विशेषणतावच्छेदकप्रकारकनि
श्चयस्य हेतुतासंभवात्तत्रेत्युक्तमित्यपि केचित्। खलेकपोतन्यायेनैव शाब्दधीरिति मते तादृशप्रत्यक्षं प्रत्येव विशेषण
तावच्छेदकप्रकारकनिर्णयस्य हेतुत्वं शाब्दादेस्तादृशविषयितायां पदार्थोपस्थित्यादेरेव नियामकत्वसंभवादिति मते वा
शाब्दादेरिति व्याप्तिरतः प्रत्यक्षे चेत्युक्तम्। ननु विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुत्वं न तु नि
श्चयत्वेन गौरवात्कुतोतिव्याप्तिरत आह। दंडे रक्तो न चेति। तादृशसंशयानुव्यवसायस्तु रक्तत्वेन दंडं संदेह्मीत्याकारको रक्त
त्वतदभावप्रकारकदंडविशेष्यकज्ञानावगाही न तु रक्तत्वविशिष्टदंडज्ञानावगाही रक्तदंडं संदेह्मीत्यनुव्यवसायस्तु रक्तदंडको
टिकस्य तादृशधर्मिकस्यैव संशयस्य न तु दंडधर्मिकरक्तत्वसंशयस्य तदीयत्वे वा विशेष्ये विशेषणमिति न्यायेनैव न्यूनैव रक्तो
दंडो न चेति संशयानंतरं अयं रक्तदंडवान्नवेत्योचित्यावर्जितः संशयो नस्यादिति वाच्यं। दृष्टत्वात्सत्वे वा तस्यापि विशेष्ये विशेष

णमित्यादि रीत्यैव न्यायेन स्वीकारात्। केचित्तु। विशिष्टवैशिष्ट्यविषयताकस्यापुक्तसंशयस्यानुभवसिद्धतया विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव तादृशबोधे हेतुत्वं न तु तादृशानिश्चयत्वेन व्यभिचारान्गौरवाच्च। न चैवं संशयसाधारणज्ञानस्याप्रामाण्यनिश्चयासस्कंदितस्यैव कार्यजनकतया तदप्रामाण्यानिश्चयत्वावच्छिन्नाभावत्वेन हेतुत्वकल्पने गौरवमिति वाच्यम्
वच्छेदकप्रकारकज्ञानस्यानुगतरूपेण तदुत्तेजकत्वस्य विरोधित्वस्य दुर्वचत्वेनाप्रामाण्यनिश्चयानां तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेन हेतुतायां गौरवान्न वकाशात् प्रत्युत विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुतायां सएव तदप्रामाण्यज्ञानमात्रस्य कार्यविरोधितया तदप्रामाण्यसंशयव्यक्तीनामप्यभावकूटस्य तत्तद्व्यक्तित्वेन विशिष्टवैशिष्ट्यधीहेतुत्वकल्पनायां विपरीतगौरवापत्तेरित्याहुः। विशिष्टेति। घटत्वादिविशिष्टो यो विषयस्तद्विषयकत्वेनेत्यर्थः। तथा च विनश्यदवस्थज्ञाने न जनितयोरिच्छाद्वेषयोर्घटितमिच्छामि घटं द्वेष्मीत्यादि विशिष्टवैशिष्ट्यप्रत्यक्षे व्यभिचारान्न ज्ञानत्वं तद्धीप्रकारणतावच्छेदके प्रविष्टमिति भावः। तेनाविनश्यदवस्थज्ञानजनितेच्छादेरिच्छात्वाद्यंशे निर्विकल्पकप्रत्यक्षस्य तज्जनकज्ञानादिच्छात्वादिप्रकारणतादृशेच्छादेर्द्वितीयसाक्षात्कारस्य च प्रागुपनीतधरादिविषयकेच्छात्वादिनिर्विकल्पकादेव संभवान्नादृशस्थले व्यभिचारासंभवेपि न क्षतिः। ननु ज्ञानस्येच्छाद्वेषोप्रतिकार्यसहभावेन हेतुत्वमते विनश्यदवस्थज्ञानेन तयोरजननात्
स्यप्रत्यक्षे व्यभिचार इत्यतः स्यज्जांतरमाह। कृतेश्वेति। न च स्मृतिसाक्षात्कार एव विशेषयोपनीतभानार्थं विषयस्मृतेरावश्यकत्वान्न व्यभिचारः सप्रकारकतद्विषयकत्वेनेच्छादिसाधारणेनैव तद्विषयकालौकिकप्रत्यक्षं प्रत्यपि हेतुत्वादिति भावः। न

नु स्मृत्यादेरुत्पत्त्यनंतरं विशिष्टविषयस्मृत्यैव क्षणविलंबेन तदुपहितस्मृत्यादेः साक्षात्कारो जायत इति यदि तूपपत्तरास्फुटव्यभिचारस्थलमाह। विशेषणेति। विशेषणांशे विशेषणांतरविषयकादित्यर्थः। विशिष्टस्मरणादित्यस्य विशिष्टवैशिष्ट्यस्मरणादित्यर्थः। पूर्वानुत्पत्तौ सत्यामपि विधया विशिष्टविषयकस्मृतेरनपेक्षायामपि विशिष्टवैशिष्ट्यबुद्धौ विशेषणज्ञानस्य हेतुत्वानुरोधान्तरपेक्षा वृत्त्यपकोति कुतो व्यभिचार इत्यत आह। विशेषणविषयकादिति। तथा च विशिष्टबुद्धावपि न विशेषणज्ञानत्वेन हेतुत्वं स्मृतौ व्यभिचारात् किंतु तद्विषयकत्वेनैव तच्च स्मृत्यादिसाधारणमतो नैतदनुरोधेन विशिष्टविषयस्मृतेरावश्यकत्वमिति भावः। समानविषयकत्वेनैव संस्कारस्मृत्योः कार्यकारणभावाद्विशेषणविषयकसंस्कारात्कुतो विशिष्टस्मृतिरित्याशंकामपनेतुं विशिष्टसंस्कारादित्युक्तम्। तत्रेति। तत्र विशिष्टवैशिष्ट्यबोधे इत्यर्थः। तथा च विशेषणतावच्छेदकीभूततत्तद्धर्माभावप्रकारकतत्तद्धर्मप्रकारकत्वेन तत्तद्धर्मप्रकारतान्यप्रकारताः निरूपितत्वेन विशेषणनिष्ठविशेष्यताकत्वेनैव वा तत्तद्विशिष्टवैशिष्ट्यबुद्धौ हेतुत्वात्तल्लक्षणे च तादृशप्रकारताकज्ञानत्वावच्छिन्नहेतुतायां एव निवेशान्नातिव्याप्तिरिति भावः। यद्यपि विशेषणतावच्छेदकप्रकारकतामात्रेण विशिष्टवैशिष्ट्यबुद्धिहेतुत्वे वह्निव्याप्यं
ज्ञानु बुद्धसंस्कारात्पर्वतेंद्रियसंयोगदशायां वह्निव्याप्यधूमवान्पर्वत इत्याकारकविशिष्टवैशिष्ट्यप्रत्यक्षापत्तिः संस्कारात्मकस्यैव सन्निकर्षस्य वह्निव्याप्यांशे सत्वाद्धूमो वह्निव्याप्यो न वेत्याकारिकायां ज्ञानलक्षणप्रत्यासत्तेः संभवाच्च। न चापाद्यतत्प्रत्यक्षव्यक्तिविशेषानुत्पत्तिः तत्तद्बोधकस्य तत्तद्व्यक्तित्वेन हेतुत्वकल्पनात्तदभावादेवतादृशप्रत्यक्षापत्त्यसंभवः तत्र

आग॰ त्प्रत्यक्षव्यक्तीनां पूर्वं स्मृतिव्यक्तीः कल्पयित्वा तत्तत्स्मृतेन तत्तदुद्बोधकव्यक्तित्वेन हेतुत्वकल्पनामपेक्ष्य तत्तत्प्रत्यक्षव्यक्तिविशेषे
२१ तदुद्बोधकव्यक्तीनां हेतुत्वकल्पनायां लाघवादिति वाच्यं। यत्र विशिष्टवैशिष्ट्यप्रत्यक्षव्यक्तीनां पूर्वं विशेषणतावच्छेदकप्रका
रिकाः स्मृतिव्यक्तयोऽनुभवसिद्धास्तत्र प्रत्यक्षव्यक्तीनां तथात्वानुमित्यात्मकविशेषणतावच्छेदकप्रकारकतानैर्जनितप्रत्यक्ष
व्यक्तीनां चापाद्यत्वात् न हि ताद्रृशप्रत्यक्षव्यक्तिष्वपि हेतुत्वं उद्बोधकव्यक्तीनां क्लृप्तं येन तदभावादेव ताद्रृशप्रत्यक्षनिरासः सं
भवति। तथापि विशेषणतावच्छेदकप्रकारकसंस्कारसत्त्वे यद्यदुद्बुद्धदशायां विशिष्टवैशिष्ट्यप्रत्यक्षं तत्तदुद्बुद्ध्यभावविशिष्टसंस्का
रत्वे विशिष्टवैशिष्ट्यबोधं प्रतिप्रतिबंधकत्वकल्पनाददोषः। नच ज्ञानत्वस्य कारतावच्छेदके प्रवेशमपेक्ष्य उक्तप्रतिबंधकत्वकल्प
नेगौरवं ज्ञानोपरमेपि विशिष्टविषयोपधानेन कल्प्यादिसाक्षात्कारोत्पत्त्या व्यभिचारेण ज्ञानत्वस्याप्रवेशानियमेन ताद्रृशप्रति
बध्यप्रतिबंधकभावकल्पनागौरवस्य प्रामाणिकत्वादित्याशयः। नन्वनुमितावपि व्याप्याभावाप्रकारकव्याप्यप्रकारकत्वमात्रे
ण हेतुत्वं लाघवात्। न तु ज्ञानत्वांतर्भावेणेत्यसंभव एवेत्यत आह। इच्छादीति इति। ननु साध्यव्याप्यवत्पक्षावगाहि इच्छाद्वेषयो
द्वितीयक्षणे प्रायशोऽनुमितित्वयापि वाच्या इच्छादिजनकस्य परामर्शात्मकज्ञानस्य पूर्वसत्वात्तृतीयंच द्वित्रिक्षणेऽनुमित्युत्
पादे निर्णेतुमशक्य इति स्फुटव्यभिचारस्यत्त्वमाह। संस्कारश्चेति। संस्कारादीत्यादिपदादिच्छाद्वेषकृतीनां परिग्रहः। ज्ञानत्वेनैव
ति। तद्दृत्तिभावेनेत्यर्थः। तत्त्वाअनुमितौ। नच परामर्शानुव्यवसायेऽपि व्याप्तिरिति। तथाविधनिश्चयत्वेन हेतुत्वस्य विवक्षितत्वा
दिति प्राञ्चः। नो हेतुरनुषंजनीयः सामान्यतो हीत्येव वाग्रेपाठः। तेन चेत्यत्र हेत्वाभोनेति ध्येयं। विषयत्वेनेति। साक्षात्कारोमोतिप्र रामः २१

तीतिः सांसर्गिकविलक्षणविषयत्वेनेत्यर्थः। तेनातीन्द्रियस्य गुरुत्वादेः सत्यपीन्द्रियसन्निकर्षे प्रत्यक्षं न तु निर्विकल्पकवि
षयत्वेनेत्यर्थः। ज्ञानादेः सविकल्पकमात्रवेद्यत्वात्तत्प्रत्यक्षे व्यभिचारापत्तेः। अन्वयकारणस्यतादात्म्यं कार्यस्य तु लौकिकविष
यत्वं प्रत्यासत्तिः। तेन अतीतविषयकप्रत्यक्षे अतीतविषयेणासहेतुत्वेन क्षतिः। ननु लौकिकविषयत्वस्यैकस्याभावात् कार्य
तावच्छेदकसंबंधाननुगमात् कथं मतः कार्यकारणभावः षोढासन्निकर्षजन्यतादेरपि सन्निकर्षभेदेन नानात्वात्। न च साक्षा
त्कारत्वनिरूपितविषयत्वमेव कार्यताघटकसंबंधस्ताद्रृशविषयतया च प्रत्यक्षं नातीतादावतो न व्यभिचार इति वाच्यं। शुक्ति
मृगतृष्णादिधर्मिकस्य तद्रजतमेवेदं तज्जलमेवेदमित्यादिप्रत्यक्षस्य दोषविशेषजन्यस्य ताद्रृशविषयतासंबंधेन अतीतरजत
जलादावपि सत्त्वेन व्यभिचारात्तत्रापि तद्रजतसाक्षात्कारामीत्यनुभवात्। नच तत्त्वता ताद्रृशविषयता भ्रमः मानाभावात्। साक्षात्
कारत्वनिरूपितविषयतायाः लौकिकसन्निकर्षस्येव दोषविशेषस्यापि जन्यतावच्छेदकत्वप्रसक्त्या वेकशेषस्य कल्पनैमशक्यत्वात्
लौकिकस्येव दोषविशेषजन्यस्यापि रजतत्वप्रकारकप्रत्यक्षस्य रजतार्थिनयनगोचरप्रवृत्तिहेतुतया पारान प्रत्यक्षनिष्ठप्रवृत्ति
जनतावच्छेदकत्वेनताद्रृशविषयतायां लौकिकसन्निकर्षजन्यदोषविशेषजन्यप्रत्यक्षविशेषसाधारणत्वाच्च। वस्तुतो विषयत्वस्य
ज्ञानसमानकालीनतया निरुक्तविषयतावच्छिन्नस्य घटादेः प्रत्यक्षप्राक्काले असत्वात्ताद्रृशविषयत्वेन हेतुत्वे व्यभिचारे वेत्य
तआह। तत्तद्विषयकेति। अत्र तत्तत्पदं विषये प्रत्यक्षे चोभयत्रान्वितं। तथा च तत्तत्तद्विषयकत्वविशिष्टतत्प्रत्यक्षव्यक्तित्वेन का
र्यत्वं तत्तद्विषयव्यक्तित्वेन हेतुत्वं तत्र च कार्यस्य विषयतामात्रं कारणस्य तु तादात्म्यं प्रत्यासत्तिः। नच तत्तद्विषयकत्वस्य कार्यता

जाग० वच्छेदके प्रवेशोऽव्यर्थः। तत्प्रत्यक्षव्यक्तेरेव विषयतासंबंधेनान्यत्रापि सत्त्वेन व्यभिचारवारकत्वादिति भावः। ननु तत्तत्परामर्श
२२ त व्यक्तिप्रत्यक्षे तत्तत्परामर्शव्यक्तित्वेन हेतुत्वे परामर्शप्रत्यक्षसामान्यं प्रत्यपि परामर्शत्वेन हेतुत्वमावश्यकं यद्विशेषयोरित्यादिव्याप्तेः।
तथा च तदनुव्यवसायेऽपि व्याप्तिरेवेत्यत आह कदाचिदिति। प्रमाणाभावात्तादृशी व्याप्तिरेव नास्ति सती वा तत्परामर्शत्वव्यापकी
भूतज्ञानत्वादिधर्मावच्छिन्नकारणत्वमादायैव चरितार्थान परामर्शत्वेन हेतुताव्यवस्थापपत्तीति भावः। यद्यपि विषयस्य हेतु
त्वे मानाभावः न च घटादिविषयस्य नाशदशायामपि तदिन्द्रियसन्निकर्षसत्त्वादुत्तरकालं तत्प्रत्यक्षापत्तिरिति वाच्यं। यदा यत्रय
त्कार्यस्योत्पत्तिः तदव्यवहितप्राक्क्षणे तत्र तत्कारणमिति व्याप्तेः कारणतासंपादकतया विषयनाशकालावच्छेदेन विषये सन्नि
कर्षात्मककारणविरहादेव तदसंभवात्। न च पदार्थवृत्तिकार्यस्योत्पादः तदव्यवहितपूर्ववृत्तिकारणमित्येव व्याप्तिः कार
णतायाहिकेति विनष्टविषयकप्रत्यक्षवारणाय विषयस्य हेतुत्वमावश्यकमिति वाच्यं॥ कार्यकारणभावान्तरकल्पने गौरवे
ण घटीयरूपे चक्षुःसंयुक्तसमवायसत्त्वे विद्यमानस्यासन्निकृष्टरूपान्तरस्य प्रत्यक्षप्रसंगेन च तादृशव्याप्तेः हेतुत्वात्। न
च शब्दप्रत्यक्षं प्रत्यवच्छिन्नकर्णावच्छिन्नशब्दत्वेन विषयस्य हेतुत्वं। अन्यथाकर्णावच्छिन्नस्यापि तस्य प्रत्यक्षापत्तेः स्वावच्छि रामः
न्नत्वप्रत्यासत्त्या कर्णस्य तत्र हेतुत्वे कर्णावच्छिन्नसंयोगादेरपि श्रावणप्रत्यक्षप्रसंगादिति वाच्यं। तावतापि ज्ञानादिसाक्षा २२
त्कारे विषयस्य हेतुत्वाप्राप्तेः। तथापि सत्य। इन्द्रियसन्निकर्षादौ सामान्यकारणे गुरुत्वात् घटेन्द्रियपदार्थानां प्रत्यक्षत
याश्चावश्यं विशेषतो हेतुत्वं वाच्यं। तद्धि रहादेव गुरुत्वादेरप्रत्यक्षत्वात्। केचित्तु। तेषामतीन्द्रियतानुरोधेन साक्षात्कारत्वे

निरूपितविषयतेन तादृशविषयता तादृशविषयतावच्छिन्नधूमशून्यत्वेन वा प्रत्यक्षसामान्यं प्रति हेतुत्वं तच्च लौकिकसन्निक
र्षजन्यतावच्छेदकतया सिद्धस्य लौकिकास्यविषयताविशेषस्य कार्यतावच्छेदकसंबंधत्वात् न व्यभिचारः धर्मविधया न संबंध
विधयापि कार्यतावच्छेदकसिद्धौ बाधकाभावात्। नव्यमते कारणतायाः अतिरिक्तपदार्थत्वेन तदवच्छेदकोपलक्षितस्यैव
पूर्वसत्त्वापेक्षणादिति वदंति। तन्न दं। कार्यतावच्छेदकत्वेन विषयतासिद्धावपसिद्धान्तात्। अन्यथा विशिष्टबुद्धौ विशे
षणज्ञानादिजन्यत्वं विशिष्टबुद्धित्वादिना वह्न्यनुमितिं प्रति च वह्निव्याप्यवत्तानिश्चयत्वेन हेतुत्वं न स्यात् लाघवाद्विषयता
विशेषस्यैव तादृशजन्यतावच्छेदकत्वौचित्यादिति दिक्। तत्रादितरत्वादिति। व्याप्यप्रकारकत्वव्याप्याभावप्रकारकेत
रत्वादिरित्यर्थः। परामर्शस्य विशेषणचतुष्टयघटितत्वात् तत्सामग्र्यप्रदर्शनार्थमेवालौकिकेत्यादिविशेषणचतुष्कमु
क्तं। घटतद्विषयकत्वेति। इदंत्वात्परस्यत्व प्रत्यक्षस्य प्रत्येकं संबंधात् तादृशघटत्वेन हेतुत्वं तद्विषयकप्रत्यक्षत्वेन च कार्यत्वमि
त्यर्थः। इष्टापत्तौ बाधकमाह। मानाभावादिति। नन्वेतादृशकार्यान्यथानुपपत्तिरेव मानं भविष्यतीत्यत आह। अन्यथेत्यादि।
मेवालौकिकतादिसामग्र्या ऽन्यप्रत्यक्षादिसामग्र्या च तादृशप्रत्यक्षस्योत्पत्तेरित्यर्थः। तथा चार्थसमाजग्रस्तत्वान्नोक्तरूप
कार्यतावच्छेदकमिति भावः। विशिष्टस्मरणइति। वह्निव्याप्यधूमवत्पर्वतस्मरण इत्यर्थः। संशयोत्तरं तदाकारकस्मृत्यापत्ति
भयेन स्मृतिजनतायामपि निश्चयत्वप्रवेशादित्याशयः। पर्वतपि वह्निव्याप्यवत्तादिसंस्कारं प्रति व्याप्यवत्तादिनिश्चयत्वेन हेतुता
तादृशसंस्कारानुत्पत्तेरेव व्याप्यवत्तादिसंशयानन्तरं तज्जोचरस्मृतेःसंभव इत्यनुभवस्य निश्चयत्वे न स्मृतिहेतुतायां मानाभा

जाग० २३ वान्नविशिष्टस्मृतौऽव्याप्तिसंभावना। तथापि फलव्यापारो प्रत्येकरूपेणैवकारस्य हेतुत्वादिति प्राचीनमते वेदं व्यापारीभू
तसंस्कारं प्रत्यनुभवस्य निश्चयत्वेन हेतुत्वे फलीभूतस्मृतिं प्रत्यपि तादृप्येण हेतुत्वमावश्यकं ॥ इदं तु चिंत्यते। धूमत्वपर्व
तत्वादिरूपेण बाष्पवृक्षादिगोचरादपि वह्निपरामर्शोत्पर्वतो वह्निमानित्यनुमित्युत्पादादनुमितिं प्रति वह्निव्याप्तिधूमत्वप
र्वतत्वादिनिरूपितेन विशिष्टवैशिष्ट्यावगाहिताविशेषेणैव हेतुत्वं न तु धूमवत्पर्वताद्यंतर्भावेण व्यभिचारात् स्मरणे तु धू
मत्वादिकमंतर्भाव्यैव तथात्वं। अन्यथा धूमत्वेन बाष्पगोचरतादृप्यानुभवात्ताद्रूप्येण धूमस्मरणे स्मृतेरगृहीतग्राहित्व
प्रसंगात्। तथा चानुमितिजनकतावच्छेदकरूपेण स्मृतावहेतुत्वात् कथं तत्राऽतिव्याप्तिप्रसक्तिरिति प्राचार्यमते त्वयं दोषः तन्मते
कारणीभूतज्ञाने धूमत्वादिनायादृशावस्तुनोभानं फलेपि तथैव तेन व्याप्यः पदं तु ज्ञानपदस्य करणव्युत्पत्त्यभिप्रायेण शंकते। अ
थेति। विशिष्टस्मरणं यस्मादिति व्युत्पत्त्या संस्कारस्यातिव्याप्तिरित्यर्थ इति तन्न संस्कारानुत्पत्त्येत्यादिग्रिमग्रंथविरोधापत्तेः
केचित्तु। यादृशस्मृतौ वह्निव्याप्यवत्त्वनिश्चयत्वेनानुगतरूपेण बोधकविधया हेतुत्वं तादृशस्मृतावित्यर्थ इत्याहुः। तच्चिंत्य रामः २३
म्। उपेक्षान्यत्वेनेत्यादिग्रंथस्य व्याप्यविषयतेत्यादिग्रंथस्य च विरोधापत्तेः। जन्यतावच्छेदकतया सिद्धस्यलौकिकारस्य
विषयताविशेषस्य कार्यतावच्छेदकसंबंधत्वान्न व्यभिचारः धर्मविधेयेव संबंधविधुपापिकार्यतावच्छेदकसिद्धो वाधूकाभावा
न्नव्यमते कारणतायाऽतिरिक्तपदार्थत्वेन तदवच्छेदकोपलक्षितस्येव पूर्वसत्त्वापेक्षणादिति वदंति। तन्न द्वंकायतावच्छे
दकत्वेन विषयत्वसिद्धावप्यसिद्धा तावत् अन्यथा विशिष्टबुद्धौ विशेषणज्ञानादिजन्यत्वं विशिष्टबुद्धित्वादिना वह्नाधनुमि

तिं प्रति वह्निव्याप्यवत्तानिश्चयत्वेन हेतुत्वं न स्यात् लाघवाद्विषयताविशेषैव तादृशजन्यतावच्छेदकत्वौचित्यादिति दिक्॥ तन्त्रदिसृ
रत्वादिरिति॥ व्याप्यप्रकारकत्वव्याप्यभावप्रकारकेतरत्वादिरित्यर्थः परामर्शत्वस्य विशेषणचतुष्टयघटितत्वात्तत्त्यप्रदर्शना
र्थमेवावलौकिकेत्यादिविशेषणचतुष्कमुक्तं घटतद्विषयकत्वेति घटात्मरस्यत प्रत्यस्य प्रत्येकंसंबंधात् दृशघटत्वेन हेतुत्वं न विष
यकप्रत्यक्षेत्वेन च कार्यतेत्यर्थः इष्टापत्तौ बाधकमाह। मानाभावादिति। नन्वेतादृशकार्यान्यथानुपपत्तिरेव मानं भविष्यतीत्यत
आह। अन्यथेत्यादि। मैत्रावलौकनादिसामग्र्या चैत्रप्रत्यक्षादिसामग्र्या च तादृशप्रत्यक्षस्योत्पत्तेरित्यर्थः। तथा चार्यसमाजग्रस्तता
लौकिकरूपं कार्यतावच्छेदकमिति भावः। विशिष्टस्मरणइति। वह्निव्याप्यधूमवत्पर्वतस्मरणइत्यर्थः संशयोत्तरं तदाकारकस्मृत्यापत्ति
भयेन स्मृतिजनकतायामपि निश्चयत्वप्रवेशादित्याशयः यद्यपि व्याप्यवत्तादिसंस्कारं प्रति व्याप्यवत्तादिनिश्चयत्वेन हेतुतान्नादृश
संस्कारानुत्पत्तेरेव व्याप्यवत्तादिसंशयानंतरं तादृशस्मृतेः संभव इत्यनुभवस्य निश्चयत्वेन स्मृतिहेतुतायां मानाभावान्नो विशिष्टस्मृ
तौऽव्याप्तिसंभावना। तथापि फलव्यापारो प्रत्येकरूपेणैव कारणस्य हेतुत्वादिति प्राचीनमते नेदं व्यापारीभूतसंस्कारं प्रतिकुनु
भवस्य निश्चयत्वेन हेतुत्वे फलीभूतस्मृतिं प्रत्यपि तादृप्येण हेतुत्वमावश्यकं इदं तु चिंत्यते धूमत्वपर्वतत्वादिरूपेण बाष्पवृक्षादि
गोचरादपि वह्निपरामर्शोत्पर्वतो वह्निमानित्यनुमित्युत्पादादनुमितिं प्रति वह्निव्याप्तिधूमत्वपर्वतत्वादिनिरूपितेन विशिष्टवैशिष्ट्या
वगाहिताविशेषेणैव हेतुत्वं न तु पर्वताद्यंतर्भावेण व्यभिचारात् स्मरणे तु धूमत्वादिकमंतर्भाव्यैव तथात्वं। अन्यथा धूमत्वेन बाष्पगो
चरादृप्यनुभवात्ताद्रूप्येण धूमस्मरणे स्मृतेरगृहीतग्राहित्वप्रसंगात् स्वयहो तथाहि तेन तस्या प्रमातापत्तिरिति भावः। अनुमिति

जाग॰ · जनकतावच्छेदकरूपेणस्मृतावहेतुत्वात्कथंतत्रातिव्याप्तिप्रसक्तिरिति॥आचार्यमतेत्वयंदोषःतन्मतेकारणीभूतज्ञानेधूमता
२४ दिनायादृशवस्तुनोभानंफलेपितथेतिनव्या॥पक्षज्ञानपदस्यकरणव्युत्पत्त्याभिप्रायेणशंकते॥अथेति॥विशिष्टस्यस्मरणंपक्षमाहे
तिव्युत्पत्त्याविशिष्टसंस्कारेअतिव्याप्तिरित्यर्थइतितत्त्व॥संस्कारानुत्पत्त्येवेत्याद्यग्रिमग्रंथविरोधापत्तेः॥केचित्तु॥यादृशस्मृतौवह्निव्या
प्यवत्त्वनिश्चयत्वेनअनुगतरूपेणउद्बोधकविधयाहेतुत्वंतादृशस्मृताविरुपर्इत्याहुः॥तन्नित्यं॥उपेक्षान्यज्ञानत्वेनेत्यादिग्रंथस्यव्या
प्तविषयकत्वेनेत्यादिग्रंथस्यचविरोधापत्तेः॥तत्रहेतुत्वमितिस्मृतौहेतुत्वमित्यर्थः॥तथाचव्याप्यवत्तानिश्चयत्वमात्रावच्छिन्नहेतुत्वस्य
लक्षणेप्रवेशान्नविशिष्टस्मरणेअतिव्याप्तिरितिभावः॥उपेक्षात्वंपर्यंकंसुवचंस्यात्तदातद्धन्यत्वंस्मृतिजनकतावच्छेदकंभवेत्तदेव
तुनसंभवतीत्याशयेनाह॥उपेक्षात्वंहीति॥संकरेति॥चाक्षुषत्वंहीविहायउपेक्षात्वंतत्रतैवाहेवाहैउपेक्षात्वंविहायचाक्षुषत्वंकामिनी
दर्शनादौवर्तमानंएकत्रतेनचाक्षुषेसंकीर्णमित्यर्थः॥चाक्षुषत्वादिव्याप्यंनानेवोपेक्षात्वंनिरुच्यतत्तत्रजेदकरमेवस्मृतिजनकताव
वच्छेदकंयदिभूयात्तदाह॥आंशिकेति॥एकस्मिन्नेवज्ञानेकिंचिदंशेउपेक्षात्वस्यकिंचिदंशेचतदभावस्यानुभवादित्यर्थः॥नचयकेरभे रामः १
दस्तुल्यत्वमित्याह॥अनुक्तत्वाद्यांशिकत्वंनजातिबाधकमितिवाच्यं॥रूपहानावसंबंधेवातदंतर्भावादितिभावः॥आंशिकत्वस्यापगमात् २४
॥तथाचनद्विजातिरव्याप्यवृत्तिरितिभावः॥इतिकेचित्॥नापिपूर्ववत्रीत्यादि॥तथाचतज्ञोचरप्रवृत्त्यजनकत्वेसतितज्ञोचरनिवृत्त्यजन
कत्वंपत्रतदन्यज्ञानत्वेनतज्ञोचरस्मृतौहेतुत्वंतज्ञोचरप्रवृत्तिनिवृत्त्युभयजनकत्वेनतत्प्रत्येकजनकत्वेनवातज्ञोचरस्मृतिहेतुत्वे
व्यभिचारादभावद्वयगर्भत्वेतिध्येयं॥अजिज्ञासितेति॥तथाचतत्प्रकारकस्मृतौतद्धर्मप्रकारकजिज्ञासाप्राग्जनकं पक्षेदन्यत्ता

नत्वेनहेतुत्वंव्याप्यधर्मस्याननुगमात्तद्धर्मव्याप्यधर्मप्रकारकजिज्ञासाजनकज्ञानत्वमप्यनुगमतस्ताद्रूप्येणस्मृतिहेतुतासंभवा
दत्रापिनिषेधद्वयगर्भतावश्यकीतिभावः॥तादृशादपीति॥प्रवृत्त्याद्यजनकादपीत्यर्थः॥नापिसंस्कारेति॥तथाचपर्वतधर्मिकव्याप्यव
त्तास्मरणंप्रतितदाकारसंस्कारजनकज्ञानत्वेनहेतुत्वान्नव्याप्यवत्तानिश्चयत्वावच्छिन्नहेतुताघटितलक्षणस्यतत्रातिव्याप्तिरितिभा
वः॥तज्जनकतावच्छेदकरूपांतरेति॥निश्चयत्वभिन्नस्यसंस्कारजनकतावच्छेदकरूपस्यापरिचयादित्यर्थः॥तथाचनिश्चयत्वमात्र
स्यतथात्वेस्मृतावपिताद्रूप्येणैवहेतुत्वफलव्यापारेप्रत्येकरूपेणकारणस्यहेतुत्वनियमादित्युक्तातिव्याप्तिस्तदवस्थेतिभावः॥
ननुतद्धर्मिकतत्प्रकारकस्मृतावेवतादृशसंस्कारेप्यनुभवस्यतदाकारसंस्कारजनकज्ञानत्वेनैकरूपेणहेतुत्वंवाच्यमतोनातिव्या
प्तिरतआह॥अन्योन्येति॥अत्रावच्छेद्यमवच्छेदकीभूतंचसंस्कारजन्यत्वंविभिन्नव्याप्तिघटितमतोऽन्योन्याश्रयः॥इतरथापुनरात्मा
श्रयोदृष्टव्यः॥रूपांतरापरिचयादिति॥स्मृतिजनतावच्छेदकरूपभिन्नस्यापरिचयादित्यर्थः॥ननुसंस्कारेस्मृतिजनकज्ञानत्वेनहे
तुत्वमन्योन्याश्रयइत्यपिकश्चित्॥ननतद्धर्मिकतत्प्रकारिकापावत्त्वोज्ञानयुक्तयत्तादृशसंस्कारमनुत्पादिकात्तत्रभेदकूरवत्त
मेउपेक्षान्यत्वंनिरुच्यतद्विशिष्टतद्धर्मिकतत्प्रकारकनिश्चयत्वेनतादृशस्मृतौतादृशसंस्कारेचहेतुत्ववामतोनातिव्याप्तिर्नवाऽन्य
न्योन्याश्रयादिरतआह॥संस्कारेति॥उपेक्षात्मकज्ञानादित्यादि॥तदप्रवेशादिति॥उपेक्षान्यत्वाप्रवेशादित्यर्थः॥नचस्मृतावविसं
स्कारेपिसमानाकारनिश्चयत्वेनैवहेतुत्वादुपेक्षात्मकनिश्चयात्संस्कारानुत्पत्तिरेवदुर्घटेतिवाच्यं॥समानाकारोपेक्षायक्तोनांत
तद्घटितत्वेनसमानाकारसंस्कारंप्रतिप्रतिबंधकत्वोपगमादुपेक्षाज्ञानोत्तरंतत्रादोसत्येवज्ञानांतरेणसंस्काराेत्पादादितिभावः॥न

जा०ग० यास्तु चाक्षुषचक्षुःसंयोगे प्रतिबध्यकद्रव्यत्वाभ्यां विभिन्नाभ्यां चाक्षुषे हेतुतया फलव्यापारौ प्रत्येकरूपेण कारणस्य हेतुत्व
२५ निश्चयमेव्यभिचारात् समानाकारज्ञानत्वेनैव स्मृतिजनकत्वं संस्कारं प्रत्येव निश्चयत्वेन हेतुतया संशयात् संस्कारानुत्पत्तेर्वा स्मरणसं
भवात् । न च विनिगमनाविरहः समानाकारकज्ञानत्वेन संस्कारहेतुत्वे संशयजन्यानामनन्तपदसंस्काराणां तन्नाशकत्वेन कारणं
तराणां च कल्पनापत्तेरेव विनिगमकत्वात् न पाच स्मृतौ नातिव्याप्तिशङ्कापि । न चात्यन्तताजनकसंदेहव्यावृत्तेन निश्चयत्वेन हेतुत्वसंभ
वेन तस्याधारणेन समानाकारज्ञानत्वेन स्मृतिहेतुत्वमन्याय्यम् । तथा सत्युपेक्षाज्ञानस्याप्यत्यन्तताजनकतया तद्व्यावर्तकत्वेनोपेक्षात्वेना
पि स्मृतिजनकतस्यावश्यकत्वापातात् । वस्तुतः समानप्रकारकज्ञानत्वेनापि स्मृतिहेतुता किं तु स्मृतिसामान्ये ज्ञानत्वमात्रेण तद्विशि
तत्प्रकारकस्मृतिं प्रति तादृशसंस्कारत्वेन हेतुत्वस्यावश्यकतया न तत एवातिप्रसंगभंगादिति । यत्तु संस्कारं प्रत्यपि समानाकारज्ञानत्वे
नैव हेतुत्वं न तु तादृशनिश्चयत्वेन गौरवात् संशयेन संस्कारोत्पादेऽपि उद्बोधकसमवधानविरहादेव न ततः स्मृत्यनुत्पादसंभवादिति
। तन्न । संशयजन्यपदसंस्कारव्यक्तीनां नाशार्थं हेत्वंतरकल्पनागौरवप्रसंगात् घटस्य पुंसः पटसंस्कारसत्त्वे तत्सदृशवस्तुविशेषदर्श रामः१
नादेव पटस्मृतिः तत्पुरुषीयपटस्मृतिसामान्यं प्रति तत्पुरुषीयतादृशवस्तुविशेषदर्शनत्वेनानुगतैकरूपेणोद्बोधकस्य हेतुत २५
या संशयजन्यसंस्कारसत्त्वे तादृशवस्तुदर्शनदशायां तत्पुरुषीयपटस्मृत्यापत्तेर्दुर्वारत्वादिति दिक् । अन्ये तु
निश्चयत्वघटकजनकपस्य विशेष्यविशेषणभावे विनिगमनाविरहेण द्वयत्तरकार्यकारणभावद्वयकल्पनापेक्षया लाघवेन तद्वि
शेष्यकतत्प्रकारकसंस्कारं प्रति तद्विशेष्यकतदभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वं तद्विशेष्यकतत्प्रकारकज्ञानत्वमात्रेण हे

तुत्वमित्युभयकल्पनमेवोचितं संशयोत्तरवर्तिनिश्चयादपि संशयानन्तरमेव संस्कारोत्पादसंभवादिति माहुः । तन्मते तत्
त्प्रकारत्वान्यप्रकारत्वानिरूपिततन्निष्ठविशेष्यताकज्ञानत्वपर्यवसितेन निश्चयत्वेन हेतुतायां निश्चयत्वघटकैकदलरूपस्ये
वासंभवात् । एतेन व्याप्यसंशयोत्तरं व्याप्यवत्त्वसंशयाकारस्मृतेः कल्पनाभिप्रायेण व्याप्यवत्तायाः स्मृतौ तन्निश्चयत्वेन न हेतुत्वं
किं तु व्याप्यवत्ताज्ञानत्वमात्रेण व्याप्याभावप्रकारकस्मृतिं प्रति व्याप्यप्रकारकव्याप्याभावप्रकारकज्ञानत्वेन हेतुतादेव व्या
प्याभावप्रकारकत्वघटितस्य व्याप्यसंशयत्वस्य स्मृतावसंभवात् । न च व्याप्याभाववत्तास्मृतिं प्रति व्याप्याभाववत्तानिश्चयत्वेनैव व्या
प्यवत्तास्मृतिं प्रत्यपि व्याप्यवत्तानिश्चयत्वेन हेतुतायां प्रमाणप्रसरेऽतद्युचितं उभयथैव संशयाकारस्मृतेर्वारणसंभवादि
ति वाच्यं । व्याप्यवत्तास्मृतौ व्याप्यवत्तानिश्चयत्वेन हेतुत्वे व्याप्याभावप्रकारकत्वस्य हेतुतावच्छेदककोटिप्रवेशे गौरवं व्याप्याभाव
वत्तास्मृतिं प्रति तु व्याप्याप्रकारकत्वघटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतुत्वे अवच्छेदकलाघवमित्यस्यैव विनिगमकत्वा
त् । तथा च व्याप्यवत्तास्मृतौ नातिप्रसंगशङ्कापि निश्चयत्वेन तत्र हेतुत्वात् इत्यपि मतं परास्तम् । प्रागुक्तदिशा निश्चयत्वस्य दलद्व
याघटितत्वात् पर्वतो वह्निव्याप्याभाववान्न वेत्यादिसंशयाद्यपि तादृशसंशयाकारस्मृत्यापत्तिभयेन व्याप्याभाववत्तास्मृतिं प्र
ति रपि व्याप्याभावाभावप्रकारकत्वघटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतुताया आवश्यकत्वेन विपरीतगौरवाच्चेति दिक्
। केचित्तु संस्कारं प्रति निश्चयत्वेन हेतुत्वे क्वाचित्पि पश्चात् अयं घट इत्यादिप्रत्यक्षानन्तरं द्विक्षणान्तरेऽयं न घट इत्याकारिकाधीः तज्जातीय
ज्ञाने घटत्वेन क्रमाज्जनितस्य घटत्वतदभावगोचरसंस्कारद्वयस्य सत्त्वादयं घटो न वेति संदेहात्मकस्मृत्यापत्तिः । न च विकोधमय

जाग० २६ कोद्योरेकदेशोद्बोधकसमवधानविरहान्न तथा स्मृत्यापत्तिरिति वाच्यं। यस्य पुंसो घटत्वतदभावयोः संस्कारसत्वे तदुभयसहचरि
वस्तुविशेषदर्शनादेव तदुभयस्मृतिः तत्पुरुषीय घटत्वतदभावस्मृतिसामान्यं प्रत्येव तत्पुरुषीयतादृशवस्तुदर्शनत्वेनानु
गतरूपेणोद्बोधकस्य हेतुत्वेन तत्पुरुषीयोद्बोधकसमवधानस्यापि संभवात्। तथा च तादृशसंशयाकारस्मृतेर्वारणाय इदं
त्वावच्छेदेन घटत्वप्रकारकस्मृतौ तदवच्छेदेन घटत्वाभाववत्तास्मृतिसामग्र्यास्तादृशधर्मिकघटत्वाभाववत्तास्मृतौ च तादृशघ
टत्ववत्तास्मृतिसामग्र्याः प्रतिबंधकत्वस्य प्रामाणिकतया स्मृतिजनकतायामिव संस्कारजनकतायामपि निश्चयत्वं न नि
वेशनीयं। अन्यथैव संशयोत्तरं तदाकारकस्मृतेर्वारकादित्याशुगानर्थितत्वां। संशयजन्यपंडसंस्कारव्यक्तीनां नाशार्थं हेत्वंत
रकल्पनामपेक्ष्य संस्कारजनकतायां निश्चयत्वप्रवेशस्यैव लाघवेनौचित्यादिति संक्षेपः। तथात्वमिति। स्मृतिहेतुत्वमित्यर्थः
।तथात्वनिश्चयत्वमात्रेण स्मृतिं प्रत्यहेतुत्वात्तत्र जनकत्वेऽतिप्रसंगः। अनुभवत्वे च जातिः न तु स्मृत्यन्यज्ञानत्वं। तेन ज्ञानत्वाप
क्षया गुरुतयानन्तस्य स्मृतिकारणतावच्छेदकत्वहानिरिति भावः। द्वितीयानुभवस्थले स्वजन्यस्मरणेनैकसंस्कारनाशेऽपि संस्का राम० २६
रांतरसत्वात्तदुत्तरस्मरणसंभवात्तदुक्तं सकृदिति। अनुभवोत्तरमननुभूतस्येत्यर्थः। न चानंतरं स्वानुभवीयानुव्यवसायस्यैव
स्वानुभवोत्तरस्य सत्वात्सकृदनुभूतत्वं वस्तुनोऽसिद्धमिति वाच्यं। स्वतः प्रामाण्यमियानुव्यवसायस्य व्यवसायोल्लिखितधर्मध
र्मिविषयकत्वास्माकं तु विषयांतरसंचारादिनानुव्यवसायानुत्पत्तिसंभवाच्चेति भावः। वस्तुतस्तु स्वविषयकस्मृत्युत्तरमननु
भूतस्येत्यर्थः। तेन समानप्रकारकत्वेनैव स्मृतिः संस्कारनाशकता तु दृष्टोऽनुभूतस्यापि एकस्मृत्या संस्कारनाशात्स्मरण

तरासंभवेन सकृत्पर्यंतानुस्मरणं व्यर्थमिति परास्तं। स्मरणोत्तरमिति। कालांतर इति शेषः। तेनैकसंस्कारेणैव क्वचित्क्रमिकस्म
रणद्वयोत्पादसंभवेऽपि न क्षतिः प्रसंगादिति। तथा चानुभवत्वेन हेतुत्वे व्यभिचारान्निश्चयत्वेनैव तथात्ववाच्यमिति स्मृत्यतिव्या
प्तिरक्तवस्यैवेति भावः। अननुस्मरणात्मकफलजनकसंस्कारनाशहेतुः। तथा सति घटः पटश्च द्रव्यमित्याकारकसंस्कारेणोद्बो
धकवशाज्जनितया घटो द्रव्यमित्याकारकस्मृत्या तन्नाशे पश्चात्पटो द्रव्यमित्याकारकस्मृतेरनुत्पत्तिप्रसंगादत आह। समानेति
तथा च घटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशं प्रति तादृशस्मृतित्वेन हेतुत्वान्नादृशस्मरणसत्वेऽपि पटधर्मिकतादृशस्मृतेरभावादे
कनोक्तसमूहालंबनसंस्कारस्य नाशः न च घटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशत्वावच्छिन्नस्य सामग्रीसत्वात्समूहालंबन इव
प्रकृतेऽपि तदवच्छिन्नस्योत्पादो दुर्वार इति वाच्यं। घटधर्मिकद्रव्यत्वसंस्कारमात्रस्यैव सामग्रीवशेन घटेवस्वत्वेतरेवावस्वत्वेतरावगाहित्व
नियमेन पदार्थांतरगोचरतादृशस्मरणात्मकविशेषसामग्रीविरहादेव घटधर्मिकद्रव्यत्वसंस्कारनाशत्वावच्छिन्नस्योत्पत्त्यसंभ
वादिति भावः। समूहालंबनस्यापि संस्कारस्याविरजक्रमेण प्रत्येकगोचरस्मृतिद्वयजनकत्वसंभवात्क्रमिकेत्युक्तं। क्रमिकद्वितीया
द्युत्पत्तेरिति तदर्थः। यद्यप्येवमपि कालरोगादिना संस्कारनाशस्थले व्यभिचार इति कालरोगाद्यजन्यसंस्कारनाशत्वेनैव स्मृतिजन्यतावा
च्या तत्र च रोगाद्यजन्यत्वं तन्नाशे दाकूदातिरिक्तं दुर्वचं तथा च तेषां विशेषणविशेष्यभावे विनिगमकाभावादनंतकार्यकारणभावधी
व्यं तत्र स्मृतिव्यक्तित्वेन तत्तत्संस्कारनाशं प्रति हेतुत्वमेव लाघवात्पुंकेमतं। सकृदनुभवस्थलेऽपि चरमस्मृतेस्तद्व्यक्तित्वेनैव त
न्नाशकतांगीकारान्न स्मरणोत्तरस्मरणप्रसंगः। तथापि रोगादिनाऽप्यव्याहतस्य संस्कारत्वव्याप्यजातिविशेषस्यैव स्मृतिनाश्यताव

आग॰ ध्वंसत्वावच्छेदकतयासिद्धत्वान्न तन्नाशव्यक्तिं प्रति तत्स्मृतिव्यक्तित्वेन हेतुता। वस्तुतः यत्पुरुषीयो यत्प्रकारकसंस्कारस्तेन रोगादि
२७ नाश्यः तत्पुरुषीयतत्प्रकारकसंस्कारनाशसामान्यं प्रत्येव तत्पुरुषीयतत्प्रकारकस्मृतित्वेन हेतुत्वे बाधकाभाव इति तत्त्वे वस्मर
णोत्तरस्मरणप्रसंग उक्त इत्यदोषः। केचित्तु रोगकालादिजन्यतत्तत्संस्कारनाशभेदकूटस्य युगपदेव विशेषणत्वं नत्वेकविशिष्टा
परभेदत्वेनैकविशिष्टापरवैशिष्ट्यप्रवेशे कार्यतावच्छेदकस्य गुरुत्वापातात् इतो अनंतकार्यकारणभावशंकेव नेत्यपि वदंति। सम
मूहालंबनादीत्यादिपदादेकधर्मिकनानाप्रकारकसंस्कारपरिग्रहः। अत्रेदमवधेयं तद्विशेष्यकतत्प्रकारकसंस्कारनाशं प्रति तो
द्व्यस्मृतेः कार्यसहभावेनैव हेतुत्वं वक्तव्यं। अन्यथा स्मरणजन्यसंस्कारव्यक्तीनां क्षणिकत्वापत्तेः नाशकीभूतस्य स्वजनक
स्मरणस्यैव सत्वात् उत्पत्त्यनंतरमेव नाशसंभवात्। न चैवमपि यत्र घटत्वप्रकारकानुभवोत्तरं युगपत् दशसंस्कारो अनुभवा
नंतरं च ततो घटत्वप्रकारेण संस्कारांतरस्मरणे तत्र द्वितीयस्य घटत्वप्रकारकसंस्कारस्य क्षणिकत्वापत्तिः द्वितीयसंस्कारकालीनस्म
रणव्यक्तेरुत्तरक्षणेपि सत्वादिति वाच्यं। उपेक्षात्मज्ञानस्यैव संस्कारजनकतया तत्र द्वितीयाद्यनुभवस्य उपेक्षात्वस्वीकारेण ततः रामः २७
संस्कारस्यैवानुत्पत्तेः प्रतियोगितया संस्कारनाशत्वावच्छिन्नं प्रति प्राक्क्षणवृत्तित्वविशिष्टस्वजनकतासंबंधेन स्मृतित्वेन हेतुत्व
मित्यपि कश्चित्। वस्तुतः संस्कारनाशं प्रति समानाकारस्मृतित्वेनैव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नशब्दानामपि नाशं प्रति सामा
नाधिकरण्यप्रत्यासत्त्या ज्ञानसुखदुःखत्वादिकं प्रत्येकरूपेणैव हेतुत्वं न तु स्वोत्तरोत्पन्नविभुविशेषगुणत्वादिना तथात्वे स्वत्वस्य तत्त
द्व्यक्तिविश्रांततया अनंतकार्यकारणभावापत्तेः। एवं च ज्ञानसुखदुःखादीनां स्वोत्तरक्षणवृत्तिविनाशकारणाय प्रतियोगितासंबंधे

न ध्वंससामान्यं प्रति स्वप्रतियोग्यधिकरणतादात्म्यसंबंधेन ध्वंसत्वेनाप्यनुगतैकरूपेण हेतुत्वं कल्प्यमतो ज्ञानसुखादीनामिव स्मृति
जन्यसंस्कारस्यापि क्षणिकत्वं स्वप्रतियोग्यधिकरणत्वसंबंधेन ध्वंसवत्तायाः संस्कारादौ द्वितीयक्षण एव संभवात्। अधिकरणत्वं
चेह कालिकसंबंधेन प्रवेश्यमतो न नित्यस्य ज्ञानेच्छादेः क्षणिकत्वप्रसंग इति मदेकपरिशीलितः पंथाः। यत्तु स्मृतिजन्यसंस्कार
नाशस्य तत्संस्कारस्मृत्यनंतरनष्टसविषयकप्रतियोगिकत्वस्य लाघवेन कल्पनात् दृष्टप्रतियोगिनः प्रथमस्मृत्यनंतरस्मृ
सत्वात् स्मृतिजन्यसंस्कारस्य क्षणिकत्वमिति। तन्तुच्छं। तथा सति सकृदनुभवजन्यसंस्कारनाशस्यापि तत्र तस्य चरमस्मृतिप्राक्
क्षीनसविषयव्यक्तिप्रतियोगिकत्वकल्पनया तद्व्यक्तिविरहादेव नैकस्मरणोत्तरं तदुत्पादसंभव इति अनुभवत्वेनापि स्मृति
हेतुतायाः दुरुच्छेदापत्तेः। केचित्तु रूपादिकं प्रति रूपादेरिव संस्कारं प्रत्यपि समानाकारसंस्कारत्वेन प्रतिबंधकत्वं धारावाहिक
स्थलेऽनेकसंस्कारव्यक्तिकल्पनामपेक्ष्य तत्कल्पने लाघवात्। एवं च न कस्यापि संस्कारस्य क्षणिकत्वं प्राक्तनसंस्कारसत्वेन स्म
रणाव्यवहितोत्तरक्षणे संस्कारानुत्पादात् तन्नाशोत्तरमुत्पन्नस्य च संस्कारस्य न तदानीं नाशकविरहादेव क्षणिकतासंभवात्। अत्र
यत्रैकस्मरणानंतरस्मरणांतरप्राक्तनसंस्कारनाशे पश्चाच्च प्रथमस्मरणेन संस्कारोत्पादस्तत्र तत्संस्कारस्य क्षणिकत्वं दुर्वारमि
ति वाच्यं संस्कारस्य कार्यसहवर्तित्वेन स्मृतिहेतुत्वादेकस्मृतिद्वितीयक्षणे समानाकारस्मृत्यंतरासंभवादित्याहुः। तन्मंदं। यत्र घट
पटावित्याकारकसंस्कारोत्तरं क्रमेण सकृदनुभूतस्य घटस्य पटस्य च प्रत्येकं स्मरणं तत्र पुनः कदाचिद् घटस्मरणानुत्पत्तिप्रसंगात्
क्रमिकस्मरणद्वयासमूहालंबनसंस्कारनाशादशायामेव घटस्मरणस्यापि नाशात्तेन पुनर्घटसंस्कारजननासंभवादिति दिक्। अनु

जा॰ग॰ २८ स्मृतेः संस्कारजनकतासत्त्वएवतदाशस्मृतिजनकत्वं वाच्यं तदेवासिद्धं संस्कारं प्रत्यपि अनुभवत्वेन हेतुतादतआह॥ जायते
चेति। तथा च संस्कारं प्रत्यनुभवत्वेन हेतुत्वे दृढतरसंस्कारं प्रति पुनःपुनःस्मरणत्वेन हेतुता न स्यात् सामान्यसामग्रीविरहा
दतः संस्कारं प्रत्यपि निश्चयत्वमात्रेण हेतुत्वमिति भावः॥ ग्रंथे चस्तु समानाकारकस्मृतित्वेन संस्कारनाशं हेतुतामतेपि अनंता
त्मगोचरसंस्कारनाशानुरोधात् पुरुषभेदेन कार्यकारणभावानंत्यमावश्यकमेव। तथा च तत्तदात्मीयसंस्कारसामान्यनाशं प्र
त्येव तत्तदात्मीयचरमस्मृतिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वमुक्तं अंतरानंतसंस्कारध्वंसकल्पनायां गौरवादवश्यं कल्प्यलाघवाच्च।
सकलसंस्काराणां चरमस्मृतिपर्यंतस्थायित्वे पुद्बोधकविरहेणैव मध्ये स्मरणासंभवात्। तथा च सकृदनुभूतस्यापि स्मरणेन
संस्मरणसंभवात् अनुभवत्वेन स्मृतिहेतुतायां बाधकाभाव इत्यत उक्तं जायते चेत्याद्याहुः॥ तच्चिंत्यं। तावतास्मृतेः संस्कारज
नकत्वसिद्धावपि स्मृतिजनकत्वात्प्रमेः यत्र स्वसदृशपदार्थज्ञानतादिना अनुगतरूपेण वा बोधकस्य स्मृतिहेतुत्वं तत्रानंतरस्म
रणधाराप्रसंगाच्च। तथास्तु। ननु स्मृतौ समानाकारज्ञानत्वेन हेतुत्वे सकृदनुभवस्य स्मृतिजन्यानेकसंस्कारकल्पनागौर रा॰म॰ २८
वापत्तेः किंतु तादृशानुभवत्वेनैव तथात्वं। न च संस्कारस्य फलनाश्यत्वे तथा सकृदनुभूतस्य स्मरणद्वयानुपपत्तिः चरमफलमात्र
वृत्तिना स्मृतित्वव्याप्यजातिविशेषेणैव संस्कारनाशहेतुतात्वित्यत आह॥ जायते चेत्याद्याहुः। तथा च दृढतरसंस्कारलक्षणकार्यप्र
योजकतया सकृदनुभवस्यैव पुनःपुनःस्मरणस्य प्रामाणिकतया न तत्कल्पनागौरवं किंतु संस्कारनाशकतावच्छेदकतया च
रमस्मृतिनिष्ठजातिकल्पनायामेवेति भाव इत्याहुः॥ ननु दृढतरत्वं संस्कारगतजातिः मानाभावात् किंतु उक्तरीत्युद्बोध

कसंपत्तिः सा च न कारणनियम्या तस्याः कार्यतानवच्छेदकत्वे तत्प्रयोजकत्वाभावात् कुतो अनुभवत्वेन संस्कारहेतुता परित्याग इत्यत
आह॥ परित्यज्य चेति। तथा च विनाप्यनुभवं स्मृतेरनंतरं संस्कारस्य संभाव्यतया अनुभवत्वं संदिग्धव्यभिचारकमतो व्यभिचा
रधिया प्रतिबंधात्तद्रूपेण हेतुत्वं कल्प्यते। किंतु निश्चिताव्यभिचारकेण ज्ञानत्वेनैव ज्ञानं विना संस्कारस्य केनाप्यनंगीकारादि
ति भावः॥ अपानुभवत्वं विशेषधर्मं परित्यज्य तद्व्यापकेन निश्चयत्वेन स्मृतिहेतुत्वोपगमे घटादिकं प्रत्यपि दंडत्वादिकं परित्यज्य द्र
व्यत्वादिना हेतुता स्यादत आह॥ इदमेव चेति। गृहीतमात्रव्यभिचारकेण कारणत्वकल्पनानुरूपत्वेनेत्यर्थः। अन्यथा विशिष्टबुद्ध्या
दौ तथा विपुन्न विशिष्टबुद्धौ विशेषणज्ञानत्वादिविशेषरूपेण हेतुतायां व्यभिचारग्रहः। तच्चैव विशेषणादिविषयकत्वादि सामा
न्यधर्मेण हेतुत्वं घटादौ तु दंडत्वद्रव्यत्वाद्योर्द्वयोरपि निश्चिताव्यभिचारकत्वात् दंडत्वादिविशेषणधर्मेणैव न द्रव्यत्वेन तु तद्व्याप
कद्रव्यत्वादिना तद्रूपेण हेतुतायामन्यथासिद्धेरिति भावः॥ कार्यतावच्छेदकत्वं विशेषरूपस्यैव युक्तं न तु सामान्यस्य संदिग्धव्यभि
चारकत्वात्। अत एव विशेषणज्ञानजन्यत्वं विशिष्टानुभवत्वेनैव न तु तादृशज्ञानत्वेन इति प्राच्येरुक्तमित्याशयेनाह॥ हेतुतावच्छेदकत्व इति। अ
नुस्मृतेः संस्कारजनकत्वे अपसिद्धांत इत्यत आह॥ अभिहितं चेति। स्वकार्यसंस्कारे विरोधिनाशकोयासामित्यर्थः। तथा च कार्यवेगेऽन
वाकार्यधीः संभवः तत् घटकमत्येकपदार्थस्मृतीनां नानावेलाजन्यसत्ता दिति टीकार्थः॥ साक्षात्काजन्यत्वं व्यापारमहारी कल्पपरामर्शज
न्यत्वं। ननु स्वाव्यवहितोत्तरजपरामर्शोत्पत्तिकत्वेन तेन बाधादिस्थलीयपरामर्शात्तृतीयक्षणे जातानुमितौ नाव्याप्तिः। ननु स्वाव्यवहितप्राक्क
लवृत्तिपरामर्शजन्यत्वं तदर्थः स्मृतिविशेषेतिव्याप्तितादवस्थ्यादिति। वस्तुविशेषस्मृतिं प्रतिसाध्यव्याप्यवत्तानिश्चयत्वप्रकारेणानुग

तद्रूपेण उद्बोधकस्य हेतुत्वसंभवेन स्मृतावतिव्याप्तिः पूर्वकल्पापेक्षया गौरवं चेत्यस्वरसः केचिदित्युक्त्या सूचितः ननु वह्निव्याप्यादिविशि
ष्टवैशिष्ट्यबुद्धौ वह्निव्याप्यादिप्रकारकनिश्चयत्वेनैव हेतुत्वं न तु ज्ञानत्वमनंतर्भाव्य विशेषणं धीत्वेनुद्बुद्धसंस्कारसत्वेपि विशिष्टवैशि
ष्ट्यप्रत्यक्षापत्तेः नत्वे विशिष्टवैशिष्ट्यप्रत्यक्षं प्रति नत्व विशेषणादिज्ञानाव्यक्तीनां विशिष्य कारणत्वस्य प्रतिबंधकत्वस्य वा कल्पनायां
गौरवात् न च स्मृत्यादिस्थले व्यभिचारः अग्रे निरस्यत्वात् तथा च वह्निव्याप्यधूमवत्पर्वत वानित्याकारकप्रत्यक्षे तिव्याप्तिरतस्त
द्धारणं धर्मिप्रकारं तदनुसरणे ततोपि स्मृत्यतिव्याप्तिनिरासः संभवतीत्याशयेनाह किं चेति न पाचान्वयव्यभिचारान्नो तद्रूपेण
तत्र हेतुत्वमिति भावः ननु जन्यतापि तदुभयवैशिष्ट्यावगाहिस्मृतित्वेनैव वाच्या तथा च कार्यतावच्छेदकावच्छिन्नस्योत्पादान्नोक्तदोष
इत्यत आह अन्यथेति नियमेन नियमतः अनियमेन विषतो नियामकाभावेनेत्यपि कश्चित् प्रसंगादिति एकधर्मिकस्मृतिसा
मग्र्याः अपरधर्मिकस्मृतिसामग्रीत्वादिति भावः ननु तद्विशेष्यकतत्प्रकारकस्मृतौ तादृशनिश्चयत्वेन हेतुत्वं मयापि वाच्यमेवमतः
स्मरणस्य तदुभयविशेष्यकत्वपरं तु उभयवैशिष्ट्यावगाहिनिश्चयत्वेनापि हेतुत्वं यद्विशेषयोरिति न्यायादेव वक्तव्यमतः स्मृत्यति
व्याप्तितादवस्थ्यमेवेत्यत आह समानेति तथा च तत्प्रकारकस्मृतिसामान्यं प्रति तत्प्रकारकज्ञानत्वेनैव हेतुतापेयं यद्विशेषयोरिति न्या
यस्य सामंजस्यान्न तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनापि हेतुत्वं गौरवादिति भावः तत्र ज्ञानस्मरयोः विशेष्येति तद्विशेष्यकतत्प्र
कारकज्ञानत्वादिनैवेत्यर्थः एवं चेति व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वे नानाविधव्याप्तेरनुमि
त्युपयोगित्वमतेनाह व्यभिचारेति हेतुतामत इत्यनेन प्रागुक्तदोषः सूचितः निरस्तमिति नातिप्रसंगः क्वापीत्यनुषज्यते न चैवं व्य

भिचारविरोधात्यादिरूपेणैव अत एवेति व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वादिना जनकत्वस्य लक्षणे प्रवेशादेवेत्यर्थः ज्ञानत्वेन
निश्चयत्वेन हेतुत्वेपीत्यपिना स्वरसः सूचितः स च व्याप्यवत्तावृत्तित्वे योग्यानुपलब्धिविरहात्तदवच्छिन्नाभावस्यातींद्रियतयानतत्
त्र प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं हेतुः अभावलौकिकप्रत्यक्षं प्रत्येव तस्य हेतुत्वादित्याद्यधिकं सामान्यलक्षणायां
वक्ष्यते ननु व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वं तदुभयनिरूपितसांसर्गिकविषयताकनिश्चयत्वं तथा च तादृशेण हेतु
त्वे वह्निव्याप्यधूमे पर्वत इति ज्ञानादप्यनुमित्यापत्तिः पक्षे साध्यव्याप्याधारतावगाहित्वस्यावच्छेदककोटिप्रवेशे तु पर्वते वह्नि
व्याप्यो धूम इत्यादिलिंगधर्मिकपरामर्शस्यासंग्रहः तत्र व्याप्यांशे पक्षाधेयत्वस्यैवाभानात् किं च पक्षधर्मिकव्याप्याभावप्रका
रकान्यत्वस्य हि व्याप्यविशेष्यकपक्षाभावप्रकारकान्यव्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानत्वमेव निश्चयत्वं वाच्यं तथा च तस्यापि
विशेषणविशेष्यभावभेदान्नानाकार्यकारणभावापत्तिः अतो व्याप्यवत्पक्षनिश्चयत्वेन आधेयतया पक्षप्रकारकव्याप्यधर्मिकनि
श्चयत्वे अन्यथा यथानुभवमनुमितिहेतुत्वं वाच्यमतस्तादृशस्मृतावतिव्याप्तितादवस्थ्यमेवेत्यत आह व्याप्तिविषयकत्वेनेति न व्याप्तेः
व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वे वह्न्याद्याप्यभाववति व्याप्तिः अनुमित्यादिविवक्षापत्तेश्च पराम
र्शस्यैकरूपेण हेतुत्वादत उक्तं व्याप्तिविषयकेति तथा चापत्तेः साक्षात्कारितया परामर्शोपनीतव्याप्तेस्तद्विषयतानियमान्नाति
व्याप्तिरित्याहुः तन्मन्दं पक्षधर्मतांशे गृहीताप्रामाण्यकत्वस्याहार्यत्वस्य बाधिकस्यापत्तिजनकतावच्छेदकत्वात् अन्यथा स्था
णुत्वाद्यभावभ्रमोत्तरस्थाणुत्वादिप्रत्यक्षस्थलेपि व्याप्यदर्शनवशेन स्थाणुत्वादेरापत्तिप्रसंगादिति ध्येयं एतेन व्याप्तिविषय

जाग० ३० कत्वेन। प्रागुक्तमिति पूरणेनान्वयः। विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वव्यवस्थापितेन विशिष्टवैशिष्ट्यबुद्धेरपि विशिष्टबुद्धित्व
तद्धर्मपेक्षितस्य विशेषणज्ञानस्येव विशेषणतावच्छेदकप्रकारकत्वसंभवात्। विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदक
प्रकारकज्ञानस्य व्यभिचारेण न स्यादित्याशयेनोक्तं विशेषणधियेति। हेतुत्वस्येति कल्पनादिति पूरणेनान्वयः। ननु संबंधद्व
येनैव हेतुत्वे प्रत्येकं व्यभिचारात् विशिष्टज्ञानत्वावच्छिन्नं प्रत्यनुगतहेतुत्वासंभव इत्यत आह। निर्विकल्पकात्मकस्य वास्म
रणस्येति। विशेषणप्रकारकस्य वा स्मरणस्येत्यर्थः। तेन व्याप्यवत्तादिस्मरणस्य सविकल्पकत्वेपि न क्षतिः। कल्पनादिति यो
जना। तथा च साक्षात्संबंधेनैव सर्वत्र हेतुत्वं न तु संबंधद्वयेनैवेति भावः। ननु विशिष्टबुद्धित्वं स्मरणस्थले संदिग्धव्यभिचार
कत्वान्न विशेषणधीजन्यतावच्छेदकं। किंच समानप्रकारकत्वेन ज्ञानस्मृत्योः कार्यकारणभावस्य कॢप्तत्वान्निर्विकल्पस्मरणस्या
संभवोपीत्यत आह। नियमत इति। नियमतः कारणत्वं तदंगीकृत्येत्यर्थः। तथा च ल्यब्लोपे पंचमी। तेन यत्रापेक्षाबुद्ध्या जनिता
यत्र वा प्रथमं निर्विकल्पतो विषयोपरक्तमुपादानप्रत्यक्षं पश्चात्कृतिस्तत्र कृतिसाक्षात्कारपूर्वं विषयस्मृत्यकल्पनेपि नासं
गतिरित्यपेयं। न चोक्तप्रमाणस्य व्यभिचारवारणेपि ज्ञानत्वमंतर्भाव्य हेतुत्वे मानाभाव इति वाच्यं। विशेषणगोचरानुभवसंस्का राम० ३०
रदशायां विशिष्टप्रत्यक्षानुत्पत्त्यर्थं तन्निवेशस्यावश्यकत्वादिति भावः। नव्यास्तु। यागादिव्यापारतया सिद्धस्यैवापूर्वस्ये
वानुभवव्यापारतया सिद्धस्य संस्कारस्यापि सविषयकत्वे मानाभावात् विशेषणविषयकत्वेनैव विशिष्टबुद्धौ हेतुत्वं संस्का
रद्वारा समानाकारनिश्चयत्वेनैव स्मृतिहेतुत्वेप्यतिप्रसंगाभावात्। न च संस्कारस्य निर्विषयकत्वे घटपटावित्यनुभव

स्य पटांशे एवोपेक्षात्वं तत्र तादृशवस्तुदर्शनादेव घटज्ञानस्य घटस्मृत्युपधायकत्वजन्यसंस्कारसंबंधेन सत्त्वात् घटस्येव पट
स्यापि स्मरणापत्तिः यस्य पुंसः पटानुभवोत्तरं तत्सदृशवस्तुदर्शनादेव पटस्मृतिः न तु रूपीयपटस्मृतिस्सामान्यं प्रत्येव तद्
यतादृशवस्तुदर्शनत्वेनानुगतरूपेणोद्बोधकस्य हेतुतया तत्तत्सदृशानामुद्बोधकविरहात्स्यापि वक्तुमशक्यत्वादिति वाच्यं।
स्वजन्यसंस्कारद्वारा तद्धर्मिकतत्प्रकारकोपेक्षान्यतादृशनिश्चयत्वेन तादृशस्मृतिं प्रति हेतुत्वात्। उक्तस्थले च पटोपेक्षान्य
त्वविशिष्टस्य पटधर्मिकपटत्वप्रकारकज्ञानस्य स्वजन्यसंस्कारद्वाराविरहादेव पटस्मृत्यापत्त्यसंभवात्। तत्पापि संस्कारजनक
तायामपि उपेक्षान्यत्वस्य निवेशनीयतया गौरवानवकाशात्। स्वजन्योपेक्षास्य जन्य एव पटत्वप्रकारकसंस्कारस्य दुर्वारतापत्तेः।
यत्तु स्वध्वंसद्वारैवानुभवस्य स्मृतिहेतुत्वसंभवादतिरिक्तसंस्कार एव नास्ति कस्य सविषयकत्वचिंतेति तत्तुच्छम्। यस्य
पुंसः पटानुभवोत्तरं क्रमिकचतुःपंचप्रत्यक्षानुत्पत्त्यव्यवहितकाल एव दशदिनेषु पटस्य स्मरणमनुपेक्षात्मकानुत्पन्नानि
तस्य तद्दिन एव स्मरणोत्तरमपि पटस्य पुनःस्मरणप्रसंगात्स्वध्वंसद्वारानुभवस्य सत्त्वात् तच्च त्वदृशस्मरणेषु उद्बोधकद
शकस्य विशेषतो हेतुत्वकल्पनया तत्र त्वस्मृत्यनुत्पादनमपेक्ष्य संस्कारस्य स्मृतिहेतुत्वकल्पनयैव तन्नसंपादने लाघवा
त्संस्कारस्य फलनाश्यतया प्रथमस्मरणेन तन्नाशादेवास्मन्मते पुनःस्मरणासंभवात्। न च तन्मते स्मरणपूर्वक्षण एव तन्नाशात्
स्मरणस्यादप्रसंगेन संस्कारहेतुत्ववादिनापि तत्तदुद्बोधकस्य विशेषतो हेतुत्वं वक्तव्यमिति सांप्रतं। प्रत्यक्षादिसामग्र्याः प्र
तिबंधकत्वादेव तत्तत्स्मृत्यापरस्मरणसंभवादिति प्राहुः। केचित्तु स्मृतिनाश्यतावच्छेदकतयैव संस्कारस्य सविषयक

त्वसिद्धिः तद्धर्मिकतत्प्रकारकसंस्कारनाशं प्रत्येव तादृशस्मृतित्वेन हेतुत्वात् स्मृतित्वेन सामान्यतः संस्कारनाशं प्रतिहेतुत्वे
घटस्मरणेनैव निखिलसंस्कारनाशात् अनुभवान्तरं विनोत्तरकालीनपटादिस्मरणानुपपत्तेः। नहि तत्र घटस्मृतिरेव स्वजन्यसं
स्कारद्वारा पटादिस्मृतिं जनयितुमीष्टे भिन्नविषयकत्वात्। न वा पटादिधीरेव तत्र संस्कारद्वारा संभवति तज्जन्यसंस्कारस्यापि
घटस्मृत्यैव नाशात्। न च तद्धर्मिकत्वाद्यपेक्षया लाघवेन तद्धर्मिकतत्प्रकारकस्मृतिनाश्यतावच्छेदकं संस्कारनिष्ठं वैजात्य
मेव कल्पयितुं युक्तं घटत्वप्रकारकस्मृतिनाश्यतावच्छेदकजातेर्घटपटोभयानुभवजन्ये तदुभयस्मृतिनाश्य संस्कारे पटत्व
प्रकारकस्मृतिनाश्यतावच्छेदकजात्या संस्कात्। न च तदुभयगोचरस्मृतिनाश्यतावच्छेदकं वैजात्यान्तरं प्रत्येकस्मृतिप्रयो
ज्यजातिविरुद्धमेव स्वीकार्यमिति वाच्यं। तथा सत्यनन्तजातितदाश्रयकल्पनमनन्तनाश्यनाशकभावकल्पनं चापेक्ष्य संस्कार
स्य सविषयत्वकल्पनाया एव लाघवेनौचित्यादित्याहुः। ननु तत्पक्षकहेतुसाध्यकानुमितित्वं विशिष्यैव लक्ष्यतावच्छेदकं वाच्य
मतस्त्वाह। हेत्वादीति। सामग्रीवशादिति। पर्वतो वह्निव्याप्यधूमोऽयं पर्वतश्च वह्निमानित्याकारकानुमित्यव्याप्तिरिति भा
वः। ज्ञानवृत्तिज्ञानसमवेतं। तेन साक्षात्कारत्वादेः कालिकादिसंबंधेन तादृशज्ञानवृत्तित्वेपि प्रत्यक्षादौ नातिव्याप्तिः। अनुभव
त्वव्याप्येति। अनुभवत्वाव्यापकेत्यर्थः। तेनानुभवत्वस्याप्रसिद्ध्या व्याप्यतानिरूपकत्वप्रत्यक्षादौ नातिप्रसंगः। व्याप्यत्वं भेदगर्भमित्य
पि कश्चित्। यत्किंचिदनुभववृत्तित्वे नापि जातेर्विशेषणमुपलक्षणमित्यन्ये। जातिपदं समवाये न हेतुताघटकाभावाद्यनादातः स्मरणादौ व्यभि
चारः। अनुभवत्वजातेरसत्त्वपक्षे स्मृत्यन्यज्ञानत्वमेवानुभवत्वमिति। तद्व्याप्यं तादृशज्ञानत्वमादायातिव्याप्तिस्या हृतो जाति

पदम्। स्वंड धर्मार्थकमित्यपि वदंति। अथानुभवत्वव्याप्यजातेर्निवेशे मूलेनोक्तं वरमज्ञानपदं व्यर्थं स्यादावर्तकत्वादत आह। एतदिति त
था च स्वातंत्र्येण ज्ञानपदार्थप्रवेशाद् इति भावः। पृथगनन्वयव्याप्तित्वादिना लक्षितिः ना व्याप्तिः। अनुमितित्वमादायैव सर्वत्र लक्ष
णसत्वादिति भावः। अनुभवत्वव्याप्यत्वमनिवेश्य मूलस्थजन्यपदस्य जन्यतावच्छेदकविशिष्टपरतया तद्वनुसारेण पुनः लक्षणमा
ह। पर्वतवह्निव्याप्येति। अत्रावच्छेदकत्वस्य व्यासज्यवृत्तितमते कार्यतावच्छेदकत्वं तत्कोटिनिविष्टतामात्रेणावाच्यं। जन्यपदं अनुमि
तित्वस्यापि तादृशकार्यतावच्छेदकत्वपर्याप्त्यनधिकरणत्वासंभवापत्तेः। तथा च वह्न्यनुमितित्वेन जन्यतायां वह्नित्वस्यापि प्रवेशा
त् हृदादिप वह्न्यादावतिव्याप्तिरत उक्तं ज्ञानवृत्तिरिति ज्ञानसमवेतेति तदर्थः। तेन वह्नित्वादेरपि कालिकादिसंबंधेन ज्ञानवृत्तित्वेपि नो
क्तदोषः। वरमज्ञानपदस्यैतदर्थाभावार्थमेव मणिकृतोक्तत्वादिति भावः। न च तादृशजातिमत्ज्ञानत्वमेव वक्तुमुचितं ज्ञानवृत्तित्वप्र
वेशो प्रवेशे गौरवादिति वाच्यं। तादृशजातिमत्ज्ञानत्वं हि तादृशजातिविशिष्टज्ञानत्वं। तथा च तस्य लक्षणत्वे सामानाधिकरण्या
त्मकवैशिष्ट्यस्य हेतुतावच्छेदकविधया ज्ञानत्वे तस्य च प्रवेशो विपरीतमेव गौरवं स्यादिति भावः। ननु धूमपरामर्शविशिष्टानुमि
तित्वेन तादृशपरामर्शनाशकानुमितित्वेन वा तादृशपरामर्शजन्यत्वे तादृशपरामर्शघटकतया ज्ञानत्वस्यापि प्रवेशात्तदाय
ज्ञानमात्रेऽतिव्याप्तिरत आह। सामानाधिकरण्येन वृत्ति विशेष्यविधया वा वच्छेदिकेत्यर्थः। तेन ज्ञानत्वस्यापि तादृशजन्यतायाः
सामानाधिकरण्येपि नोक्तदोषः। वस्तुतस्तु कार्यतावच्छेदकत्वस्य व्यासज्यवृत्तित्वेन सिद्धान्तः। अन्यथा कुत्रापि कार्यतावच्छेदक
धर्मस्य विशेष्यविशेषणभावभेदात् नानात्वप्रसंजनशास्त्ररूतं विरुध्येत। तथा च वह्न्यनुमितित्वेन जन्यतायामनुमितित्वमेव

जा॰ ग॰ ३२ जन्यतावच्छेदकं वह्नित्वादिकं तु तादृशजन्यतायाः अवच्छेदकतायामवच्छेदकसत्तो नोक्तक्रमेण ज्ञानवृत्त्यादिपदस्य व्यावृत्तिरुचि
ता किंतु वह्नित्वावच्छिन्नविधेयताकानुमितित्वस्यैव विनिगमनाविरहात् तादृशावच्छिन्नविधेयताकत्वसंबंधेनानुमितिवृत्तिवह्नित्वस्यापि परा
मर्शजन्यतावच्छेदकत्वात् तादृशवह्नित्वादिकमादाय वह्न्याद्यवृत्तिव्याप्तेर्वारणार्थमेव ज्ञानवृत्तिपदं। समवायसंसर्गेणैव जन्यताव
च्छेदकत्वस्य विवक्षया वह्नित्वादेर्वारणसंभवाज्ज्ञानवृत्तित्वप्रवेशे गौरवमित्याशयादेकत्वसामानाधिकरण्येन वेति कल्पांतरमुक्त
मिति प्रकृतमनुसरामः। यद्यपि पर्वतो वह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वावच्छिन्नं प्रत्येव आपादकादृशविशिष्टवैशि
ष्ट्यावगाहिनिश्चयत्वेन हेतुत्वे पर्वतधर्मिकवह्न्यनुमितित्वादेः कार्यतावच्छेदककोटिप्रविष्टत्वादनुमितिमात्र एवोक्तलक्षणस्याभा
वः तथापि तत्तत्प्रामाण्यज्ञानानास्कंदिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेनैव अनुमितिहेतुत्वं वाच्यं। अन्यथा भ्रमत्वेन गृ
हीतप्रामाण्याद् अपि परामर्शादनुमितिप्रसंगात्। न च परामर्शधर्मिकतत्तत्प्रामाण्यज्ञानाभावस्यापि स्वातंत्र्येणैव अनुमितिहेतुत्वमिति नोक्तदो
षः तथासति गृहीताप्रामाण्यकस्यैव परामर्शस्योत्तरं परामर्शांतरेणेतादृशानुमित्यनुत्पत्त्यापत्तेः। एवं च पर्वतो वह्निव्याप्योभयवैशिष्ट्या
वगाहिनिश्चयोत्तरज्ञानत्वमाचस्य तादृशनिश्चयजन्यतावच्छेदकत्वे गृहीताप्रामाण्यकात् पर्वतो वह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्च स॰ म॰ ३२
यादनंतरं स्वसामग्रीबलाज्जायमानायां पर्वते द्रव्यत्वस्य चरत्वे वह्नेर्वह्निमत्पर्वतत्व एव वा द्रव्यत्वादेरनुमितौ पर्वते वह्निविधेयकान्वपव
द्वे धूमेन पर्वते वह्निरापत्तेर्व्यभिचारः स्यादित्यतः पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरपर्वतधर्मिकवह्निविधेयकानु
मितित्वावच्छिन्नं प्रत्येव तत्तत्प्रामाण्यज्ञानानास्कंदितपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं वाच्यमित्यनुमिति

त्वस्यापि कार्यतावच्छेदके अनुप्रवेशासंभवान्न तत्तद्प्रामाण्यज्ञानानास्कंदितपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्त
रज्ञानत्वावच्छिन्नं प्रत्येव तत्तत्प्रामाण्यज्ञानानास्कंदिततादृशवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं वाच्यमतो न व्यभिचारः पर्वत
वह्निधर्मिकवह्निविधेयकानुमितितापेक्षया गुरुत्वेन तत्तद्प्रामाण्यज्ञानाभावकूटस्य तादृशनिश्चयकार्यतावच्छेदककोटिप्रवि
ष्टत्वात्। अनेन पर्वते वह्निशाब्दाग्निमज्ज्ञानस्य संभवो वारणीय इति परे वदपरिशीलितः पंथाः। अनुपूर्वोक्तयुक्त्या व्याप्यपक्षोभयवैशिष्ट्याव
गाहिनिश्चयत्वस्य दुर्वचत्वात् तद्रूपत्वेनानुमितावपि न हेतुत्वमतः कल्पांतरमाह। वह्निव्याप्यवदिति। केचित्तु व्याप्यपक्षोभयवैशि
ष्ट्यावगाहिनिश्चयत्वव्याप्यधर्मावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकवृत्तिकार्यतावच्छेदिकाया जातिस्तद्वत्त्वमित्यादि ल
क्षणार्थः। तत्र तादृशव्याप्यताप्रवेशेन लघुलक्षणमाह। वह्निव्याप्यवदितीति नवीनाः। वह्निव्याप्यधूमवत्त्वप्रकारत्वान्यप्रकार
त्वानिरूपितपर्वतत्वावच्छिन्नविशेष्यकज्ञानत्वावच्छिन्नेत्यर्थः। एतेन व्याप्यवत्ताघटकनिश्चयत्वघटकदलद्वयापेक्षया लाघवा
त् व्याप्यधर्मिकपर्वतनिश्चयत्वेनैव पर्वतो वह्निमानित्यनुमितौ हेतुत्वासंभवोपीत्यपास्तम्। निश्चयत्वे दलद्वयस्याप्रवेशादिति ध्ये
यं। व्याप्तिज्ञानत्वावच्छिन्नकारणत्वप्रवेशे अनुमितावसंभवोऽनुमितिमात्रे ज्ञानत्वेनैव ह्यद्यनुमितौ च वह्न्यादिज्ञानत्वेनैव हेतुत्व
स्यास्वयं वक्ष्यमाणत्वादत उक्तं तत्परित्यागः। यद्यपि वह्न्याद्यनुमितौ वह्न्यादिव्याप्यवत्तानिश्चयत्वेनैव समानविशेष्यतावच्छेदकत्वप्र
त्यासत्त्या हेतुत्वमुचितं पर्वतत्वत्वरत्वाद्यवच्छिन्नपक्षकनिखिलानुमितिसाधारण्यात् तत्तद्व्यक्तीनामपि कल्पनाक्षतयापरे
षां विषयविधये वास्माकं स्वरूपतः तत्पुरुषीयत्वस्यावच्छेदककोटिप्रवेशेपि गौरवाभावकाशात्। न च पर्वतत्वाद्यवच्छेदेन साध्य

न्याग० ३३

वह्न्यनुमितौ समानविशेष्यतावच्छेदकत्वं तदवच्छेदेन वह्निव्याप्यवत्तानिश्चयत्वेन हेतुत्वमावश्यकं उक्तक्रमेण हेतुतायां तद्भि
न्नह्रदादितिकार्य्यं गतावतापि पक्षतावच्छेदकसामानाधिकरण्येनानुमितौ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या परामर्शस्य
हेतुतायां बाधकाभावात् साध्यव्याप्यवत्तानतिरिक्तवृत्तित्वविशिष्टपक्षतावच्छेदकताघटकसंसर्गावच्छिन्नस्य विशेष्यता
वच्छेदकत्वप्रत्यासत्त्या पक्षतावच्छेदकधर्मावच्छेदेनानुमितावपि उक्तक्रमेण हेतुत्वसंभवात् वस्तुतः पक्षतावच्छेदकाव
च्छेदकावच्छेदेनानुमितौ न तदवच्छेदेन हेतुमत्वनिश्चयः कारणं किंतु तदवच्छेदेन बाधाभावनिश्चय एवेति तेन पर्वतत्वावच्छेदेन
प्रमेयत्वाद्यनुमितेः प्रमेयत्वानतिरिक्तवृत्तित्वावगाहित्वेन मतान्तरेप्युक्तेत्यपि वस्तुक्तम् एतावतापि वह्न्यादिसाध्यकानुमितौ स
मानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या परामर्शस्य हेतुत्वे बाधकाभावेऽपि साध्यव्याप्यस्य धूमालोकादेः अननुगमात्
तद्वैक व्याप्यवत्तानिश्चयत्वेन हेतुत्वोक्तावन्याक्षेपिकायां पर्वते धूमस्य चत्वरे वालोकस्य समूहालंबनपरामर्शात् प्रमाया
पावसाध्यस्यानुमितौ व्यभिचारस्यात् तत्पक्षीभूतस्य पर्वतादेरपि विशेष्यतावच्छेदककोटौ अनुप्रवेशः पृदिवेन तत्पुरुषापद
व्याप्यधूमवत्तानिश्चयत्वेनैव हेतुत्वं तत्पुरुषीयवह्न्यनुमितित्वेन कार्यताच्छ पञ्चकारणस्य विशेष्यतावच्छेदकत्वमेव संबन् ग्राम० ३३
धः कार्यस्येतत्पुरुषनिष्ठतानीयवह्निव्याप्यधूमवत्ताप्रकारतानिरूपितविशेष्यतावच्छेदकत्वविशिष्टमेवाविशेष्यतावच्छे
दकत्वसंबन्धः तादृशविशेष्यतावच्छेदकत्वे वैशिष्ट्यं तु स्वनिरूपकतानोत्तरतानायत्वसामानाधिकरण्योभयसंबन्धेन ग्रा[illegible]
त्युपनेयतातादृशसमानविशेष्यतावच्छेदकत्वप्रत्यासत्त्यापि परामर्शानुमित्योः कार्यकारणभावः संभवत्येव परं तु स्व विषय

तापाः ज्ञानसमानकालोत्पत्तिकस्य पदस्य परामर्शेन जनितायाः अनुमितेर्विशेष्यतावच्छेदकीभूतपर्वतत्वादौ तदानीं तादृशपरा
मर्शविशेष्यतावच्छेदकत्वस्यासंभवाद् वेद मुपेक्षितमस्माभिरिति नियुप व्याप्यविशिष्टवैशिष्ट्यबुद्धावनियामि व्यभिचारणेव्या
प्यविषयकेति न च व्याप्यविशिष्टवैशिष्ट्यावगाहितामाचस्यैव जन्यतावच्छेदकत्वात् परामर्शजन्यतावच्छेदकजातिविरहादेव न
तज्जातिप्रसङ्गः तथापि विशिष्टस्य रत्वस्य परामर्शजन्यतावच्छेदकतया तद्विशिष्टरणे अनियामि व्यभिचारणेव्याप्यविषयकत्वनि
वेशस्यावश्यकत्वात् वह्न्याद्यापत्तेः आपत्तिजातिमादाय अतिव्याप्तिवारकं तदिति कश्चित् ननु पक्षव्याप्यविशिष्टवैशिष्ट्यबुद्धौ
धूमत्ववह्नित्वादिना वाष्पगुंजादिकमेव भातं तस्याखंड व्याप्यविषयकत्वाभावात् अतिव्याप्तिरतो आप च वाच्या व्याप्तिभानं इति।
तादृशानुमित्यविषयीभूतघटादिव्यक्तिविषयकत्वस्य व्याप्यविशिष्टवैशिष्ट्यबुद्धावपि सत्वात् असमानतांव्याप्तिमानेः [illegible]
समानेसाध्यतावच्छेदकीभूतं वह्नित्वादिकमपि तद्विषयकत्वं चानुमितौ संभवत्यत उक्तं तादृशानुमित्यविषय इति। तथा च तत
द्रूपं पदभाववत्त्वधूमत्वादिकं तद्विषयकत्वमेव विशिष्य वक्तव्यमिति भावः ननु वह्निव्याप्यालोकपरामर्शजन्यायां पर्वतो वह्निमा
नित्यनुमितौ व्यभिचारात् वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन अनुमितिहेतुत्वमित्युक्तलक्षणसंभवः न च पर्वतधर्मिकवह्नि
व्याप्यधूमवत्तानिश्चयविशिष्टानुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं वैशिष्ट्यं चाव्यवहितोत्तरत्वसंबन्धेन तल्लक्षणद्वयसा
धारणं। तेन विनश्यदवस्थधूमपरामर्शस्थलीयानुमितौ व्यभिचारिता इति वाच्यं। अव्यवहितोत्तरत्वस्य संबन्धत्वे मानाभावात्
तादृशनिश्चयसामान्याव्यवहितोत्तरत्वाप्रसिद्ध्या तत्तत्परामर्शाव्यवहितोत्तरत्व व्यक्तीनामननुगततया मेवानिवेशयितव्ये अनुग

ज्ञा.ग. २४ तत्कार्यकारणभावासंभवात् । नापि धूमलिंगपर्वतधर्मिकवह्निविधेयकानुमितिं प्रति तादृशनिश्चयत्वेन हेतुत्वं धूमलिंगकत्वं
तु धूमान्यमात्रलिंगिकायां वृत्त्योक्तानुमितिव्यक्तिपक्षावृत्तिभेदकूटवत्त्वमतेन व्यभिचार इति वाच्यं । तथा सति तादृशभेदकूटानां विशे
ष्यविशेषणभावे हानंतकार्यकारणभावप्रसंगात् लाघवेन तत्तदनुमितिव्यक्तित्वावच्छिन्नं प्रति तत्तत्परामर्शव्यक्तित्वेन हेतुत्वस्यै
वोचितत्वादित्यस्वरसात् पंचलक्षणमाह । यांकांचिदित्यादिना । न च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन कारणतायाः स्वीकारात् तादृ
शनिश्चयनाशकविशिष्टानुमितित्वमेव कार्यतावच्छेदकमित्युक्तलक्षणमेव सम्यगिति वाच्यं । धूमपरामर्शगोचरकामिनीजि
ज्ञासानंतरोत्पन्नतादृशपरामर्शेन स्वविनाशदशायां उत्पादितानुमितेरसंग्रहापत्तेः । कामिनीजिज्ञासया प्रतिबंधेन साध्य
नतादृशनिर्विरहेण च तादृशपरामर्शद्वितीयक्षणे संस्कारभिन्नस्मृतज्ञानेच्छाकृत्यादेरुत्पत्त्यसंभवात् तृतीयक्षणे निध्यात्मकधूम
परामर्शांतरमुत्पन्नेनापेक्षाबुध्यात्मकालोकपरामर्शोत्पत्तिजननतायाश्च अनुमितौ व्यभिचारात् । ज्ञानादिनाशं प्रति तृतीयक्षणवृत्ति
त्वरोत्पन्नत्वेनैव जनकतया धूमपरामर्शांतरजातसमये एव पितृत्वाकतया तद्विशिष्टायामालोकलिंगकानुमितावपि रामः २४
व्यभिचारात् । अतएव धूमपरामर्शनाशकानुमितित्वावच्छिन्नं प्रत्येव वह्निव्याप्यधूमवत्त्वनिश्चयत्वेन हेतुत्वं न चाविनश्यद्व
स्थधूमपरामर्शजन्यानुमित्यसंग्रहः तत्र विशिष्येव तत्तत्परामर्शानुमितिव्यक्तीनां कार्यकारणभावस्वीकारात् तदतिरिक्तस्य
लक्षणस्योक्तानुगतरूपेण हेतुत्वासंभवात् । न च विनश्यदवस्थपरामर्शपरामर्शजन्यानुमितिस्थले या मम परामर्शनाशकानुमित्या
पत्तिः सामग्रीसत्वादिति वाच्यं । कार्यसहवर्तित्वेनैव धूमपरामर्शनाशकानुमितौ तादृशपरामर्शस्योक्तत्वादित्यपि निरस्तं । धूम

परामर्शाव्यधिकरणालोकादिलिंगकानुमितिव्यक्तीनामिति विशेषोत्पन्नत्वेन तादृशपरामर्शनाशतया तत्रैव व्यभिचारादिति ।
न चास्तु । वह्निव्याप्यधूमवत्पर्वतनिश्चयविशिष्टानुमितित्वमेव तादृशनिश्चयत्वेन हेतुत्वं वैशिष्ट्यं च तत्र स्वसमानाधिकरण
वृत्तिप्रागभावप्रतियोगित्वोभयसंबंधेन ग्राह्यं । ...रपि कालिकाभिन्नेत्युक्तलक्षणस्यासंभवः । न चाविनश्यदवस्थपराम
र्शजन्यानुमित्यसंग्रहः तत्तदनुमितौ परामर्शव्यक्तीनां विशिष्येव हेतुतांतरस्य स्वीकृतत्वात् । वस्तुतो वह्निव्याप्यधूमवत्पर्वतनिश्च
यविशिष्टत्वविशिष्टानुमितित्वावच्छिन्नं प्रति तादृशनिश्चयत्वेन हेतुत्वं वाच्यं तेन विनश्यदवस्थपरामर्शस्थलीयानुमितेर्नासंग्रहः । अत्र
च निश्चयस्य वैशिष्ट्यं पूर्ववत्स्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबंधेन निवेश्यं तादृशकृतिमत्वं तु सामानाधिक
रण्यसंबंधेन ग्राह्यमतो न कोपि दोषः सर्वत्र जीवनयोनियत्नमादायैव कार्यतावच्छेदकसंपत्तेः । न च धूमपरामर्शांतरं तद्भिन्नकाल
ग्रहात्मकालोकपरामर्शस्योत्पाददशायां बाधनिश्चयस्य ध्वंसत उत्तरवृत्त्यनुमितेरपि निरुक्तकृतिमदनुमितित्वात् तद्व्यवहि
तपूर्वकाले चाप्रामाण्यज्ञानाभाववविशिष्टधूमपरामर्शस्यासत्वात् व्यभिचार इति वाच्यं । अप्रामाण्यज्ञानव्यक्तीनामपि विशेषत
एवोत्तेजकतया तन्नुत्पत्तये केरनुत्तेजकत्वे विप्रतिविरहात् । एवं च परामर्शधर्मिकाप्रामाण्यज्ञानाभावकूटस्य स्वातंत्र्येणानु
मितिप्रयोजकत्वमते वह्निव्याप्यधूमवत्तानिश्चयविशिष्टकृतिमत्ताववच्छिन्नं प्रति तादृशनिश्चयत्वेन हेतुत्वात् तदनुमितित्वस्य ज
न्यतावच्छेदकतया उक्तलक्षणस्यासंभवस्यादतः स्वपंचलक्षणमाह । यांकांचिदित्यादिनेति प्राहुः । यत्तु वह्निव्याप्यधूमवत्पर्व
तनिश्चयत्वपदेन मानसत्वव्याप्यपरामर्शत्वजातिरूपलक्षितेति तदवच्छिन्नकारणतामंतर्भाव्यैवोक्तलक्षणसंभवः । प्राग

ननु भूतसाध्यादिपरामर्शादनुमित्युपपत्त्या च परामर्शत्वजातेर्न स्मृतित्वव्याप्यत्वं कापीति मतं तन्न तुच्छं। निश्चयत्वा
तेन परामर्शत्वजात्युपलक्ष्यव्याप्यादिविषयकवृत्तीत्यस्य ज्ञानवृत्तेरित्यादेश्च व्यर्थतापत्तेः। न वा परामर्शत्वस्य जातित्वे प्रमा
णमस्ति। तुल्यन्यायतयोपायेच्छाप्रवृत्त्यादिजनकतावच्छेदकत्वेन सिद्ध्येष्टसाधनताज्ञानत्वादिजात्या सांकर्यात्। किं चानु
मितित्वावच्छिन्नं प्रति ज्ञानत्वेनैव हेतुत्वसंभवात् तादृशजातौ मानाभावः घटादावरण्यस्थदंडादेरिवानुमितौ ज्ञानमात्रस्य
स्वरूपयोग्यत्वेपि क्षतिविरहात्। किं चानुमितिसामान्यं प्रति परामर्शत्वजात्या हेतुत्वस्वीकारेपि वह्न्यनुमितित्वाद्यवच्छिन्नं
प्रत्यनुगतनियामकालाभः। वह्निविषयकपरामर्शत्वेन तद्धेतुत्वे वह्निविषयकात् घटादिसाध्यकपरामर्शादपि वह्न्य
नुमितिप्रसंगात्। न च पर्वतधर्मिकवह्न्यनुमितित्वस्य कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्योत्पत्तौ बाधकाभावः तादृशानुमि
तित्वस्यापि परामर्शधर्मिकाप्रामाण्यज्ञानाभावस्य पक्षविशेषस्य वा कार्यतावच्छेदकतया तदवच्छिन्नस्यापत्तिसंभवात्। इदं
त्ववधातव्यं। पर्वतधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रति जनकतावच्छेदकतया धूमालोकादिनिखिलहेतुकवह्निपरामर्शसाधा
रणी भ्रमत्वज्ञानास्कंदितव्याप्यवत्तानिश्चयावृत्तिमानसत्वव्याप्या परामर्शत्वजातिः कदाचित्कल्पयितुं शक्यत एव। पृथिवा
क्षुषादिपरामर्शात् क्षणविलंबेनैवानुमितिः द्व्युत्ववह्न्योः साध्ययोः समूहालंबनद्व्यत्ववह्न्योर्नानुमितिः किं तु प्रत्येकस्यैव
परामर्शात् अन्यथा उभयजनकतावच्छेदकजात्योस्तत्रैव संकरापत्तेः। एतेन धूमादिलिंगकत्वादिकमेव धूमादिपरामर्श
जन्यतावच्छेदकं तच्चानुमितित्वव्याप्यं वैजात्यमित्यपि मतं व्याख्यातमिति दिक्। केचित्तु। वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनै

व हेतुत्वं जन्यता तु तादृशधूमविशिष्टपर्वतधर्मिकवह्न्यनुमितित्वेनैव। न च धूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेनैव लाघवात्
तु जन्यतेति वाच्यं। नानाविधव्याप्तेरनुमित्युपयोगितया जनकताविषयीभूतव्याप्तीनां विशिष्यानुमितौ कार्यतावच्छेदकत्वात्
एकविधव्याप्तेरनुमितिप्रयोजकत्वे तु धूमवत्पर्वतत्वावच्छिन्नधर्मिकवह्न्यनुमितित्वेनैव जन्यत्वं वक्तव्यं लिंगोपहितभानस्य
आचार्यसंमतत्वेन तस्यैव परामर्शकार्यतावच्छेदकत्वौचित्यात्। तथा च पूर्वोक्तलक्षणमेव सम्यक्। न चानुमितिमात्रस्यैव
पक्षे हेतुवगाहित्वे पक्षबाधकालीनपरामर्शानन्तरं पक्षे हेत्वभावस्य दोषजं लौकिकं वा प्रत्यक्षं तत्रानुमितिर्न स्यादिति वाच्यं
इष्टत्वात्। नन्वेवं सति तदानीं त्वन्मते प्रत्यक्षानुत्पादेन साक्षात्कारादिकं प्रति अनुमितिसामग्र्या विरोधितायां सिद्ध्यभा
वस्यैव पक्षधर्मिकहेत्वभावनिश्चयाभावस्यापि प्रवेशे गौरवादिति वाच्यं। मणिकृन्मते यत्र सिद्ध्यंशेऽभ्रमत्वज्ञानात्मकस्यैव
परामर्शस्योत्तरं पक्षे हेत्वभावस्य निश्चयस्तत्र तदुत्तरमनुमितेरनुत्पत्त्या सिद्धेरनुमितिविरोधितायां तत्र प्रामाण्यज्ञानाभा
वस्य प्रवेशे गौरवस्य तुल्यत्वात्। अस्माकं मते हेत्वभावनिर्णयेन प्रतिबंधात्तत्रानुमितेरनुत्पत्त्या सिद्धेर्विरोधितायां तत्र प्रामाण्य
ज्ञानाभावस्याप्रविष्टत्वात्। पूर्वं तु लिंगोपाधानमते चानुमितिमात्रस्यैव विशिष्टवैशिष्ट्यबुद्धित्वेन तन्निष्ठसाध्यव्याप्यवत्तापराम
र्शजन्यत्वं वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयताकत्वेनैवावच्छिन्नतादृशप्रत्यक्षादिसाधारण्येन क्लृप्तत्वात्। ननु वह्निव्याप्य
धूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेन कार्यकारणभावान्तरकल्पने गौरवादिति कुतः परामर्शजन्यतावच्छेदकीभूतमनुमितित्व
मादाय प्रागुक्तलक्षणसंभवः न च तद्वह्निविधेयकानुमितित्वस्य परामर्शजन्यतानवच्छेदकत्वे वह्निव्याप्यविशिष्टपर्वते वह्नेरनुमि

जा.ग. ३६ तिदृशायां घटादेरपि तादृशपर्वतेऽनुमित्यापत्तिः पर्वतविशेष्यकघटविधेयकानुमितित्वस्यापि घटसाध्यकपक्षताजन्य
तावच्छेदकतया तदवच्छिन्नस्योत्पादनसंभवादिति वाच्यं। लिंगोपधानपक्षे पर्वतधर्मिकघटानुमितिमात्रस्यैव घटव्याप्यवत्प
र्वतत्वावच्छिन्नविशेष्यताकत्वनियमेन तदवच्छिन्नं प्रति हेतोर्घटव्याप्यवत्तया पर्वतनिश्चयस्य विरहाद्वेवलदानीं घटविधेय
कानुमित्यसंभवात् व्यापकधर्मावच्छिन्नसामग्रीसहिताया एव विशेषधर्मावच्छिन्नसामग्र्याः कार्यजनकत्वादिति। तन्मते प
क्षतावच्छेदकसामानाधिकरण्येन व्याप्यवृत्तपरामर्शान्तरवत्त्वेन साध्यानुमित्यनुत्पत्त्या तदवच्छेदेन साध्यानुमितिं प्रत्यव
च्छेदकत्वेन साध्यव्याप्यवत्तापरामर्शत्वेन हेतुत्वादनुमितित्वस्याप्यवच्छेदकपरामर्शजन्यतावच्छेदकेनुप्रवेशात्पर्वतताद्य
वच्छेद्यत्वविशिष्टसंयोगसंबंधेन वह्निव्याप्यधूमवत्पर्वतधर्मिकवह्न्यनुमितिं प्रति पर्वतत्वावच्छेदेन वह्निव्याप्यधूमवत्तानि
श्चयत्वेन हेतुतायाः सुवचत्वादित्याहुः। न चैवं मते घटत्वादि। अनुमितिसमवेतत्वेनानुमितित्वप्रवेशे गौरवमतस्तत्प्र
वेशेन लाघवं सूचयितुं व्यक्तिपदं जातीतरस्यापि स्वरूपतः प्रकारतायाः क्वचिदिष्टतया व्यक्तिगतधर्मान्तरस्याभानेऽपि क्षत्या
भावात्। ननु अनुमितिसमवेतत्वे चानुमितित्वप्रवेशेन लघुनस्तस्यैव लक्षणत्वसंभवे विशेषवैयर्थ्यापत्तिः अतस्तद्व्यक्तित्वे
न प्रवेशः कृत इति तन्न। स्वरूपतोऽनुमितित्वप्रवेशेऽपि हेतुतावच्छेदकरूपेण प्रविष्टतया लघुलक्षणत्वासंभवात्। प्रत्यक्षत्वमादा
यातिव्याप्तिवारणाय घटसमवेतान्तं प्रत्यक्षत्वस्याप्यनुमितौ कालिकसंबंधेन सत्वात् समवेतेति। अनुभवत्वमादाय प्रत्यक्षाव्या
तिव्याप्तिवारणार्थं अनुभवत्वान्यैति। यद्यप्यनुभवत्वप्रतियोगिकभेदस्यानुभवत्वेऽपि सत्वाद्दुरुद्धो घटादवस्थ्यं अनुभवत्वता रामः ३६

वच्छिन्नप्रतियोगिताकभेदस्योक्तौ च तद्घटकीभूतं यत् सकलानुभववृत्तित्वं तदवच्छिन्नभेदस्यैव सम्यक्त्वे ज्ञानत्वादिवारकस्यानु
भवान्यासमवेतदलस्य वैयर्थ्यं। तथापि अनुभूतिरित्याकारकप्रतीतिसिद्धिप्रकारतावच्छिन्नभेदस्यैवानुभवत्वान्यपदेनो
क्तत्वाद्दोषः सकलानुभववृत्तित्वस्य तत्राप्रविष्टत्वात् बाधनिर्णयादिप्रतिबध्यतावच्छेदकतया परोक्षत्वजातेः प्रामाणि
कत्वे सकलानुभववृत्तिभिन्ना तादृशजातिमादाय शाब्दबोधादावतिव्याप्तिवारणार्थमनुभवान्यासमवेतपदस्यावश्यक
तान्नेति ध्येयं। ज्ञानत्वादिवारणार्थमनुभवान्यासमवेतेति। अनुमितित्वस्यापि कालिकसंबंधेन अनुभवादन्यत्र वृत्तेः समवेत
त्वप्रवेशः तादृशधर्मात्मकस्याप्यनुमितित्वस्य कालिकादिसंबंधेन इतरभेदव्यभिचारित्वात् समवायेन तस्य हेतुत्वलाभार्थं
समवायित्वमुक्तं। ननु स्वर्गाद्यनुमितौ स्वर्गमनुभवामीत्यनुव्यवसायविरहात् साक्षात्कारत्वमेवानुभवत्वं तथा चानुभवत्वा
न्येत्यस्य वैयर्थ्यमेव तद्व्यक्तिसमवेतदलेनैव प्रत्यक्षवारणात् तत्परित्यागे अनुमितित्वमनुभवान्यसमवेतमित्यसंभवः
तत्रानुभवपदस्य स्मृत्यन्यज्ञानपरत्वे च स्मरणान्यज्ञानभिन्नासमवेतत्वं फलितार्थमपेक्ष्य स्मरणासमवेतत्वमेव लघुतर
निवेश्यं तुमिति चेत् मित्याशयेनाह। अनुभवत्वेत्यादि। न वाच्यं। यां कांचिदनुमितिव्यक्तिमित्यस्यानुमितिः स्मृतिभिन्नाइ
त्याकारिकानुमितिव्यक्तिमित्यर्थः। तद्व्यक्तिसमवेतेत्यस्य च तस्यास्तादृशानुमितिव्यक्तेर्या व्यक्तिः विषयतासंबंधेनाश्रयः
तत्समवेतेत्यर्थः। तथा चानुभवत्वमादाय प्रत्यक्षादावतिव्याप्तिवारणाय यानुभवत्वान्यैति सकलानुभववृत्तिभिन्नमात्रार्थकं
तादृशानुमितिविषयनिष्ठस्य स्मृतित्वस्य वारणार्थं अनुभवत्वान्यासमवेतेति। अथानुभवत्वं न जातिः किंतु स्मृत्यन्यज्ञानत्व

नुपपादकत्वस्य तन्निवेशो व्यर्थः। एवं स्मृत्यन्यज्ञानभिन्नासमवेतत्वस्वरूपमनुभवान्यासमवेतत्वमपेक्ष्य स्मरणासमवेत
त्वं लघुतरं तावतैव स्मृतित्वस्य वारणसंभवादत आह। अनुभवत्वेतीति प्राहुः। ज्ञानत्वादिवारणाय स्मरणासमवेतेति। यद्यपि
प्रत्यक्षासमवेतेत्युक्तावपि तद्वारणसंभवस्तथापि प्रत्यक्षासमवेतत्वघटितनिरुक्तेः अनुभवत्वस्यांगीकारे अनंगीकारे
वोभयथैव सम्यक्त्वमिति विशेषः। व्याप्तीत्यादि व्याप्यविशिष्टवैशिष्ट्यबुद्धिवारणार्थमवच्छिन्नान्तं कार्यताविशेषणं। व्याप्तिविशिष्टबु
द्धिवारणाय परामर्शत्वावच्छिन्नेत्यादि। यद्यपि धूमलिंगकवह्न्यनुमितित्वमेव धूमघटितव्याप्तिज्ञानस्य जन्यतावच्छेदकं तद्व
च्छिन्नं प्रति च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुत्वं धूमलिंगिकायां महानसं वह्निमदित्याद्यनुमितौ व्यभिचारात् किंतु
पर्वतपक्षकतादृशानुमितित्वावच्छिन्नं प्रत्येव तथात्वे न हेतुत्वे तथा चैकैकावच्छेदेन व्याप्तिज्ञानपरामर्शोभयजन्यत्वाभावाद
नुमितावसंभवः। तथापि धूमघटितव्याप्तिज्ञानस्य स्वजन्यपरामर्शद्वारा अनुमितिकरणतायां धूमलिंगकपर्वतपक्षकत्व
स्यानुमितित्वस्यैव कार्यतावच्छेदकतादेकावच्छेदेनोभयजन्यत्वसंभवः। अन्यथा धूमगतव्याप्त्यवगाहिना वह्निव्याप्यालोक
परामर्शेन जनितायां पर्वतो वह्निमानित्यनुमितौ व्यभिचारेणास्वजन्यपरामर्शद्वारा धूमीयव्याप्तिज्ञानस्यानुमितिकरण रामः ३२
त्वानुपपत्तेरित्यावर्त्याशयः। जन्यतावच्छेदकावच्छिन्नाभागस्य तादृशव्याप्तिज्ञानजन्यतावच्छेदकधर्मघटितरूपावच्छिन्नार्थ
कत्वादृदोष इत्यपाहुः। इदं तु न सम्यक् वह्निरेव समति वह्निव्याप्यवत्पर्वतवानित्याद्याकारकविशिष्टवैशिष्ट्यबोधे प्रतिप्रसंगः
स्यात् तादृशबोधस्यापि वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकजन्यताया व्याप्तिज्ञानजन्यतावच्छेदक

प

व्याप्तिप्रकारतानिरूपितधूमप्रकारत्वेनावच्छिन्नत्वात्। न चैवं नव्यमतेप्युक्तदोषः सपातु व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रति
योगिककार्यतावच्छेदकत्वपर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्यावच्छिन्नान्तदलेन विवक्षणीयत्वात् तथा चापत्तिवारणाय दृश
जातिमादाय प्रत्यक्षमात्रे। तिव्याप्तेः अत्र पूर्वोक्तयुक्त्या परामर्शत्वेन हेतुत्वासंभवः न वा व्याप्तिज्ञानत्वेन तथात्वं अनुमिति
सामान्ये ज्ञानत्वेनैव हेतुत्वस्याग्रे व्यवस्थापयिष्यमाणत्वादित्यस्वरसः केन चित्पदेन सूचितः। मिश्रमतमाह। परे त्विति। पक्षताजन्य
त्वस्य ग्राह्याभावार्थमाह विशेषणमिति। ज्ञानरूपविशेष्ये अन्वयी यज्जन्यत्वं तेनान्वितमित्यर्थः। पक्षधर्मताज्ञानेत्यत्र प
क्षतावच्छिन्नत्वघटकतया सह साक्षादेव वा पक्षत्वं ज्ञाने विशेषणमिति भावः। यथोक्तापादति। विशिष्टाभावरूपायाः पक्ष
तायाः प्रत्यक्षस्य वारणायेत्यर्थः। ननु विशिष्टाभावरूपायाः पक्षतायाः काजाद्यतीन्द्रियघटितत्वात्स्वगोचरप्रत्यक्षहेतु
त्वमत आह। विशिष्येति विशेष्यं सिद्धिः तथा च प्रत्यक्षसाध्यस्थले सिद्धिदशायां कदाप्यनुमितिर्न जाता तत्र सिध्यभावमा
त्रं पक्षता सा च योग्यत्वात्प्रत्यक्षहेतुरेवेति तत्रैवातिव्याप्तिरिति भावः। ननु पक्षविशेष्यकसाध्यप्रकारकनिर्णयत्वमेव सि
द्धित्वं तदवच्छिन्नाभावश्च न योग्यो निश्चयत्वस्यातीन्द्रियेश्वरज्ञानादिघटितत्वात् तादृशानिश्चये चाप्रामाण्यज्ञानाद्यनास्कन्दितत्व
प्रवेशो सुतरामयोग्यत्वमत आह। आदाविति। विशेषणाभावरूपाया एवेति तदर्थः। तथा च यत्र स्थले विशेषसिद्धिकालीन
परामर्शसमानकालीनाएकविधानुमित्सयैवानुमितिर्जनिता तत्र विशेषणाभावरूपा तादृशानुमित्सैव पक्षतेति तत्र
प्रत्यक्षेति व्याप्तिवारणार्थं परामर्शोपादानमिति भावः। तत्वेनेति। परामर्शत्वेनेत्यर्थः। तत्वेन जनकतायाः फलमाह। तनेति।

आग० ३८ बाधादाव्यादिनाशसम्भवादिति पक्षसंग्रहः तत्रापि तदानीमनुमितिरित्यसाध्याभावाभावनत्वं भावनापीति प्रतियोगीति पक्षतीयः
प्रतियोगिनी याप्तिदिष्टसदिषयके नेत्यर्थः। तथा च सिध्यभाववलौकिकप्रत्यक्षत्वरूपैकधर्मावच्छिन्नं प्रत्यैव विषयविधया
सिध्यभावस्य सिद्धित्वरूपप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन च परामर्शस्य हेतुत्वमिति भावः। एकावच्छेद
केनेत्यस्य फलमाह। तदुभयेति पक्षतापरामर्शोभयेत्यर्थः। न च परामर्शप्रत्यक्षाविषयत्वादिनैव तस्य हेतुत्वं न तु परामर्
शत्वेनेति भागुक्तेत्यापादकत्वेन तत्र न कात्वविवक्षैवेत्समूहालंबनव्युदासः संभवतीति वाच्यं। वह्निव्याप्यधूमवत्पर्वतं जा
नामीत्याकारकस्य परामर्शानुव्यवसायस्य ज्ञानधर्मिकव्याप्यविशिष्टवैशिष्ट्यबुद्धितया तत्र पर्वतधर्मिकव्याप्यप्रका
रकनिश्चयत्वेन हेतुत्वस्यावश्यकत्वात्। यद्यपि पक्षताजन्यतावच्छेदकं तत्तत्पक्षकतत्साध्यकानुमितित्वं तत्र च परामर्शज
न्यतावच्छेदकं तल्लिंगकत्वस्याप्यधिकस्य तत्र प्रवेशादित्येकावच्छेदेन तदुभयजन्यत्वमनुमितावप्यसिद्धं। तथापि पक्षताज
न्यतावच्छेदकघटितधर्मावच्छिन्ने परामर्शजन्यत्वं विवक्षितं पक्षतायामपि लिंगविशेषनियंत्रितमग्रे वाच्यमतो वा नोक्तदो
षः। वस्तुतो विषयितासंबंधेनैव तदुभयजन्यतयोरवच्छेदकस्यैकत्वं वाच्यं। तथा च विषयविधया परामर्शजन्यतावच्छेदकस्य व रामः ३८
ह्निमत्पर्वतस्य पक्षताजन्यतायामपि विषयितयावच्छेदकत्वान्नोक्तदोषः। एतेन पक्षताजन्यत्वेऽपि तत्राभावजन्यत्वमेव व्या
घातप्रवेशायितुमुचितं विशिष्टवैशिष्ट्यबोधस्य ग्राह्याभावनिश्चयाभावजन्यत्वेऽपि धर्मितावच्छेदकनियंत्रितस्य तज्जन्यताव
च्छेदकस्य विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतानवच्छेदकत्वादेकावच्छेदेनाभावपरामर्शोभयजन्यताभावादेवत

व्याप्तिव्याप्यसंभवादिति परास्तम्। विषयविधया बाधनिश्चयाभावजन्यतावच्छेदकस्यैव विषयतया विशेषणतावच्छेदकप्र
कारकनिश्चयजन्यतावच्छेदकत्वे तथात्वेऽपि व्याप्तिप्रसंगापत्तेरिति दिक्। नाव्याप्तिरिति। अन्यथैकसाध्यादिमत्तया व्यपरामर्शा
द्युपादाने अन्यसाध्यकाद्यनुमितावव्याप्तिः स्यादेवेति भावः। तद्भिन्नत्वमिति। पूर्वोक्तयुक्त्या परामर्शत्वेनानुमितिहेतुत्वमे
वेनास्ति पक्षतापाश्चहेतुत्वमग्रेस्वयं निराकरिष्यमित्यादिकमत्रचिंताबीजं। न चेति। वाच्यमित्यग्रिमेणान्वयः व्याप्तिज्ञान
त्वमिति। व्याप्तिप्रकारकज्ञानत्वमित्यर्थः। न च परामर्शजन्यज्ञानकारणत्वस्वरूपेणानुमानलक्षणे व्याप्तिज्ञानत्वेन तस्या
प्रवेशान्नवैयर्थ्यमिति वाच्यं। व्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणताघटितनिरुक्तस्य घटितमूर्तिकत्वाघापकताविशे
षात्मनः कारणत्वस्यतादृशानिश्चयत्वेन निश्चयत्वग्रहं विना दुर्ग्रहत्वादिति भावः। तादृशनिश्चयत्वं च व्यापारघटितत्व
रूपव्याप्तेः कारणतावधारकत्वेत्ताह। व्याप्तिज्ञानमेवेति। व्याप्तिप्रकारकज्ञानमेवेत्यर्थः। ननु साध्यादिभेदेन व्याप्तेर्विभिन्नतया
व्याप्तिज्ञानत्वादिकमनुमानमात्रस्य पक्षतेभागासिद्धं अतो व्याप्तिविशिष्टज्ञानजन्यत्वस्यानुभवतव्याप्यजातिमत्कारणत्वं हे
तुः कश्चिद्व्यमत आह। व्याप्तेरिति। अधिकस्यतादृशजातिमत्कारणत्वस्यभागासिद्धीतितथा च व्यभिचाराचारकत्वादैयर्थ्यमे
वेति भावः। फलेति। अनुमितिरूपं यत्फलं तदुपधायकस्यैव लक्ष्यतया स्वेतरभिन्नत्वेन ज्ञाप्यत्वात्। व्याप्तिज्ञानत्वस्यानुमित्य
नुपधायकवृत्तित्वेन व्यभिचारितान्न हेतुत्वमतस्तादृशजातिमत्त्वोपहितकारणत्वमेवहेतुत्वमिति भावः। स्वरूपयोग्य
त्वस्यलक्ष्यत्वेऽपि न क्षतिरित्याशयेनाह। करणत्वेति। तथा च धर्मिभेदान्नवैयर्थ्यमिति भावः। ननु करणत्वं करणतावच्छेदको धर्मः

स्वप्रकृते व्याप्तिज्ञानत्वमेवेति वधर्मिभेदसंभवइत्यत आह व्यतिरेकेति। व्यतिरेकिस्थले साध्याभावस्यैव हेत्वभावव्याप्य
ताग्रहान्नैवेपर्प्यइंकेतिभावः। तल्लेत्यादिमूलस्य लक्षणपरिशेषयोरनुपयोगादन्यथा तद्व्यापयति। लिंगस्येति। अनित्य
लिंगानामदृष्टादिद्वारा कदाचिदिंद्रियोपजीवकत्वसंभवान्नित्यत्वेपीतिपर्यंतमनुसृतं अनुमितिकरणस्य तत्सामान्यस्य
ज्ञानेति ज्ञानाकारपाक् ज्ञानं हृत्यनुभवत्वव्याप्यजातिमत्वमर्थः। तेन विक्षिप्तवैशिष्ट्यादिप्रत्यक्षेणाव्याप्तिः साक्षात्कारत्वा
दिस्वरूपलक्षणं तस्य ज्ञानहेतुकस्यैवाति शिक्तानुमानस्य च संभवान्नेदं युक्तमित्यस्वरसेन कश्चिदित्युक्तं। ननु तादृशज्ञा
तिमत्करणत्वहेतुनेतरभेदसाधने जातिमद्भेदनभागोव्यर्थः। चक्षुरादेरप्यनुमानतया करणत्वमात्रस्यैव हेतुत्वसंभ
वादित्यत स्तन्नेत्यादिमूलं मिमितिनुव्याः केचित्तु। लिंगस्य करणत्वे जगतएवानुमानभयात्तदितरप्रसिध्या कथमुक्तल
क्षणस्येतरभेदानुमापकत्वमत स्तन्नेत्यादीति प्राहुः। तन्नित्यं। कार्यमात्रं प्रत्यकारणपारिमांडल्यादावेवानुमितिकरणे
तरत्वस्य प्रसिद्धिसौलभ्यादाचार्यमतेपितद्धेतुकानुमितौ परामर्शस्यैककारणत्वादिति दिक्। बोधस्यानुमानत्वाप्रसि
ध्यातादृप्येण पक्षतासंभवाद्याचष्टे। अनुमानत्वेनेति। अनुमानत्वाप्रसिध्यातदभिमतत्वमपि तंस्थेत्यतो विशिष्याह। धूम
ति। अनुमानशब्दस्य लाक्षणिकता पन्नेः कल्पातरमाह। अस्मदिति। पारमार्थिके धूमादिज्ञानेऽसतोनुमानत्वेस्य संबंधा
योगात्। अनुमितिकरणत्वविशिष्टस्यालीकांतरवदसत्वमितिभावः। निर्विकल्पकसमानविषयकत्वरूपसंवादस्यसंभा
वनायामसंभवादाह। संवादाभिमानेति। संवादासंभवबीजमाह। संभावितस्येति। असतइत्यन्तेवहेतुरनुगताकारस्य

ति। बुद्धित्वाद्यनुगतधर्मवतइत्यर्थः। अध्यक्षेणानुगताकारस्यानुल्लेखेवहेतुगर्भविशेषणमाह। परमार्थेत्यादि। परमार्थसत्
स्वपमेवं लक्षणव्यावर्तकं यस्य तन्मात्रसाक्षिणेत्यर्थः। परेषामभेदेनैव धर्मधर्मिभावादितिभावः। विकल्पद्वयेपिपरस्परसं
वादव्यवहारात्मकारांतरेण संवादपदार्थंनिर्व्याह। अध्यक्षेत्यादि। संभावितस्येत्यनुषज्यते। तथा च संभावितस्याध्यक्षमू
लकविकल्पोल्लेखितत्वादध्यक्षमूलकविकल्पविषयविषयकत्वरूपः संवादः संभावनायामस्त्येवेतिभावः। विकल्पस्त
मानविषयकत्वस्यानादिवासनामूलकेशशशृंगादिविकल्पेतिप्रसक्तत्वादध्यक्षमूलकत्वेन विकल्पो विशेषितः। सम
पादीनां ज्ञानमाध्यस्योपयोगेतत्संभावनासहकारेणैव शशादेः प्रामाण्यंस्यादतउक्तं निर्णयेति। आदिनातात्पर्यनिर्णया
देः परिग्रहः। अप्रमाणसाधर्म्यत्वेन हेतुतायां चक्षुरादौ व्यभिचारादाह। प्रमाणतेति। नचेंद्रियत्वमिव व्याप्तिनिश्चयत्वम
पि प्रमाणत्वाप्रयोजकमतं तत्सामान्यशून्यत्वं पृष्ठस्वरूपासिद्धमितिव्याप्यं योग्योपाधीनामित्यादिग्रंथोक्तक्रमेण कश्चिद
पिव्याप्तिनिश्चयासंभवेन न तस्य प्रमाणताप्रयोजकत्वासंभवादितिभावः। मणिकृता लिंगस्यानुमानत्वनिरासात्तन्मते
पूरयति। साधर्म्यदर्शनस्य चेति। अभिहितमेवेत्येवकारः संभावनामित्यनंतरंयोज्यः। तथा चाभिहितं यत्साधर्म्यदर्शनप्र
माणताप्रयोजकरूपशून्यत्वदर्शनरूपं तत्संभावनामनुमानसामान्येऽप्रामाण्यस्य संभवनामेवोत्पादयति न त्वनुमितिय
तोऽनुमानेनैव तदप्रामाण्यसाधने व्याघातः स्यादितिभावः। बहुशइति। तथा च परकीयसंदेहादिकमपि संभाव्यैव तदुच्छेदा
यशब्दप्रयोक्तव्यइतिनदितीयोपि दोषइतिभावः। यावदसत्वव्यतिर्निर्व्यवस्थाप्यतेतावदेवेत्यप्रमजनकत्वरूपमप्रामाण्यं

जाग० ४० नोच्यते तस्याः सिद्धौ तु भ्रममात्रस्यैवासत्त्वात् निरूपताहेत्वनुमानं न प्रामाण्यमिति वा कस्यचित् भ्रमजनकत्वसिद्धावपि चानु
मानस्य प्रामाण्यसिद्धिरित्याशयेनोक्तमापाततइति। न चेति वाच्यमिति परेणान्वयः। सन्मात्रावलंबनत्वं सदन्याविषयक
त्वं प्रामाण्यावगाहित्वं सद्विषयकत्वावगाहित्वं। न च सन्मात्रावलंबनत्वादेरपि स्वानतिरिक्तत्वाभेदेन वस्तुग्रहसंभवः। तस्मात्त
द्घटितमूर्त्तिकत्वेनातिरिक्तत्वात् संभावनायाश्चाध्यक्षनिरुक्तसन्मात्रावगाहितादेर्यदेतेयामप्रामाण्ये कत्वापत्तेः संभावना
मात्रस्यैवाप्रमात्वादिति भावः। इदं अनुमानाप्रामाण्यदूषणादिकं व्याप्तिनिश्चये सति व्याप्तिनिश्चयत्वं प्रमाणतताप्रयोजक
रूपं तच्छून्यत्वं पक्षेनास्ति इति स्वरूपासिध्याऽनुमानाप्रामाण्यमनुसाधयितुं शक्यत इत्त इति भावः॥ ॥ इति श्रीमहामहोपा
ध्याय जगदीशतर्कालंकारभट्टाचार्यविरचिता अनुमितिग्रंथदीधितिटिप्पणी समाप्ता॥ श्रीश्रीरामलक्ष्मणाभ्यां नमः।

निरू०

जागदी० ४१ ॥ श्रीगणेशाय नमः॥ समारब्धेति॥ समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदा
नं व्याप्तिस्वरूपनिरूपणमित्यर्थः॥ तथा च प्रामाण्योपोद्घातसंगत्या व्याप्तिस्वरूपणमिति भावः॥ अव्याप्यवृत्तीति कपिसंयोगी एत
द्वृक्षत्वादित्यादावित्यर्थः॥ इदं च येन रूपेण येन संबंधेन साध्यत्वं तदवच्छिन्नप्रतियोगिताकसाध्याभाववन्निवेशमादाय अन्यथा तु
व्याप्यवृत्तिसाध्यकस्थलेऽपि विशिष्टाभावादिकमादाय दोषो बोध्यः॥ अव्याप्यवृत्तिसाध्यकेप्याकाशादिहेतौ अव्याप्त्यभावादाह॥
सद्धेतावपीति॥ वृत्तिमद्धेतावपीति तदर्थः॥ ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववद्वैयर्थ्यं साध्यवद्भिन्नत्वाद्वृत्ति
त्वस्यैव सम्यक्त्वात्॥ न च वृत्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात्साध्याभाववत्तासमवेतत्वात्म्येन तस्यान्वयविवक्षणा
त्रैवैयर्थ्यमिति वाच्यं॥ तथा सति साध्यवद्भिन्नात्मकोयामतुवर्यसंबंधिनद्वृत्तित्वस्यैव सम्यक्त्वे साध्याभाववत्पदवैयर्थ्यताध्रौव्या
दतः सप्तमी सुमासंसमर्थ्यमाचष्टे॥ साध्यवद्भिन्न इति॥ तथा च साध्यवद्भिन्नस्य अवृत्तेः अनन्वयो घटासंनिवेशेन वैयर्थ्यं॥ साध्या
भावे साध्यवद्भिन्नवृत्तित विशेषणेत्वव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः॥ साध्यवद्भिन्नवृत्तित्वस्य त्वादिमति धूमादेः सत्वाद्व्या
प्तिरसंभवो वास्यादतः साध्याभावेति॥ न च कपीसंयोगी एतत्वादित्यादेः संग्रहार्थमधिकरणभेदेनाभावभेदमाश्रित्यैव लक्षणमि
दंकार्यं॥ तथा च साध्यवद्भिन्नो योभाववान्तद्वृत्तित्वमित्यस्यैव सम्यक्त्वे साध्यपदं व्यर्थमिति वाच्यं॥ प्रतियोगितासंसर्गेण साध्याप्रते
नैव साध्याभावस्य प्रवेशोनत्वभाववत्स्याप्रीतितद्वैयर्थ्यं नांकानवकाशात्॥ वस्तुतः स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्ने
वर्त्तते यः साध्यतावच्छेदकसंबंधेन साध्याभावस्तद्वृत्तित्वमर्थः॥ तथा च साध्यतावच्छेदकसंबंधेन साधीपतार्थकस्य साध्य

परस्यानुकूलौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंबंधेन वृत्त्यादिमतोऽन्यस्मिन्पर्वतादौ वर्त्तते यः स समवायाद्यवच्छिन्नवृत्त्या
धभावक्त इति धूमादेः सत्ताद्व्याप्तिस्यादेतस्त डुपात्तमिति तु न व्याः॥ केचित्तु॥ व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिविरुद्धधर्माध्यास
कं योगाद्यभावस्यैकव्यक्तिगुणाद्यधिकरणभेदेन भेदे न तु गगनाद्यभावस्यापि मानाभावात्॥ तथा च साध्यवद्भिन्नवृत्तिगग
नाद्यभाववति धूमादेः सत्त्वाद्व्याप्तिरतः साध्यपदमित्याहुः॥ तन्न॥ गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्येन
तु द्रव्ये गगनाद्यभावे तत्त्वमित्यादिप्रतीत्या गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्येन तदभावयोर्विरुद्धधर्मयोः सं
भेवादिति दिक्॥ ननु घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववानुगमनत्वादित्यत्राव्याप्तिः॥ साध्यवद्भिन्ने घटे वर्तमा
नस्य गगनसंयोगात्मकसाध्याभावस्याधिकरणे गगनत्वहेतोः सत्त्वादिति वाच्यं॥ अभावाभावस्यातिरिक्ततामत एवैतद्व
च्छेदकरणमिति भावः॥ भिन्नत्वइति॥ द्रव्यनिष्ठसंयोगाभावभिन्नत्वइत्यर्थः॥ मानाभावादिति॥ तथा चात्रापि अव्याप्यवृत्तिसा
ध्यकसद्धेतावव्याप्तिरिति भावः॥ हेतोः साध्यवदिति॥ अव्याप्तेरिति॥ न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वा
दसंभव एव वक्तुमुचितो नाव्याप्तिरिति वाच्यं॥ सत्त्वगगनादिहेतौ लक्षणस्य संभवात् तस्यापि सद्धेतुतायाः स्वयं वक्ष्यमाणत्वा
दिति भावः॥ साध्यपदस्य सिद्धिकर्मतत्तद्व्यक्तिपरतया तत्तद्घटत्वावच्छिन्नान्योन्याभावसामानाधिकरण्यरूपस्य पर्यवसितार्थ
स्य द्रव्यं पृथिवीत्वादित्यादावेव संभवाद्गंधवति पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदन्ति॥ ॥ननु सकलस्य सा
ध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्याव्यभिचारिण्यतिव्याप्तिवारणाय पदं साध्याभाववदसाकल्यं विशेषणांतरावृत्ति

जाग० माभूमादित्यादावव्याप्तिः॥ तत्रापि तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्पक्षावृत्तित्वावच्छिन्नाभावरूपस्य वा साध्य
४२ प्रतियोगिकाभावस्तोमस्याधिकरणाप्रसिद्धेरत आह॥ साकल्यं साध्याभाववतीति॥ तथा च साकल्यं न साध्याभावविशेषणं
अतो नाप्रसिद्धिरिति भावः॥ नन्वेवमपि साध्याभाववद्वृत्तित्वं न गुणितमहानसादौ वर्तमानस्याभावस्य प्रतियोगित्वं धूमादौ
नास्तीत्यव्याप्तिताद्वस्थ्यमत आह॥ साध्येति॥ तथा च सपक्षो महानसादिर्न सकलसाध्याभाववानिति दोषः॥ ॥ग्रन्थ
सं॥ ॥व्यभिचारिण्यतिव्याप्तिवारणाय साध्याभाववति यावत्त्वविशेषणे दत्ते एव साध्ये यावत्त्वमव्याप्तिवारकतया सार्थकं भव
त्यतः साध्याभाववत्त्वेव साकल्यं प्राक् योजयति साकल्यमित्यादिनेत्येवमवतारयन्ति॥ तन्न इदं साध्याभाववति साकल्यानुक्ता
वप्यतिव्याप्तिवारकतये व साध्ये साकल्यविशेषणस्य प्रथमतः सार्थक्यासंभवात्॥ अन्यथा गगनावृत्तिधर्मवान् द्रव्यत्वादि
त्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिद्रव्यत्वादावतिप्रसंग इति ध्येयम्॥ ननु साध्यवत्त्व
विशिष्टत्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्याभावस्य सत्त्वादसंभवः॥ किं च सकलपदोत्तरनाम्नः सकलसाध्यप्रतियो
गिकाभाववत्तोनुपस्थापनात्तेन समं सकलपदस्य कर्मधारयोप्यनुपपन्न इत्यतः आह साध्याभावो वेति॥ तथा च साध्याभा रामः
ववत्त्वे व साकल्यं दत्तं न तु साध्येपीति भावः॥ साध्याभाववति साकल्यप्रयोजनमाह॥ तेनेति॥ विपक्षैकदेशः॥ कश्चिद्विपक्षः॥ २
साध्यनिष्ठसाकल्यस्य साध्यसामान्याभावस्य वा विवक्षायाः फलमाह॥ नानेति॥ एकव्यक्तिसाध्यके सकलसाध्योक्तावव्या
प्तिरग्रे स्फुटीभविष्यतीत्याशयेन नानेत्युक्तं॥ अव्याप्यवृत्तीति॥ कपिसंयोगी एतत्त्वादित्यादावित्यर्थः॥ यद्यपि अग्रे हेत्वभावस्या

पि प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इत्यव्याप्यवृत्तिहेतावव्याप्तिः संभवति॥ तथापि यथाश्रुतमूलस्य तन
त्राव्याप्तिरित्यावेदयितुं व्याप्यवृत्तिहेतूक्तिः॥ व्यभिचारिणीति॥ एतद्वृक्षत्ववान् कपिसंयोगादित्यादावित्यर्थः॥ अभावद्वयं इ
ति॥ साध्याभावे हेत्वभावे चेत्यर्थः॥ अत्र च साध्याभावप्रतियोगिवैयधिकरण्यं साध्यतावच्छेदकसंबंधेन प्रतियोगिनो यदनधि
करणं तद्वृत्तित्वं॥ तेन धूमाद्यभाववतोप्ययःपिण्डादेः कालिकादिसंबंधेन धूमादिमत्त्वेपि नातिव्याप्तिः॥ हेत्वभावे प्रतियोगिवै
यधिकरण्यं तु प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वं बोध्यं॥ तेनायमात्मा ज्ञानादित्यादौ साध्याभाववतो
घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः॥ हेत्वभावोपीति॥ अपिना साध्याभावसंग्रहः॥ तेन विशिष्टसत्तावान्
जातेरित्यादौ नातिव्याप्तिः॥ यद्यपि साध्याभावोपीत्येव क्रमानुरोधाद्वक्तुमुचितं॥ अपिशब्दादेव हेत्वभावस्य लाभसंभवात्॥ त
थापि तत्प्रतियोगित्वं चेत्यग्रे तत्पदेनानिर्दिष्टहेत्वभावपरामर्शासंभवाद्धेत्वभावप्रतियोगित्वं चेत्यभिधाने ग्रंथगौरवा
पत्तेरित्थमभिधानं॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति॥ प्रतियोगिपदं प्रतियोगितावच्छेदकतावच्छेदकसंबंधेना
वच्छेदकस्य वैशिष्ट्यलाभाय॥ तेन ह्रदादौ कालिकादिसंबंधेन धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगसंबंधेन सत्त्वेपि नाव्याप्तिः॥
तत्प्रतियोगित्वं॥ हेत्वभावप्रतियोगित्वं॥ हेतुतावच्छेदकरूपेणेति॥ हेतुतावच्छेदकसंबंधेनापि बोध्यं॥ तेनात्मभिन्नं द्रव्यत्वादि
त्यादौ साध्याभाववत्यात्मनि वर्तमानस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य कालिकसंबंधावच्छिन्नद्रव्यत्वाभा
वस्य प्रतियोगित्वेपि द्रव्यत्वस्य नातिव्याप्तिः॥ न च हेतुतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्योक्तावतिव्याप्तिवारणसंभवात्

हेतुतावच्छेदकसंबंधेन प्रतियोगित्वविवक्षाव्यर्थेति वाच्यं॥ तथा सति निर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादौ निर्वह्नित्वभेदमा
दायैव लक्षणसंभवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रंथे वक्ष्यमाणव्याप्यत्वलक्षणप्रकृतापत्तेरिति ध्येयम्॥ हेत्वभावेप्रतियोगितावच्छेद
कावच्छिन्नप्रतियोगित्वे प्रधिकरणत्वविवक्षायाः फलमाह॥ तेन द्रव्यत्वादाविति॥ अन्यथा साध्याभाववद्वृत्तिगुणादौ विशिष्टसत्ताभा
वस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वाद्व्याप्तिरेवस्यादिति भावः॥ अत्र च द्रव्यत्वस्य साध्यतायां सकलसाध्याप्रसिध्याव्या
प्तेरुक्तविवक्षायाः प्रतिकारादादिपदं तेन गुणत्वादिसाध्यकस्यापरिग्रहः॥ द्रव्येतरासमवेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयम्॥
हेतुतावच्छेदकरूपेण हेत्वभावप्रतियोगितविवक्षायाः फलमाह॥ नवेति॥ सत्ताद्याविति॥ द्रव्यत्वादौ साध्ये इत्यनुवर्त्तते॥ पत्रै
कव्यक्तिकमिति॥ तथा च द्रव्यं पृथिवीत्वादित्यादाव व्याप्तिः सकलसाध्याप्रसिद्धेरित्यर्थः॥ नन्वितरेष्वपि साध्यसामान्या
भावस्यैव निवेशितत्वात्साध्येसाकल्यं न देयमेवेत्यत आह॥ विपक्षेवेति॥ एकव्यक्तिकमित्यनुषज्यते॥ तथा च पत्रैकव्यक्तिरे
वसाध्यसामान्याभाववती तत्र गगनादिवृत्तिधर्मवान् गगनान्यत्वादित्यादावव्याप्तिः साध्याभाववतः साकल्याप्रसिद्धेरित्यर्थः॥
ननु साध्याद्भेदेन व्याप्तेर्भेदादत्र एकव्यक्तिकएव विपक्षः तत्र तल्लक्षणे साध्याभाववृत्तिसाकल्यविशेषणं न देयमशेषत्वरू — रामः १
पंसाकल्यं वानिवेश्यमतो दोषांतरमाह॥ निर्धूमत्वव्याप्यइति॥ निर्धूमत्वस्य साध्यत्वे पत्रैकव्यक्तिकमित्यनेनैवगतार्थता — २
स्यादतो व्याप्यपर्यंतं॥ निर्धूमत्वव्याप्यस्यापि व्हहादेः स्तनेहत्वादिनासाध्यत्वे वह्न्यभावस्य व्यभिचारित्वात्तदसंग्रहोऽनदोषापे
त्यत आह॥ तत्वेनसाध्येति॥ निर्धूमत्वव्याप्यत्वेन साध्यइत्यर्थः॥ प्रत्येकमिति॥ हेत्वभावस्य महानसीयादिवह्निः साध्याभावव — न

त्सकलांतर्गतपर्वतादिवृत्तित्वादव्याप्तिरिति भावः॥ निरुक्तप्रतियोगित्वे प्रधिकरणावच्छिन्नसाध्याभावव्यापकतावच्छेदकं नि
रुक्तप्रतियोगित्वे प्रधिकरणावच्छिन्नयद्धर्मावच्छिन्नाभाववत्वं तद्धर्मवत्वं व्याप्तिरित्युक्तौ तु नैष दोष इति ध्येयम्॥ ॥ननु साध्यव
त्प्रतियोगिकान्यत्वस्य धूमादिमति सत्वादतिव्याप्तिरतआह॥ अत्रेति॥ तथा च साध्यवत्पदेन निरुक्तलक्षणे यो यस्यापि तत्स
साध्यतावच्छेदकविशिष्टसाध्यवत्तावच्छिन्नप्रतियोगिताकस्यैव अन्यपदार्थैकदेशे अन्यत्वे तादात्म्येनान्वयात् साध्यवतिवसा
ध्यवत्तावच्छिन्नप्रतियोगिताकभेदासत्वान्नाव्याप्तिः॥ गुरुधर्मस्यावच्छेदकत्वाभ्युपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत
विशिष्टद्रव्यत्ववत्तावच्छिन्नभेदाप्रसिध्यानाव्याप्तिरितिभावः॥ पद्धर्मविशिष्टबोधकपदसमभिव्याहृते नान्यादिपदेनोपस्था
पितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्यनान्वयो न तु तद्धर्माश्रयप्रतियोगिकत्वेनेत्यत्र व्युत्प
त्तौ प्रमाणमाह॥ न हीति॥ तथा च तादृशव्युत्पत्त्यस्वीकारे नीलघटपटप्रतियोगिकभेदसत्वान्नीलघटो घटान्य इत्यपि व्यव
हारस्यादिति भावः॥ अत्र च द्रव्यं पटान्यदित्यप्रयोगात् पत्निष्टप्रतियोगिताकत्वेन भेदोऽन्यादिपदेन बोध्यते तद्वृत्तिधर्म
स्यैवानुयोगितावच्छेदकत्वान्न तत एव घटो घटान्य इत्यस्य वारणसंभवात् नीलघटत्वस्य धर्मितावच्छेदकत्वपर्यंतानुधावन
मिति मंतव्यं॥ नीलो घटो घटान्य इत्येवसम्यक्पाठः तथैव प्रकृतोपयोगित्वसंगतेः॥ घटादन्य इति पाठस्तु साध्यवदन्येत्य
त्र पंचमीसमासेऽनुतदविभक्तिस्मारितप्रतियोगित्वेप्रकृतपर्यंतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमादृत्य कथंचि
त्संगमनीयः॥ घटः पटोनेत्यादौ तु पटपदं मुख्यार्थमेव॥ न तु प्रकृत इव पटत्वावच्छिन्नप्रतियोगिताकपरं॥ निपातातिरिक्त

स्य जाएव नामार्थयोर्भेदान्वयस्याव्युत्पन्नतयानत्रुपस्थापिते भेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्यान्व
यसंभवात्॥ पटत्वावच्छिन्नप्रतियोगिताकत्वं तु पटत्वं अवच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमेव विशेषणविशेष्यभावापन्न
संसर्गो न तु वस्तुगत्या पटत्वावच्छिन्नं यत्प्रतियोगित्वं तन्मात्रं॥ पटो नेत्यत्र पटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात्॥ अन्य
था प्रतियोगितायां व्यक्तिभिरेव तन्नद्विशिष्टबुध्युपपत्तौ पटत्वादेः तदवच्छेदकत्वमेव न स्यात्मानाभावात्॥ अत एव केचिन्नान्व
पि ग्रंथे वह्निर्नास्तीत्यत्र वह्नित्वतदवच्छिन्नत्वप्रतियोगित्वं च संसर्गमर्यादया भासत इति स्वयमप्युक्तं॥ इत्थमेव च प्रमेयं
नास्ती कंबुग्रीवादिमान्नास्तीत्यादिज्ञाने बाधानां संसर्गकोटावेव प्रतियोगितायां प्रमेयत्वाद्यवच्छिन्नत्वगाहितया प्रमात्वं॥
संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्यैव प्रमात्वघटकत्वात्॥ अन्यथा स्वरूपसंबंधेन प्रमेयत्वाद्यवच्छिन्नप्रतियो
गित्वस्य स्वीकृतया स्वरूपसंबंधेन प्रमेयस्य अभाववद्धर्मिणि अन्वयासंभवेन प्रमात्वानुपपत्तेः॥ स्वरूपसंसर्गेण प्रस
तत्संसर्गमर्यादया भानस्यानंगीकारात्॥ उक्तेन पटत्वावच्छिन्नप्रतियोगित्वसंबंधेन चाभावे प्रमेयसत्त्वेन तादृशसंब
धेन प्रमेयत्वस्य वक्तुमशक्यत्वात्॥ पटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसंबंधेन प्रमेयत्वादिविशिष्ट
स्य अन्वये निराकांक्षत्वाच्च॥ अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमात्वापत्तेः तत्र तु घटत्वावच्छिन्नप्रतियोगित्वसंबंधे
न घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्त्वात्॥ एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्तात्वावच्छिन्नस्य समवाय
नासत्त्ववत् घटत्वाद्यवच्छिन्नप्रतियोगित्वसंबंधेन घटत्वाद्यवच्छिन्नवत्यपि घटाभावस्य नेतादृशसंबंधेन प्रमेयत्वाद्य

च्छिन्नवत्त्वमतः प्रमेयं नास्तीत्यादौ घटत्वाद्यवच्छिन्नप्रतियोगित्वसंबंधेन प्रमेयत्वावच्छिन्नस्यैवाभावांशे प्रमात्वमित्यपि प्रयुक्तं
॥ घटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगितासंबंधेन प्रमेयत्वविशिष्टस्यान्वये निराकांक्षत्वापातात्॥ तादृ
स्यासंभवादिति ध्येयं॥ नीलो घटो नास्तीत्यादौ तु नीलघटत्वस्यान्वयितावच्छेदकत्वे तादृशधर्मावच्छिन्नप्रतियोगित्वमेव
संसर्गो न तु नीलत्वघटत्वादिप्रत्येकावच्छिन्नप्रतियोगित्वं नीलपटस्य पीतघटस्य वाधिकरणे तादृशप्रयोगापत्त्यापत्तेः॥
नीलोपलक्षितस्य घटत्वमात्रस्य अन्वयितावच्छेदकत्वे तु घटत्वावच्छिन्नप्रतियोगित्वमेव तथा॥ संयोगेन घटो नास्तीत्यादौ
तु तृतीयाविभक्तेरवच्छिन्नत्वमर्थः॥ संसर्गीभूतप्रतियोगितायां तदन्वयासंभवात्॥ किंत्ववच्छिन्नप्रतियोगिताकत्वं प्रतियो
गित्वमात्रं वा अवच्छिन्नत्वं संसर्गेण संयोगादेस्तत्रान्वयादेव विशिष्टलाभसंभवात्॥ न चैवं संयोगेन घटाभावस्य समवाये
न घटविशिष्टद्रव्यत्वाभाववत्पासमवायेन कपाले घटो नास्तीति व्यवहारापत्तिः॥ तृतीयांतसमभिव्याहारस्यैतद्रूपस्या
प्रतियोगित्वस्यैव संसर्गतया व्युत्पन्नत्वात्॥ समवायावच्छिन्नघटप्रतियोगिताकाभावस्य च कपालेऽविरहात्॥ अत्र तु घ
टत्वाद्यवच्छिन्नत्वस्येव संयोगादिसंबंधावच्छिन्नत्वस्यापि प्रतियोगितांशे संसर्गमर्यादयैव भानं॥ तृतीयांतसमभिव्याहार
स्य नियामकत्वाच्च नातिप्रसंगः॥ घटानधिकरणं भूतलमित्यादौ तु लक्षणया अधिकरणपदमेव घटाधिकरणपरकं घटपदं
तात्पर्यग्राहकं॥ अन्यथा अनधिकरणपदेन अधिकरणसामान्यभिन्नत्वोक्तौ भूतलेतस्य बाधात् तदन्वयानुपपत्तेः॥ न च घ
टानितरस्यैव अधिकरणस्य भेदस्तत्र नञा बोधनीयः॥ समासांतर्गतनञामुत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः॥ अन्यथा

जा॰ग॰ ४५

नीलो घटो घट इत्यादौ नीलघटान्यस्य घटत्वं नीलप्रमेयः प्रमेय इत्यादौ च नीलप्रमेयान्यस्य प्रमेयत्वं प्रतीयेत ॥ वस्तुतः सं
बंधिकपदस्थले व्युत्पत्तिवैचित्र्यात् प्रतियोगितानवच्छेदकं घटानधिकरणं भूतलमित्यादौ च घटाद्यन्वितस्यैव अधिक
रणादेर्नञो भासते अन्यत्र त्रिपदन्ततत्पुरुषानुपगमेपि घटस्यानाधिकरणं प्रतियोगितायानवच्छेदकमित्यादिरीत्या त्रिप
दन्ततत्पुरुषेणावशिष्टलाभ इति परमार्थः ॥ पीतः शंखो नास्तीत्यादिवाक्यबोधस्तु न शंखत्वावच्छिन्नताप्रतियोगित्व
मवगाहते । तन्मात्रस्यान्वयितानवच्छेदकत्वात् ॥ शंखत्वस्यानिश्चिते धर्मिण्यपि तादृशप्रयोगात् ॥ परं तु पीतशंखत्वा
वच्छिन्नप्रतियोगितात्वेन संसर्गमर्यादया प्रतियोगित्वमवगाहते । नञादिपदानां पदार्थविशिष्टवैशिष्ट्यावगाहित्वा
पस्यापस्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगितात्वेन प्रतियोगितासंसर्गकान्वयबोधजनक
त्वव्युत्पत्तेः ॥ इयांस्तु विशेषो यद्घटो नास्तीत्यादिज्ञाने सांसर्गिकी प्रतियोगित्वावगाहिता प्रसिद्धेन घटत्वाद्यवच्छिन्नप्रति
योगितात्वेनैव निरूपिता ॥ पीतः शंखो नास्तीत्यादौ तु पीतशंखत्वावच्छिन्नप्रतियोगितात्वेनाप्रसिद्धेनैवेत्यादिकं बहुत रामः ५
रमूहनीयम् ॥ ॥ साध्यासामानाधिकरण्यपदस्य साध्यवच्छिन्नवृत्तिताघटकत्वे साध्यवैयधिकरण्यमित्यादिद्वितीयलक्षणे
न पौनरुक्त्यापत्तिरतो व्याचष्टे ॥ साध्यमसमानाधिकरणं यस्येति तत्त्वमिति परेणान्वयः ॥ वह्निमात्रस्यैव व्यधिकरणतत्र
धूमासमानाधिकरणत्वात् वह्निमान् धूमादित्यादावव्याप्तेरग्रहः ॥ यदधिकरणेति ॥ यदधिकरणमनधिकरणं यस्येति
व्युत्पत्त्या यस्याधिकरणं साध्यानधिकरणं तत्त्वमित्यर्थः ॥ तत्र धूमाधिकरणं तु न वह्निसामान्यानधिकरणमतो नाव्या

प्तिरिति भावः ॥ ननु घटादिस्वरूपं यद्धूमाधिकरणं साध्याभूतधूमाद्यनधिकरणं तद्वृत्तितानधिकरणत्वं वह्न्यादेरप्यतो धूमवं
न् वह्नेरित्यादौ अतिव्याप्तिः ॥ यद्यद्धूमाधिकरणं साध्यानधिकरणं तत्तद्वृत्तितानधिकरणत्वोक्तौ तु महागौरवमत आह ॥ सा
ध्यनिष्ठेति ॥ साध्यनिष्ठाभावप्रतियोगित्वं सद्धेतावप्यस्तीत्यतः सामानाधिकरण्याभाव उक्तः ॥ न च साध्यनिष्ठस्य सामाना
धिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्य एव वर्त्तते न तु वह्न्याद्यावृत्तिसद्धेतावतिव्याप्तिः ॥ साध्यनिष्ठाभावप्रतियो
गिहेतुत्वन्निरूपकाधिकरणवृत्तित्वस्य विवक्षितत्वात् ॥ वस्तुतः असामानाधिकरण्यं सामानाधिकरण्यसंबन्धेनाभावः सा
मानाधिकरण्याभाव इति परमार्थः ॥ नैवं द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः ॥ सामानाधिकरण्याभावस्य व्याप्यवृत्तित्वेन
साध्येऽसत्त्वात् ॥ एतद्दूषणरसेन कल्पान्तरानुसरणं तु इति ॥ नन्वेवमपि वह्निमान् धूमादित्यादि विषमव्याप्तहेतावव्याप्तिः
वह्निनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमस्य वर्त्तमानत्वात् ॥ साध्यसामा
न्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह ॥ साध्यनिष्ठाधेयतेति ॥ आधे
यत्वं साध्यताघटकसंबन्धेन ग्राह्यं तेन रूपवान् महाकालत्वादित्यादौ संबन्धसामान्येन रूपनिष्ठाधेयतानिरूपके गगना
दौ हेतोर्वृत्तित्वेपि नातिव्याप्तिः ॥ तद्वृत्तौ ॥ साध्यवन्निष्ठवृत्तौ ॥ तथा च द्रव्यं सत्त्वादित्यादौ नातिव्याप्तिरिति भावः ॥ ननु साध्यनि
ष्ठाधेयतानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुताघटकसंबन्धेन वाच्यं अन्यथा वह्निनिष्ठाधेयतानिरूपकस्यावयवस
मवायादिना धूमादेः सत्त्वादव्याप्त्यापत्तेः तथा च सत्तावान् द्रव्यत्वात् धूमादित्यादावव्याप्तिः साध्यनिष्ठाधेयतानिरूपके

जा.ग. जात्यादौ समवायेन संयोगेन वा वृत्त्यप्रसिद्धेः । किंच द्रव्यं विशिष्टसत्त्वादित्यादाव् अव्याप्तिः द्रव्यत्वनिष्ठाधेयतानिरूपकगुण
४६ दिवृत्तित्वस्य विशिष्टसत्तायामसत्त्वादित्यत आह ॥ साध्यनिष्ठेति ॥ धूमनिष्ठाधेयतानिरूपके जलादौ वह्न्याद्यधिकरणत्वाभा
वस्य सत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो व्यापकेति ॥ व्यापकत्वं तु प्रतियोगिवैयधिकरण्याघटितमेव ग्राह्यं ॥ तेन संयोगेन व
ह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभावस्य तत्रापि पर्वतादौ वृत्तित्वेपि नातिव्याप्तिः ॥ वह्न्यधिकरणत्वगगनत्वाद्यवच्छिन्नोभ
याभावस्य धूमनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदं ॥ तथा च हेतुतावच्छेदकसंबंधेन य
द्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वं तदेव तत्त्वमर्थः ॥ तेन वह्निनि
ष्ठाधेयतानिरूपकाधिकरणजलादेः कालिकादिसंबंधेन धूमाधिकरणतायाः सत्त्वेपि नाव्याप्तिः ॥ न वा वह्न्यधिकरणत्वा
भावस्यापि प्रमेयत्वादिना धूमनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वेतिव्याप्तिः ॥ ननु हेतुतावच्छेदकसंबंधेन
यद्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणत्वव्यापकत्वमित्यस्यैव सम्यक्त्वे अधिकरणतात्पर्यंते वैयर्थ्यमिति वाच्यं ॥ हे राम:
त्वनियामकसंबंधेन हेतुतायामव्याप्तिप्रसंगात्तादृशसंबंधावच्छिन्नप्रतियोगिताया असिद्धेः ॥ अस्माकं तु तादृशसंबंधेन य ६
द्धेतुसंबंधितं तत्स्वरूपसंबंधावच्छिन्नाभावमादाय लक्षणसंभवात् ॥ किंचाधिकरणत्वाप्रवेशे वह्न्यादेः साध्यत्वे संयोगादि
संबंधेन रूपादिहेतावतिव्याप्त्यापत्तेः ॥ संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयतानिरूपकाधिकरणत्व
व्यापकत्वादिति भावः ॥ साध्यवद्भिन्नेति ॥ अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वं निष्कर्षो

ऽध्यः ॥ तेन सत्तावान् द्रव्यत्वादित्यादौ नाव्याप्तिः ॥ ननु प्रागुक्तार्थस्य शब्दांतरेणाभिधानमनुवादः स चात्रासंभवी साध्यं य
दधिकरणानधिकरणं तत्त्वानधिकरणत्वस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्य च प्रागुक्तस्य साध्यानधिकरणानधिकर
णत्वशब्देनाबोधनादित्यत आह ॥ परमेति ॥ तत्ताधिकरणत्वाभावेन तत्ताभावस्य च प्रवेशाद्वैयर्थ्यमसंभवीत्यत उक्तं अनतिप्रयोजने
ति ॥ तथा च गुरुतरलक्षणे वा तस्य साध्यं यदधिकरणानधिकरणत्वं तत्त्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव एव नातात्प
र्यात् प्रागभिहितार्थस्य शब्दांतरेणाभिधानमेवानुवादः स चात्र संभवत्येवेति भावः ॥ साध्यमित्यादि ॥ साध्यानधिकरणेत्यादौ सा
ध्यवद्भिन्नव्युत्पासेन च रसाधिकरणत्वादेर्नसहअन्वयादेव तल्लाभ इत्याशयः ॥ केवलान्वयिनीति ॥ अव्याप्तिरिति परेणा
न्वयः ॥ अव्याप्तौ हेतुमाह ॥ साध्यनिष्ठेति ॥ नानाव्यक्तिसाध्यके चेति मूलोक्तं धूमहेतुमभिप्रेत्य ॥ तेन शब्दवान् गगनत्वादित्या
दौ नानाव्यक्तिसाध्यकाव्याप्तिविरहेपि न क्षतिः ॥ न्यूनतां परिहरति ॥ क्वचिदिति ॥ विशिष्टसत्तावान् जातेरित्यादौ अतिव्याप्तेरित्य
र्थः ॥ विशिष्टधूमावच्छिन्नाधिकरणत्वस्यैव तद्वह्निनिष्ठाधेयत्वस्यानतिरिक्तत्वादिति भावः ॥ यत्किंचिदिति ॥ साध्यवृत्तिकिंचिद्व्य
क्तित्वावच्छिन्नेत्यर्थः ॥ नानाधिकरणसाध्यक इति ॥ यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः ॥ तेन कस्यां
श्चिद्व्यक्तेर्नानाधिकरणवृत्तित्वविरहेपि न वह्निसाध्यकधूमाद्यसंग्रहः ॥ सर्वत्रेति ॥ केवलान्वयिनि तद्भिन्ने च ॥ सार्वभौममततुल्या
पत्तिः ॥ केचित्त्विति ॥ हेत्वधिकरण इति ॥ सप्तम्यर्थोवच्छेद्यत्वं तच्च साध्यवद्वृत्तित्वाभावेन्वितं ॥ तेनैवेति ॥ हेतुतावच्छेदकसंबंधेने
वेत्यर्थः ॥ तत्संबंधेन साध्यवद्वृत्तित्वेन सहान्वयः ॥ साध्यवत्त्वमपि येन संबंधेन येन रूपेण साध्यता तत्संबंधेन तद्रूपावच्छिन्नवत्त्वं

ग्रा.ग.
५७

बोध्यं॥तेन समवायेन वह्नेः साध्यत्वे धूमे विशिष्टसत्त्वसाध्यके सत्त्वाद्धेतोर्नातिव्याप्तिः॥तदधिकरणभिन्नत्वमिति॥तद्वृत्तिताभाववतो
कोचवद्द्रव्यं सत्त्वादित्यादावतिव्याप्तिः॥गुणाद्यवच्छेदेन द्रव्यवृत्तिताभावस्यैव द्रव्यावच्छेदेन सत्तायामभावस्य सत्त्वात् अतो भिन्नत्वप
र्यन्तानुसरणं॥भेदस्तु नाव्याप्यवृत्तिः॥तद्व्याप्यवृत्तित्वेन तादृशवृत्तिताभाववतो यावतो व्यक्तिभेदकूटवत्त्वं वक्तव्यमिति भा
वः॥हेतुतावच्छेदकसंबंधेन हेत्वधिकरण इत्यस्य फलमाह स्वावयवसंयोगेनेति॥अन्यथा वृपि नक्षति रित्यन्वयः॥तथा च तादृ
शसंबंधेन हेत्वधिकरणत्वाप्रवेशे स्वावयवावच्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्ता वह्निमान्धूमादित्यादावव्याप्तिः स्यादनु
नरसंभवः इदं वाच्यं ज्ञेयत्वादित्यादावक्ष्यमाणसंभवादिति भावः॥अत्र चोत्पत्तिकालावच्छिन्नघटे पृथिवीत्वे रूपवद्वृत्तित्वेनैव्या
दिप्रतीत्या घटाद्यवच्छेदेन पृथिवीत्वादौ रूपवद्वृत्तिताभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यं॥तेन रूपवा
न्पृथिवीत्वादित्यादौ नाव्याप्तिः तत्र घटनिष्ठावच्छेदकत्वस्य उत्पत्तिकालेनावच्छिन्नत्वादिति ध्येयं॥तेनैवेत्यस्य फलमाह॥वह्निमति
च समवायेनेति॥हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तितानुक्तौ हि संबंधसामान्येन हेत्वधिकरणवृत्तिसाध्यवद्वृत्तित्वसामान्या
भावो न प्रवेश्यः॥साधनाधिकरणवृत्तितादृशाभावस्याप्रसिद्धेः किंतु यत्किंचित्संबंधेन साध्यवद्वृत्तित्वस्याभावः प्रवेशनीयः ७
॥तथा च हेत्वधिकरणपर्वताद्यवच्छेदेन धूमादौ वह्निमत्समवेतत्वाद्यभावस्य सत्त्वादसंभवः स्यात् यदि तेनैव संबंधेन साध्यव
द्वृत्तित्वप्रवेशो न स्यादिति भावः॥ननु हेत्वधिकरणवृत्तितद्विशिष्टस्य साध्यवद्वृत्तिताभावस्याधिकरणाप्रसिद्ध्या लक्षणमिदमसं
भवि॥तदधिकरणस्यैव तन्निष्ठधर्मावच्छेदकतया गगनजन्यत्वादौ वह्निमत्पर्वतसंयुक्तताभावस्य धूमवत्पर्वतानवच्छेद्यत्वादत

व्याह॥तादृशाभावश्चेति॥हेत्वधिकरणवृत्तिसाध्यवद्वृत्तिताभावश्चेत्यर्थः॥संबंधांतरेण॥हेतुतावच्छेदकान्यसंबंधेन॥तथा
च हेतुमत्पर्वताद्यवच्छेदेन तद्विशिष्टस्य वह्निमत्संयुक्तताभावस्याधिकरणत्वं पर्वतरूपादावेवाप्रसिद्धमिति भावः॥यद्यपि रूपादेर्व
ह्निमत्संयुक्तताभावस्याव्याप्यवृत्तित्वात्तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरेकत्र वृत्त्यर्थमेवावच्छेदकत्वस्वीकार इत्यप्रसिद्धिर्ना
दवस्थ्यं॥न च महानसादिसंयुक्ते कालिकादिसंबंधेन पर्वतनिष्ठघटादौ वह्निमत्संयुक्तताभावस्य पर्वताद्यवच्छेदेनत्वप्रसिद्ध्या न दो
ष इति वाच्यं॥इत्थमपि एतद्रूपवानेतद्रसादित्यादौ एतद्रसाधिकरणावच्छेदेन एतद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्दुर्वारत्वात्॥त
थापि पर्वतावच्छेदेन तादृशपदेन वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्यभिधानं॥हेतुतावच्छेदकसं
बंधेन साध्यवद्वृत्तिताभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वं वा ग्रंथतात्पर्यं॥तथा च व्याप्यवृत्तेरवच्छेदकत्वाभावेऽपि सा
ध्यवद्वृत्तिताभावविशिष्टस्य तस्याधिकरणत्वमादाय लक्षणसंगतिः॥नन्ववस्तुगत्या साध्यवद्वृत्तिताभावविशिष्टस्य यस्याधिकर
णं हेत्वधिकरणं तदन्यत्वोक्तौ वह्निमान्धूमादित्यादावव्याप्तिः॥स्वावयवावच्छेदेन वह्निमत्संयुक्तताभाववतो धूमस्याधिकरणता
याः सा धूमवत्पर्वतादौ सत्त्वात्॥साध्यवद्वृत्तिताभावविशिष्टयत्किंचिद्धर्मावच्छिन्नाधिकरणत्वं हेतुमति तदन्यत्वोक्तौ तु वह्निमान्धूमादि
दं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवासंभवः॥साध्यवदसंयुक्तत्वादिविशिष्टतद्रूपादिव्यक्तित्वस्य गुरुतया तदवच्छिन्नाधिकरणताप्र
सिद्धेः॥केवलस्यातिप्रसंग एव विशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादिति वाच्यं॥सार्वभौमाणां मते प्रतियोगिता
याश्चाधिकरणताया अपि गुरुधर्मावच्छेद्यतोपगमात्॥अन्यथा समवेतत्वादिकमपेक्ष्य सत्तावत्समवेतत्वस्य गुरुतया सा

जा॰ग॰ ४८ ध्यवद्वृत्तित्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या सत्तावान् द्रव्यत्वादित्यादावव्याप्तिप्रसंगात्॥ ननु साध्यसामानाधिकरण्यवत्त्वेन
तद्भाववत्त्वमतो द्रव्यसत्त्वादित्यादौ व्यभिचारिण्यपि तिप्रसंगादित्यत आह॥ व्यभिचारिण्यपीति॥ तादृशीति॥ हेतुतावच्छेदकसंबंधेन
हेतुमतीत्यर्थः॥ तादृशाभाववत्त्व॥ साध्यवद्वृत्तित्वाभाववत्त्व॥ ब्रह्मैवानुभवं प्रमाणयति॥ सत्तायामित्यादि॥ एकां सत्तायामपि द्रव्य
त्वसामानाधिकरण्यविरहे॥ विशिष्टसत्त्वेति॥ विशिष्टसत्त्वशब्दप्रतिबोध्यत्वादित्यर्थः॥ यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तो
अव्याप्याव्यंशांकापायमुक्तरग्रंथेन तद्दनिरासात् संगत्यापत्तेः॥ अतिरिक्तत्वादिति॥ विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः॥ तथा च गुण
दिकं न हेत्वधिकरणमतो नाव्याप्तिः॥ उभयत्वमपि एकविशिष्टापरत्वमेव तच्चातिरिक्तमेव नातः स्पर्शवान् भूतत्वमूर्तत्वोभयस्मादि
त्यादावव्याप्तिरिति भावः॥ यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणत्ववच्छेदेन तुक्तावपि विशिष्टसत्तादिहेतौ नाव्याप्तिः॥ नन्व
धूमाधिकरणमहानसावच्छेदेन पर्वतीयधूमे वह्निमत्त्वं पुष्कलाभावस्य वाजनीत्यायेन सत्त्वादव्याप्तिः॥ महानसादेरपि कापि
कादिसंबंधेन पर्वतीयधूमाद्यधिकरणतानेनसाध्यवद्वृत्तित्वाभाववत्त्वा याम वच्छेदकतादितिवाच्यं स्वावच्छिन्नाधिकरणाव रामः ८
च्छेदसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्र धूमत्वधर्ममादायैव धूमादौ लक्षणसंभवेन धूमत्वस्य
हेतुतानवच्छेदकत्वेपि क्षत्यभावात्॥ तथापि विशिष्टस्यातिरिक्तत्वात्तत एवाव्याप्तिवारणसंभवे हेतुतावच्छेदकावच्छिन्नाधिकर
णत्वप्रवेशे गौरवमसंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः॥ एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे तद्रूपेण कथायां हेतो
रुपन्यासो न स्यादित्याशयः॥ ननु विशिष्टस्यातिरिक्तत्वे मानाभावः॥ न च गुणेन विशिष्टसत्तावानिति प्रतीत्यभाव एव मानं॥ गुणस्य

विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसंभवात्॥ न च विशिष्टसत्तानिरूपिताधिकरणत्वं यद्यतिरिक्तं तदा
विशिष्टमेवातिरिक्तमस्तु विशिष्टाधिकरणतायाः क्लृप्ताधिकरणस्वरूपत्वाभ्युपगमात्॥ किं च विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्ट
सत्तावदिति निर्णये दृश्यायामपि द्रव्यं न सत्तावदिति प्रत्ययप्रसंगः॥ सत्ताभावे बुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्ता
त्वावच्छेद्येन विरोधितान्तरकल्पने गौरवात्॥ एवं विशेषणविशेष्योभयग्राहकसामग्र्या विगमेपि विशिष्टग्रहप्रसंगः॥ तदुभय
ग्राहकसामग्र्या विशिष्टस्य ग्रहहेतुत्वकल्पनेपि गौरवं तत्र स्फुटमेवेत्यत आह॥ अनतिरिक्तत्वेविति॥ गुरुत्वं वस्तु विशिष्टस्यातिरि
क्तत्वादिति ग्रंथस्य विशिष्टनिरूपिताधिकरणत्वस्य अतिरिक्तत्वादित्यर्थः॥ तथा च हेतुतावच्छेदकविशिष्टहेत्वधिकरणत्ववच्छेदेन
तादृशवृत्तित्वाभाववत्त्वमपि निवेशितमतो नाव्याप्तिरित्याशयः॥ ननु विशिष्टाधिकरणत्वं यदि नातिरिक्तं विशिष्टसत्तावानिति
प्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवोपपत्तेः॥ अन्यथा विशेषणाभाववन्निर्णयदशायामपि विशिष्टसत्ताव
त्त्वप्रतीत्यापत्तेः॥ विशिष्टवत्त्वबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबंधकतायाः स्वातंत्र्येण कल्पनादित्युच्यते तदाप्याह॥ अनतिरि
क्तत्वेपीतीति भावः॥ विशेषणेति॥ विशेषणं गुणकर्मान्यत्वं विशेष्यं सत्ता तयोः सामानाधिकरण्यात्मकसंबंधस्येत्यर्थः॥ साक्षा
त्संबंधेन तस्य व्यभिचारित्वादाह॥ परंपरयेति॥ अवच्छेदकताख्यस्वरूपसंबंधेनेत्यर्थः॥ सत्त्वगुणकर्मान्यत्वयोः द्रव्ये सामा
नाधिकरण्यमिति प्रतीत्या अवच्छेदकतासंबंधेन तदुभयसामानाधिकरण्यस्य द्रव्ये एव सत्त्वान्न व्यभिचार इति भावः॥ नन्वेवं तेप
त्वाधिकरणं घटावच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य घटापरूपादेः सत्त्वात्तादृशाधिकरणभिन्नत्वमस्त्येव तेपत्वादिहेतौ इत्यग्रे के

वलान्वयिन्यव्याप्तिप्रदर्शनमसंगतं अत आह॥ केवलेति॥ द्वितीयेति॥ तत्र साध्यवद्भिन्नत्वस्याप्रसिद्धत्वादिति भावः॥ यद्यपीदं
वाच्यं प्रमेयादिसाध्यको तादात्म्येन केवलान्वयिहेतौ प्रथमलक्षणेऽव्याप्तिः संभवति॥ प्रमेयत्वावच्छेदेन वाच्यत्ववत्तादात्म्यकत्वविरहे
णाऽप्रसिद्धेः॥ न च घटत्वावच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः॥ तथा सति घटत्वं घटेन वाच्यमित्यपि प्रतीत्यापत्
तेः॥ तथापि स्वाधिकरणनिरूपितहेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वाभावो लक्षणघटक इत्यभिप्रायेण द्वितीयाभिधानं
॥स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मकहेत्वधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येन वाच्यत्ववत्तादात्म्य
कत्वाभावस्य पटावच्छेदेन पटादावेव प्रसिद्धेः॥ वस्तुतस्तु॥ केवलान्वयित्वं वृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रं न तु वच्छेदक
गर्भं॥ तथा च तादात्म्येन किंचिदपि प्रमेयं न केवलान्वयीति द्वितीयलक्षण एव तादृशकेवलान्वयिन्यव्याप्तिसंभवात् पद्यश्रुत
मेवासम्यगिति ध्येयं॥ नव्यास्तु॥ केवलान्वयिनि चाव्याप्तेरिति॥ केवलान्वयिसाध्यकाव्याप्तेरभिधानं द्वितीयलक्षणेऽभिप्राय
णेत्यर्थः॥ प्रथमलक्षणे पुनः क्वचित्केवलान्वयिनि तादात्म्येन प्रमेयादिहेतावव्याप्त्यापि न क्षतिरित्याहुः॥ सत्तायां गुणेन द्रव्यत्व
सामानाधिकरण्यमिति प्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकताभावं गुणेऽवगाहते इत्यत्र समानाकारप्रती
तिं दृष्टांतयति॥ द्रव्यत्वे गुण इत्यादि॥ ननूक्तप्रतीतिर्गुणावच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधिकरण्याभावविषयः॥ गुणस्य द्र
व्यत्वानधिकरणतया तन्निष्ठवृत्तित्वाभावावच्छेदकत्वासंभवात्॥ किंतु द्रव्यत्वनिष्ठपृथिवीत्वसामानाधिकरण्यं तदवच्छेदकता
भाव एव गुणो विषय इति तद्दृष्टांत्यमपि इति भावः॥ अवच्छेदकताभावमिति॥ प्रात्यक्षिकप्रत्ययाभिप्रायेणेदं सत्तायां गुणेन द्र

व्यत्वसामानाधिकरण्यमित्यादिप्रत्यक्षस्थलेऽवच्छेदकत्वोपस्थापकपदांतरविरहात्तदभावस्य गुणादौ बोधयितुमशक्यत्वात्॥
किंतु सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यं न गुणावच्छेदेनेत्याकारक एव बोधः॥ गुणेनेति त्वंशस्तृतीयार्थस्य गुणावच्छिन्नत्वस्य नञर्थे
ऽन्वयादिति ध्येयं॥ नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुध्येत सामानाधिकरण्यस्याव्याप्यवृ
त्तित्वेन तदवच्छेदकत्वस्याप्रसिध्या तादृशावच्छेदकताभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्चेत्यत आह॥ परंपरासंबंधेनेति॥ नि
रूपकताख्यस्वरूपसंबंधेनेत्यर्थः॥ न त्ववच्छेदकताख्यस्वरूपसंबंधेनेत्यर्थः॥ सत्तायां द्रव्येन द्रव्यत्वसामानाधिकरण्यमित्यपि प्र
तीतिप्रसंगात्॥ सामानाधिकरण्यस्याव्याप्यवृत्तितया अवच्छेदकतासंबंधेनात्र स्यासत्त्वात्॥ नन्विति॥ तथा च द्रव्यत्वसत्त्वादित्या
दावतिव्याप्तिरिति भावः॥ ननूक्तदृष्टांतस्थले बाधकसत्त्वादवच्छेदकताभावोक्तप्रतीतेर्विषयः॥ प्रकृते तु साक्षात्सामानाधिकर
ण्याभावविषयकत्वे न किंचिद्बाधकमस्तीत्यतो बाधकमाह॥ सत्तानेति॥ तथा च सत्तायां द्रव्यवृत्तित्वावच्छिन्नाभावसत्त्वे द्रव्य
वृत्तित्वाभाववद्भिन्नत्वधीस्तत्र न स्यादिति भावः॥ ननु द्रव्यवृत्तित्वाभाववद्वत्तद्भेदोऽप्यव्याप्यवृत्तिरेवास्तु॥ तथा च द्रव्यगुण
त्मकविभिन्नावच्छेदकावच्छेदेन सत्तायां तयोः समावेशात् कुतो विरोध इत्यत आह॥ द्रव्यवृत्तित्वाभाव इति॥ नन्वेवं वृक्षो मूले कपि
संयोगी नेति प्रतीत्या वृक्षादौ संयोगाभावोऽपि न सिध्येत् तत्रापि वृक्षनिष्ठसंयोगावच्छेदकताभावस्य मूलेऽवगाहनसंभवादित्यत आ
ह॥ बाधकाभावादिति॥ संयोगाभावो न वृक्षवृत्तिरित्यादिप्रत्ययस्य तत्रासत्त्वादिति भावः॥ ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरि
त्यादिप्रतीतिरेवासिद्धा द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरित्यपि प्रत्ययादेकदेशोपस्य कर्तुमशक्यत्वादतो दोषांतरमाह॥ अ

जाग॰ तीन्द्रियेति ॥ मनस्त्ववद्गुणत्वादित्यादावित्यर्थः ॥ तत्र ॥ अतीन्द्रिया मद्धेतौ ॥ ननु प्रत्यक्षासंभवे पक्षत्वं मनस्त्वसामानाधिकरण्य
५० भाववन्मनस्त्वाभाववद्वृत्तित्वात् घटत्ववदित्यनुमानादेव तत्र सामानाधिकरण्याभावस्यापि प्रतीयत इत्यत आह ॥ न चेति ॥ तद्वृत्ती
ति ॥ साध्यवद्वृत्तिभिन्नत्वमित्यर्थः ॥ तथा चोक्तानुमाने मनोवृत्तिभिन्नत्वमुपाधिः ॥ तस्य च साध्यव्यापकत्वं घटतादौ साधनाव्या
पकत्वं द्रव्यत्वादौ ग्राह्यं ॥ भेदस्याव्याप्यवृत्तित्वे तु साध्यवद्वृत्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः ॥ ननूक्तोपाध्यप्रतिसंधानद
शायामुक्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिस्तत्र भेदविघ्नाति ॥ अन्यथा व्याप्त्यंतरस्यापि तत्रातिप्रसंगादत आह ॥ किंचेति ॥ इद
मित्यादि ॥ तथा च कालो गोमान् गोत्वादित्यादौ कालिकसंबंधेन हेतावव्याप्तिः ॥ तेन संबंधेन हेतुमति महाकाले तेन संबंधेन काल
वृत्तिताभावस्य कुत्राप्यसत्वात् ॥ न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तिताभावस्य प्रसिद्धिः ॥ कालस्य गगनाद्यनधिकरणत्वे
न तन्निष्ठवृत्तिताभावे कालावच्छेद्यत्वासंभवात् ॥ कालिकसंबंधेन गगनादेर्वृत्तिमत्वस्वीकारे गगनस्यापि गोत्वाधिकरणत्वेनाक्षे
णावच्छेदेन कालवृत्तिताभावस्य तत्र तत्क्षणसमानकालीनतत्क्षणगोचरज्ञाने प्रसिद्धिः ॥ तत्तत्क्षणस्यापि विषयतया स्वविषयक
ज्ञानाधिकरणतया तन्निष्ठतादृशवृत्तिताभाववत्तापामवच्छेदकत्वसंभवात् ॥ तथापि महाकाल एव कालिकसंबंधेनाधिकरणं रामः १०
उपाधीनां तु तद्वृत्तितापामवच्छेदकत्वमात्रमिति प्राचीनसिद्धान्तमनुरुध्येदं ॥ महाकालनिरूपितविशेषणतया वा हेतावव्याप्ति
रिष्टव्या ॥ इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतापर्यायविशेषः तेन हेतुतापामितिव्याख्यपातादृशविशेषणतायाः
प्राप्तेः सामान्यत एव विभिन्नकालीनयोराधाराधेयभावइतिमतेनानुपपत्तिगोऽपि ॥ क्षणानां स्वासमानकालीनत्वानस्याविषय

तयाप्यनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवद्वृत्तिताभावप्रसिध्यसंभवादिति ध्येयं ॥ अत्र हेतुतावच्छेदकसंबंधेन स्वाधिकरणे
स्वनिरूपितहेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तिताभावस्य विवक्षणान्न कोऽपि दोषः साधनीभूतगोत्वाधिकरणमहाकालावच्छे
देन गोत्वनिरूपितकालिकसंबंधेन साध्यवद्वृत्तिताभावस्य घटादावेव प्रसिद्धत्वात् ॥ साध्यसामानाधिकरण्यं तु धूमवदवच्छिन्ना
धिकरणावच्छेद्यहेतुवृत्तिकात्यंताभावप्रतियोगितानवच्छेदकतद्धर्मवत्वं वा विवक्षितं ॥ इत्थं च वाच्यं प्रमेयादित्यादौ प्रमेयव्यक्तीनां
भेदेऽपि न व्याप्तेर्भेद इत्यस्य गुरुत्वं चरणं ॥ केचित्तु ॥ स्वनिरूपितसाध्यवद्वृत्तित्वहेत्वधिकरणावच्छेद्यतद्भावाधिकरणभिन्नत्वमित्यर्थः
॥ तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नत्वं च कावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः ॥ साध्यवद्वृत्तिताभावाधिकरणत्वसामान्यप
र्याप्तत्वपर्याधिकरणावच्छेद्यतोभयाभाववत्तत्वव्याप्तिः ॥ पर्वतीयरूपादिनिष्ठपर्यवसानावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणत्वं
तत्र धूमनिष्ठं पत्र धूमनिष्ठेन तत्धूमाधिकरणावच्छेद्यं अधिकरणभेदेनाधिकरणताभेदात् ॥ अन्यथा पर्वते नदीयरूपेन वह्निमत्सं
वत् युक्तत्वमिति प्रवर्तते धूमे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यापत्तेः ॥ अतो वह्निमान् धूमादित्यादौ नाव्याप्तिः ॥ व्याप्यवृत्तेरवच्छेदकता
स्वीकारे तु तादृशाभावाधिकरणत्वसामान्यपर्याधिकरणावच्छेद्यत्वसामान्याभावत्वमित्येव वाच्यमित्यादिकं पुनरुद्धरत्वादुपेक्षि
तं ॥ वाच्यत्वादिसाध्यके तादृशान्यन हेतावव्याप्तेश्च ॥ वाच्यत्ववत्ताहान्याभावाप्रसिद्धेः एतेन सत्तायां कर्मणि न द्रव्यत्वसामानाधिकरण्य
मिति प्रतीतेः कर्मण इव कर्मसत्तयोः समवायस्याप्यवच्छेदकत्वं भासते ॥ अन्यथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यपि
प्रतीत्यापत्तेः एकाजस्य कर्मानतिरेकात् ॥ एवं च यद्धेतुव्यक्त्यधिकरणीयहेतुतावच्छेदकसंबंधे साध्यवद्वृत्तिताभावावच्छेदकत्वं नास्ति

जाग॰ तत्वमर्थः॥ काले गोमान् गोत्वादित्यादौ कालवृत्तित्वाभाववद्वृत्तेः कत्वस्य व्यत्वादिनिष्ठात्यन्तसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिक
५१ रणीय कालिकसंबंधेनावचिरहान्न व्याप्तिरित्यपि निरस्तमिति संक्षेपः॥ ॥ननु इच्छारेखारूपस्य वाच्यत्वस्य गुणत्वादिसमवायित्वात्स
मवायित्वं न तद्यधिकरणधर्म इत्यत आह॥ वाच्यत्वमिति॥ अस्मात् शब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छाविषयत्वं पदार्थान्तरं वा वाच्य
त्वं न तु तादृशेच्छामात्रं अतिप्रसक्तत्वात् तच्च न कस्यापि समवायीति भावः॥ समवायितत्वेति मूलस्य समवायिकारणत्वेत्यर्थ इत्यपा
हुः॥ नन्विदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्य प्रसिद्धावपि प्रमेयवान् वाच्यत्वादित्यादि केवला
न्वयिनि तदप्रसिद्धेरनुमानासङ्गतत्वमूलस्य न्यूनत्वमतः स्वयमाह॥ प्रमेयेति भावत्वेनेति॥ अभावो नाम भावः सर्वत्र सुलभ इत्यन्वयः॥ ननु
भावत्वेनाभावो नास्तीति प्रतीतिरभावस्यैव वस्तुभावत्वेनाभावो नास्तीति प्रतीतिः भावस्यैव प्रतियोगित्वमवगाहते न चैतावता प्रमेयमात्र
प्रतियोगिकाभावसिद्धिरत आह॥ वह्नित्वेनेति॥ वह्नित्वेन निर्वह्नौ सर्वेषामभावः सुलभ इति योजना॥ ननु जले वह्नित्वेन प्रमेयं नास्तीति
प्रतीतिर्वह्निमात्रप्रतियोगिकाभावमवगाहते न तु प्रमेयसामान्यप्रतियोगिकत्वाद्यवगाहमतिताद्दृशप्रतीत्यनुपपत्त्या वह्निप्रतियोगिका रामः
भावावगाहित्वस्यावश्यकता इत्यत आह॥ अवृत्तीति॥ तथा च गगनत्वेन प्रमेयं नास्तीति प्रतीतिरेव प्रमेयसामान्याभावसिद्धिः न हि त ११
त्रापि गगनमात्रप्रतियोगित्वं भासत इति वक्तुं शक्यते विनिगमनाभावेन प्रमेयमात्रप्रतियोगिकत्वावगाहने बाधकाभावात्॥ का
लिकसंबंधेन गगनत्वावच्छिन्नस्य प्रमेयस्य सर्वत्राभावः संभवतीत्यत उक्तं॥ अवृत्तिमात्रवृत्तीति॥ तथा च स्वरूपसंबंधेन गगन
त्वादेर्वृत्तिमात्रवृत्तित्वं तादृशसंबंधावच्छिन्नप्रतियोगितावच्छेदकताको गगनत्वादिना प्रमेयसामान्याभावो वाच्य इति भावः॥ ननु

कालिकादिसंबंधेन प्रमेयसाध्यके तेन संबंधेन साध्याभावस्यैवाप्रसिद्धिः कार्यासाच्च कालिकसंबंधेन गगनत्वेन प्रमेयं नास्तीति प्र
तीत्यासंभवितत्संबंधेन गगनादेर्वृत्तिमत्त्वमतेनादृशप्रतीतेर्गगनप्रतियोगिकत्वावगाहित्वे योपपन्नो प्रमेयान्तरप्रतियोगि
कत्वेनाभावादत आह॥ विरुद्धेति॥ तथा च घटत्वपटत्वाभ्यां प्रमेयं नास्तीति प्रतीत्या निखिलप्रमेयप्रतियोगिकस्तत्राप्यभावः सुलभ
इति भावः॥ इदमुपलक्षणं॥ संयोगादिसंबंधेन घटत्वादिकमपि प्रमेयत्ववद्वृत्तीति तत्संबंधेन घटत्वाद्यवच्छिन्नप्रतियोगिताकप्रमे
यसामान्याभावोपि बोध्यः॥ अप्रसिद्धिदोषस्यापि सत्त्वान्मूले प्रतियोग्यवृत्तिरित्यादिदोषान्तरं किमित्युपात्तमत आह॥ अनन्तरं वदता रूपमात्राकेत
॥नन्विति॥ पारिभाषिकमेवेत्येवकारेण न व्यभिचारो व्यभिचार इति योगार्थो व्यवच्छिद्यते॥ अव्यभिचरितत्वमिति॥ अथेदं वाच्यं ज्ञेया
दित्यत्राभिप्रेतमिति शेषः॥ तथा च न चैवं घट इत्यादिमूलस्य केवलान्वयिनो व्यभिचारित्वेन अलक्ष्यताप्रदर्शनपरत्वान्न पूर्वमूलासंग
तिरित्यध्येयम्॥ श्री॥ यद्वित्यादि॥ अत्र यत्समानाधिकरणे इत्यस्यानुक्तौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्या
त्यन्ताभावस्यापि यावदन्तर्गतत्वात् तस्य च व्यापकता घटत्वसमवायसंबंधेन प्रतियोग्यधिकरणे केनापि संबंधेनावृत्तित्वादय
मात्मत्वानादित्यादावव्याप्तिरस्त्वतदुपात्तमित्यग्रे स्फुटीभविष्यति॥ न चात्मत्वाद्यभावोपि समानकालीनत्वादिसंबंधेन प्रतियोग्यधिक
रणवृत्तिः तथाविधसंबंधानां वृत्त्यनियामकत्वात्॥ कुत्रचिदपि तेन संबंधेन वृत्तिमत्ताप्रतीतेः॥ इत्थं च हेतुसमानाधिकरणत्वमपि
हेत्वधिकरणधेयत्वं ग्राह्यं॥ तेनात्मत्वाद्यभावस्यापि हेत्वधिकरणसंबंधित्वान्नोक्तदोषतादवस्थ्यं॥ ननु हेतुसमानाधिकरणत्वस्य
पक्षपसाध्यसमानाधिकरण्यादौ तस्मादृशाभावः स्वविशिष्टपदार्थावच्छिन्नहेत्वधिकरणवृत्त्येन प्रतियोगिसमानाधिकरण

स्तद्धर्मवत्त्वमित्येव कुतो न लक्षणं कृतमिति वाच्यं॥ द्रव्यमात्मत्वादित्यादौ महाकाले साध्यसमानाधिकरणस्य द्रव्यत्वादिसामा
न्याभावस्य स्वविशिष्टहेत्वधिकरणे प्रसिध्या तत्राव्याप्तिप्रसंगात्॥ पंक्तौ यत्समानाधिकरणाः यावन्तस्तादृशाभावाः साध्यसमा
नाधिकरणस्तत्त्वमित्येवास्तु लक्षणं॥ स्वस्वप्रतियोगिसामानाधिकरण्यस्य प्रवेशे बीजाभावादिति तत्तुच्छं॥ तथा सति पक्षसमा
नाधिकरणो यावन्तोऽभावाः साध्यसमानाधिकरणस्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्र
तियोगिताकत्वस्य व्यर्थतापत्तेः॥ तन्मात्रोक्तौ च विनापि व्यधिकरणधर्मावच्छिन्नाभावं लक्षणसंभवे प्रतियोग्यवृत्तित्वादेर
वतारकतानुपपत्तिः॥ पक्षेपि पक्षसमानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभा
वाः दैशिकविशेषणतयोभयवृत्तयस्तत्त्वमित्येव लक्षणमस्तु॥ स्वस्वप्रतियोगिसामानाधिकरण्यानुप्रवेशो रवात्॥ हेतुसमा
नाधिकरणस्य तत्तद्योगोजकान्यतराभावस्य दैशिकविशेषणतयोभयवृत्तिताभावात् धूमवान् वह्नेरित्यादौ च नाव्याप्ति
विरहादिति॥ तन्न दृं॥ हेतुसमानाधिकरणस्य वह्निसंयोगाद्यन्यकाभावस्य दैशिकविशेषणतयोभयवृत्तित्वविरहेण व
ह्निमान् धूमादित्यादावव्याप्तिप्रसंगात्॥ न च भावभिन्नस्यैव हेतुसमानाधिकरणाभावस्य प्रवेशान्नैष दोषः॥ तथा घटभिन्नघटत्वा
त् इत्यादावतिव्याप्त्यापत्तेः॥ तत्र घटभिन्नत्वाद्यभावस्य तद्दृश्यरूपादिस्वरूपत्वेनभावत्वात्॥ पटत्वादिना तद्घटभिन्नत्वाद्यभाव
स्योभयवृत्तित्वादिति॥ अत्र च हेतुसमानाधिकरणस्तादृशाभावाः स्वप्रतियोगिमत्ताधीविरोधिताघटकसंबंधेनोभयवृत्त
यस्तत्त्वमिति कृतेन काप्यनुपपत्तिरित्यलं पल्लवितेन॥ अत्र च यत्पदं यद्धर्मावच्छिन्नपरं अग्रे च तत्त्वमित्यस्य हेतुतावच्छेदकी

भूततद्धर्मवत्त्वमित्येवार्थः॥ तेन सकलधूमव्यक्तिष्वनुगतायाः वह्निव्याप्तेर्नालाभो न वा ज्ञानवान् मनो मनस्त्वे सति ज्ञात्मनः संयो
गादित्यादौ मनसि हेतुसमानाधिकरणस्यात्यन्तसामान्याभावस्य स्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्धिनि
बंधनाव्याप्तिः॥ पंक्तौ द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ हेतुसमानाधिकरणस्य द्रव्यत्वाद्यभावस्यानुयोगितादव्याप्तिरतोप
त्पदस्य यद्धर्मावच्छिन्नपरत्वमिति॥ तन्न॥ द्रव्यत्वाद्यभावस्यापि कालिकसंबंधेन स्वविशिष्टयद्धेतुतावच्छेदकावच्छिन्नहेत्वधि
करणं जन्यद्रव्यत्वादित्यवच्छेदेन प्रतियोगिसमानाधिकरण्यात्तत्राव्याप्तिविरहात्॥ साध्यतेत्यादि॥ साध्यतावच्छेदकावच्छि
न्नवन्निष्ठाभावप्रतियोगितानवच्छेदकापदभावप्रतियोगितातादृशाभावा इत्यर्थः॥ अत्र च विशिष्टसत्तावान् जातेरित्यादौ वि
शिष्टसत्तात्वावच्छिन्नाभावस्यैव सत्तास्वरूपसाध्यव्यापकतावच्छेदकप्रतियोगिताकतया तस्य च स्वविशिष्टहेत्वधिकरणाव
च्छेदेन प्रतियोगिसामानाधिकरण्यात् नाव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति॥ तथा च द्रव्यत्वाद्यभावस्यैव निरुक्तयावदन्त
र्गतस्यात्यन्तताज्ञाति प्रसंगः॥ साध्यवत्त्वं चात्र साध्यतावच्छेदकसंबंधेन निवेश्यं॥ तेन ज्ञानमात्रस्यैव विषयतासंबंधेन ज्ञा
नवत्ताद्व्रत्वादिना वाच्यत्वाभावस्यैव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वेपि समवायेन ज्ञानस्य सा
ध्यत्वे द्रव्यत्वादि हेतौ नातिप्रसंगः॥ समवायसंबंधावच्छिन्नज्ञानवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकस्या
त्यन्ताद्यभावस्यैव प्रतियोग्यसमानाधिकरणत्वात्॥ अत्र च साध्यवन्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेन विशेषणीयः॥
तेन साध्यवन्मात्रवृत्तिसमवायितावच्छिन्नवाच्यताद्यभावप्रतियोगित्वेन घटाद्यभावस्य सत्त्वेपि न साध्यवन्निष्ठाभावप्रतियो

ज्ञा०ग० गितानवच्छेदकप्रतियोगिताकाभावस्याप्रसिद्धिः॥ इत्थं च तत्संबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदको
५३ यो यस्तदन्यत्वे सति तत्संबंधावच्छिन्नाधेयतावच्छेदकतत्रूपं तत् संबंधेन साध्यव्यापकतावच्छेदकत्वं निरूप्यतादृशव्यापकता
वच्छेदिकाप्रकाभावप्रतियोगितातादृशाभावः प्रवेशनीयाः॥ न च तत्संबंधावच्छिन्नाधेयत्वेत्यादिकं व्यर्थं॥ द्रव्यत्वाद्यभावप्रति
योगितायामपि संयोगसंबंधेन वह्न्यादिव्यापकतावच्छेदकतापत्त्या यावदंतर्गतस्य तत्संबंधेन द्रव्यत्वाद्यभावस्य साध्यव्या
पकताघटकीभूतसंयोगादिसंबंधेन प्रतियोगिसामानाधिकरण्याप्रसिद्ध्या सद्धेतुमात्रएवासंभवस्य वारणार्थं तदुपादाना
त्॥ संयोगसंबंधावच्छिन्नाधेयतस्य द्रव्यत्वादावसत्त्वेन द्रव्यत्वादिनिष्ठप्रतियोगितस्य तादृशाधेयतानवच्छेदकत्वात्॥ तत्सं
बंधेन स्वावच्छिन्नानधिकरणत्वं च तत्संबंधेन स्वावच्छिन्नाधिकरणसामान्यभेदः॥ तेन वह्न्यादिनिष्ठप्रतियोगितावच्छिन्नाधिक
रणगगनोभयभेदस्य घटत्वादिना वह्न्यादिनिष्ठप्रतियोगितावच्छिन्नाधिकरणभेदस्य च वह्न्यादिसाध्यवति सत्त्वेपि न क्षतिः
अभावाइति स्वरूपकथनं॥ वस्तुतः साध्यवन्निष्ठाभावस्य तत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेद
कत्वमेव तत्संबंधेन साध्यव्यापकतावच्छेदकत्वं वाच्यं॥ तत्र च साध्यवन्निष्ठत्वमभावस्य स्वरूपसंबंधेन ग्राह्यं॥ तेन स्पंदः काल राम:। ५३
तादित्यादौ स्पंदत्वाद्यभावस्यापि कालिकसंबंधेन साध्यवन्निष्ठत्वाद्यावदंतर्गतत्वाद्वाच्यत्वाद्यभावस्य च तादृशप्रतियोगिस
मानाधिकरणत्वेपि नातिव्याप्तिः॥ इत्थं च जातिसामान्याभावादेरपि वह्न्यादिव्यापकतया तत्प्रतियोगिताकस्य जात्यादिस्वरूप
स्य हेतुसमानाधिकरणाभावस्य जातिसामान्याभावात्मकप्रतियोग्यसमानाधिकरणतादृशसंभवापत्तिरतोऽभावाइत्युक्तं॥

भावभिन्नाइति च तदर्थः॥ यथा च सामानाधिकरण्येनानवच्छेदकत्वघटितायां व्यापकतायां न दोषस्तथाग्रे प्रपंचयिष्यते॥ न
व्यास्तु साध्यतावच्छेदकेत्यादि॥ साध्यतावच्छेदकावच्छिन्नाधिकरणनियावंति तत्प्रत्येकवृत्तिवृत्तिप्रतियोगिताकेत्यर्थः॥ नन्वे
कमात्रवृत्तिसाध्यकसद्धेतावव्याप्तिः॥ तत्र यावत्त्वस्यानुपादेयतात्॥ त्राहे कस्याकिंचित्करत्वात्॥ यद्वा साध्यतावच्छेदकाव
च्छिन्नसमानाधिकरण्या यावंतस्तत्प्रत्येकसमानाधिकरणवृत्तिप्रतियोगिताकेत्यर्थ इति प्राहुः॥ परे तु॥ साध्यवद्वृत्त्यभावप्र
तियोगितावच्छेदकयत्प्रतियोगिताकेत्यर्थ इति॥ तन्न॥ केवलान्वयिसाध्यकसद्धेतौ तादृशजातेः योगित्वाप्रसिद्ध्याऽव्याप्तेः॥ गग
नस्वरूपाभावस्य तादृशत्वेपि हेतुसमानाधिकरणत्वासंभवादिति॥ अत्र व्यापकतावच्छेदकप्रतियोगिताका इत्यत्र व्यापक
तायामवच्छेदेयपदेति बहुव्रीहिः कप्रत्ययः॥ तेन प्रतियोगितायाः समवच्छेदकस्य समासे कोपधत्वेपि पुंवद्भावः॥ तद्धितवुन्
कोपधस्येव पुंवद्भावनिषेधादित्यभियुक्ताः॥ सर्वत्रेति॥ सद्धेतावसद्धेतावित्यर्थः॥ तथा च यावतानुक्तौ अतिव्याप्तिरेवस्यान्ना
व्याप्तिरिति भावः॥ सकलव्यभिचारिणीत्यर्थ इत्यन्ये॥ केचित्तु॥ सर्वत्रेति सकलहेत्वधिकरणावच्छेदेनेत्यर्थ इत्यप्याहुः॥ वा
च्यत्वाद्यभावस्येति॥ घटत्वादिना वाच्यत्वाभावस्येत्यर्थः॥ तथात्वात्॥ प्रतियोगिसमानाधिकरणत्वात्॥ तथा च धूमवान्वह्ने
रित्यादावतिव्याप्तिवारणार्थमेव यावत्पदोपादानमिति भावः॥ ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावोक्तौ केव
लान्वयिताद्यभावमादायोक्तस्यातिप्रसंगस्य परिहारसंभवात् साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका
भावानां यावत्त्वोपादानं गौरवग्रस्तमत आह॥ अत एवेति॥ निरुक्ताभावयावत्त्वोपादानादेवेत्यर्थः॥ अन्यथाभूतत्वाद्यभा

जाग॰
५४

वस्य साध्यतावच्छेदकव्यापकप्रतियोगिताकान्यतामूर्त्तत्वमूर्त्तत्वोभयत्वावच्छिन्नाभावस्य च तादृशप्रतियोगिताकस्य
स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादिति व्याप्तिः स्यादेवेति भावः ॥ यत्तु साध्यप्रतियोगिकोपात्तं
विशिष्टाभावोपदर्शनं वृत्तिमद्धेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्वधर्मवत्त्वमित्येव लक्षणमस्तु कृतं यावत्त्वगर्भनि
रुक्ता ॥ धूमवान्वह्नेरित्यादौ पर्वतत्वेन धूमाभावस्यापि तादृशहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादतिव्या
प्तिर्दुरुद्धरेत्याशंकाऽतएवेत्यादिकमवतारयति ॥ तन्नेति ॥ तादृशाशंकायां धूमवान्वह्नेरित्यादौ प्रसिद्धस्य तएव वह्निधू
मोभयत्वावच्छिन्नाभावमादायातिव्याप्तिसंभवे भूतत्वमूर्त्तत्वोभयवान्नित्यापत्तेरनुपपादनस्य संदर्भविरोधापत्तेः ॥ यद्यपि यादृशा
भावस्य प्रतियोगिता या व्यापकं साध्यतावच्छेदकं तादृशकश्चित्स्वाभावोपदर्शी वह्निनिष्ठाधिकरणावच्छेदेन प्रतियोगिसमानाधि
करणस्वधर्मवत्त्वं व्याप्तिरित्युक्तौ वाच्यत्वाद्यभावमादायातिव्याप्तिवारणाय यावत्त्वगर्भलक्षणं गौरवग्रस्तमतउक्तं अतए
वेत्यादि ॥ तद्व्यसंगतं ॥ प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन वह्निधूमोभयत्वादेरव्यापकत्वासंभवाद्वह्निधूमो
भयवान्धूमादित्यादावव्याप्तिभयेन तादृशनिरुक्तेः ॥ किन्तु मप्यप्रकाशत्वात् ॥ ननु प्रतियोगिसामानाधिकरण्यमित्यत्र प्रति
योग्यधिकरणत्वं साध्यनिरूपितसाध्यतावच्छेदकसंबंधेन ग्राह्यमित्यलं यावत्त्वनिवेशेनेत्यत आह ॥ अतएवेत्यादीत्यपि व
हेति ॥ न व्याप्यत्वम् ॥ ननु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठयादृशप्रतियोगिताकोपात्तं किंचिदभावोपदधिकर
णावच्छेदेन तादृशप्रतियोगिताश्रयसमानाधिकरणत्वमित्यस्यैव सम्यक्त्वे यावत्त्वगर्भलक्षणे गौरवग्रस्तः ॥ प्रमेय

रामः॰
१४

वान्वाच्यत्वादित्यादौ विरुद्धघटत्वपटत्वोभयगगनाद्यवच्छिन्नप्रतियोगिताकं प्रमेयाभावमादाय लक्षणसंभवात् ॥ गगनादेर्वृ
त्तिमत्त्वलक्षणधर्मत्वाभावात् ॥ प्रतियोगित्वं च सामान्याभावातिरिक्ताभावस्य स्वरूपसंबंधेन प्रत्याश्रयविभिन्नमतो घटत्वप
टत्वाभ्यां प्रमेयमात्रस्याभावमादायैव धूमवान्वह्नेरित्यादौ नातिप्रसंगः ॥ न चानवच्छिन्नान्तं व्यर्थं । वह्निधूमोभयत्वावच्छिन्ना
भावमादाय धूमवान्वह्नेरित्यादौ अतिव्याप्तेर्वारकत्वात्साध्यनिरूपमपि तद्व्यर्थमेव ॥ अन्यथा गगनाद्यवच्छिन्नप्रतियोगिताक
वाच्यत्वाद्यभावमादाय व्यभिचारिमात्रे ऽतिव्याप्त्यापत्तेरित्यत आह ॥ अतएवेति ॥ इत्थं च भूतत्वविशिष्टमूर्त्तत्वाद्यभावस्य सा
ध्यतावच्छेदकातिरिक्तधर्मावच्छिन्नप्रतियोगिताकत्वात्तस्य प्रतियोगिसामानाधिकरण्यं नातिव्याप्तिसंपादकमित्याशयेन
चित्ताद्यवच्छिन्नाभावपर्यन्तस्य प्रतियोगिसामानाधिकरण्याभिधानमपि साधु संगच्छते ॥ परं तु प्रकृतसाध्यव्याप्यतावच्छे
दकप्रतियोगिताकः कश्चिदभावो यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्त्वमेवाव्यभिचारित्वं कुतो नो
क्तं भूतत्वमूर्त्तत्वोभयत्वावच्छिन्नप्रतियोगिताप्रसिद्धेः तादृशोभयात्मकसाध्यव्याप्यतावच्छेदकत्वाभावादेव तादृशोभयाभा
वमादायातिव्याप्त्यसंभवादिति विभावनीयमिति प्राहुः ॥ केचित्तु ॥ ननु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकस्य व्यापकतया साध्यव्याप
कतावच्छेदकप्रतियोगिताकाभाव एव यावत्त्वविशेषणमुचितमित्यत आह ॥ अतएवेति ॥ उक्ताभावयावत्त्वोपादानादेवेत्यर्थ
इति प्राहुः ॥ भूतत्वमात्मभिन्नत्वे सति विशेषगुणवत्त्वं तन्नैव व्यापकतायाः प्रतियोगिवैयधिकरण्याघटितत्वं कस्मिन्भूतत्वमू
र्त्तत्वोभयस्य व्यापकता तादृशोभयवति घटादौ तत्पुनर्भिन्नलक्षणावच्छेदेन विशेषगुणत्वाद्यवच्छिन्नाभावसत्त्वादतउक्तं मन्योन्यत्वे

जाग० ५५ ति॥ साध्यस्यैवाभावमादाय नातिप्रसक्त्यापि तु नरो वक्तव्यं तरस्येति केचित्तु तत्कन्यायेनोक्तं मनोन्यत्वेतीत्यपि वदन्ति॥ कृतपात्वा
दिति॥ स्वविशिष्टहेत्वधिकरणवृत्तेर्न प्रतियोग्यसमानाधिकरणत्वादित्यर्थः॥ मनस्येव व्यभिचार इति भावः॥ ननु प्रत्य
समानाधिकरणयावन्तोऽभावाः प्रतियोगिसमानाधिकरणस्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नेत्यादि कथं
यं अभावस्य समानाधिकरणधूमावच्छिन्नत्वकोपयप्रतियोगितानाश्रयसामानाधिकरण्यं तदन्यप्रतियोगितायाः एव व्याप्य
वृत्तितानिरूपकतया धूमाद्यभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्याभावनिष्ठप्रतियोगितायाश्च तथात्वेन धूमवान् वह्नेरित्यादावति
व्याप्त्युपयोगादत आह॥ साधनेत्यादि॥ गोत्वादित्यादिपदेन गगनादिसंग्रहः॥ तथा च तद्दानुत्थावृत्त्यसंभव एवास्यादिति भावः॥ न
नु एवं पक्षसमानाधिकरण्यापर्यवसानं साध्यप्रतियोगिताकाभावाः साध्यतावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणस्तत्त्व
मित्येवोच्यतां तावतैव गोत्वाभावघटाद्यभावासंभवस्योद्धारसादत आह॥ तन्नेति॥ तथा चोक्तविवक्षायां द्रव्यत्वादिकव्याप्ति
साध्यकसद्धेतौ न स्यात् एवं संभवेपि वह्निमान् धूमात् जातिमान् सत्त्वादित्यादौ साध्यप्रतियोगिकानां तत्तद्व्यक्त्यभावानां आत्मत्ता रामः १
द्यभावानां च प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरिति भावः॥ ननु साध्यव्यापकप्रतियोगिकादित्यस्यैव सम्यक्त्वे व्यापक १५
तावच्छेदकप्रतियोगिताकपर्यन्तं व्यर्थमिति वाच्यं॥ तन्न घटाभावानां गगनादीनां च प्रमेयत्वादिप्रकारेण साध्यव्यापकतया
तदभावमादायासंभवापत्तेः॥ न च वह्निमत्त्वे सति स्वानधिकरणसाध्यवन्निष्ठाभावाप्रतियोगित्वं साध्यव्यापकत्वं निरुक्त
यत्तत्प्रतियोगिकाभाव एव निवेश्यतामिति वाच्यं॥ तस्य लक्षणान्तरतया पुनरुक्त्यापत्तेः स्यादुष्टत्वादिति भावः॥ पत्समानाधिकर

ण इत्यत्र हेत्वधिकरणत्वं विशिनष्टि॥ येनेत्यादिना॥ तदधिकरणमिति॥ तत्संबंधीत्यर्थः॥ तेन तादात्म्येनाधिकरणप्रसिद्धाव
पि तत्संबंधेन सद्धेतौ नाव्याप्तिः॥ कृतपात्वेपीति॥ प्रतियोग्यधिकरणवृत्तित्वविरहेपीत्यर्थः॥ यद्यपि प्रतियोगिसामाना
धिकरण्यमवच्छेदकस्व विशिष्टहेत्वधिकरणवृत्तित्वं न तत्र विवक्षणीयं॥ तथा च हेतुतावच्छेदकसंबंधेन हेत्वधिकरणमनुक्त्वा
कालिकसंबंधेन धूमस्याधिकरणे महाकाले वर्तमानस्य प्रलयान्यताघटाभावस्यापि यावदन्तर्गतत्वात्तद्विशिष्टहेत्वधि
करणाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिः संभवति॥ तथापि स्वविशिष्टहेत्वधिकरणेत्यादेरुक्तावनुक्तौ च उभयथापि
अयमात्मा ज्ञानादित्यत्राव्याप्तिः वह्निमान् धूमादित्यत्र तु स्वविशिष्टेत्याद्युक्तावेव तत्पर्यवसायेन प्रसिद्धोदाहरणं परित्यक्तं
यत्तु महाकालस्यैव प्रलयान्यताभावविशिष्टहेत्वधिकरणत्वसंभवात् विशिष्टेत्याद्युक्तावपि वह्निमान् धूमादित्यादौ नाव्या
प्तिः महाकालस्य हेतुताघटकसंयोगसंबंधेन धूमाधिकरणत्वाभावेपि हेतुसंबंधित्वानपायात् तादात्म्येन हेतोः संय
द्यर्थहेतुताघटकसंबंधेन यो हेतुसंबंधितद्वृत्तियावदभावानामेव निवेश्यत्वादिति मतं॥ तन्न तुच्छं॥ संयोगमात्रेण धूमहेतोः
प्रमाणमहत्त्वाद्यैव वह्निव्यभिचारितया पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुत्वात् तादृशसंयोगेन धूमस्याधिकरणे पर्वतादौ प्रस
यत्वादिस्वरूपस्य प्रलयान्यत्वघटाभावस्य वैशिष्ट्याप्रसिद्धेरवश्यकत्वात्॥ भिन्नकालीनयोर्विशेषणत्वान्यसंबंधसामान्येन बाधा
द्धेयभावविरहादिति दिक्॥ न तु पृथिवीत्ववान् महाकालकपालान्यतरत्वादित्यादावव्याप्तिः साधनसमानाधिकरण
स्य महाकालान्यत्वाघटाभावस्यापि हेत्वधिकरणे महाकालादौ वच्छेदेन कालिकसंबंधेनैव प्रतियोगिसमानाधिकरणत्वाद

जाग॰ ५६ तत्राह॥ एवमिति॥ दृष्टांतेऽपि॥ प्रतियोगिसामानाधिकरण्यघटके पीत्यर्थः॥ एकसंबंधेन व्यापकत्वं अन्यसंबंधेन प्रतियोगिसा
मानाधिकरण्यं तत्वेवं संबंधभेदनिबंधनः प्रोक्तातिव्याप्तिरूपो दोषः साध्यव्यापकताघटकसंबंधेन साध्यं प्रति योगिसामानाधि
करण्यघटकसंबंधस्यैक्याविवक्षया निरसनीय इत्यर्थः॥ एकसंबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगिता
वच्छेदकं यद्यन्नान्यप्रतियोगिताकः साध्यवन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितासमानाधिकरणावच्छेदकान्यप्रतियो
गिताको वायोभावस्तस्य तादृशसंबंधेन प्रतियोगिनो परधिकरणत्वं तद्वत्त्वं विवक्षितमिति फलितार्थः॥ पृथिवीत्वाद्यभावप्रति
योगित्वं तु न कालिकसंबंधेन पृथिवीत्वादिव्यापकतावच्छेदकं नित्यपृथिव्यां व्यभिचारात्॥ किंतु समवायेनैव तेन च संबंधेन पृथि
वीत्वाद्यभावस्य हेत्वधिकरणमहाकाशावच्छेदेन प्रतियोगिसामानाधिकरण्याभावान्नोक्तातिव्याप्तिरिति भावः॥ यत्तु येन संबंधे
न व्यापकत्वं तेन प्रतियोगिसामानाधिकरण्योक्तावपि नित्यज्ञानमीश्वरसविषयकत्वादित्यत्रातिव्याप्तिः॥ साधनसमानाधिकरण
स्येतरभिन्नताद्यभावस्यापि साध्यव्यापकतापरकविषयितासंबंधेन यावद्धेत्वधिकरणे प्रतियोगिसमानाधिकरणत्वात्॥ न च
येन येन संबंधेन व्यापकत्वं तेन तेन संबंधेन प्रतियोगिसामानाधिकरण्यविवक्षणान्नोक्तदोषः॥ तथा सति यावत्पदवैयर्थ्या
पत्तेः॥ विशेषणतासामान्येनैव साध्यवन्निरूपितविशेषणतयापि वाच्यत्वादेः साध्यव्यापकत्वाघटत्वादिना वाच्यत्वाद्यभाव
स्यैवतादृशसंबंधेन हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहाद्धूमवान्वह्नेरित्यादिव्यभिचारिण्यतिव्याप्तिवि
रहादिति॥ तन्न दृढं॥ विषयितासंबंधेन व्यापकताया एवासत्वाद्विषयितासंबंधेन स्वावच्छिन्नाधिकरणत्वाप्रसिद्ध्या स्वावच्छिन्नान रामः १६

न्नानधिकरणसाध्यवन्निष्ठत्वादिव्यापकतायास्तेन संबंधेनासंभवात्॥ न च तेन संबंधेन स्वावच्छिन्नसंबंधित
मेव व्यापकतायां निवेशनीयं तत्र दृष्टान्तातिप्रसंगभयेनैव तस्यापि निवेशनीयत्वात्॥ न च तत्संबंधावच्छिन्नाभावः सा
ध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकधर्मवत्त्वलक्षणं व्यापकत्वं विषयितासंबंधेन
सुलभं साध्यवति नित्यज्ञाने वस्तुमात्रस्यैव विषयितासंबंधेन सत्वेऽपि नित्यज्ञानान्यत्वविशिष्टघटादेर्विषयितास
बंधेनाभावस्य तत्र सत्वे बाधकाभावादिति वाच्यं॥ विषयितायां वृत्त्यनियामकतया तत्संबंधावच्छिन्नप्रतियोगिताप्र
सिद्धेः॥ यदपि मनस्त्ववद्गुणत्वादित्यत्रातिव्याप्तिः॥ आणुत्वसमानाधिकरणस्य मनस्त्वाभावस्यापि साध्यव्यापकताघटक
दिक्कृतविशेषणतया सर्वत्रैव परमाणौ प्रतियोगिसमानाधिकरणत्वादिति॥ तदपि तुच्छं॥ नित्यानामव्यावर्त्तकतया अन्य
दिक्कृतविशेषणतयासर्वत्रैव परमाणौ दिक्कृतविशेषणतया कस्याप्यसत्वात् तेन संबंधेन साध्यव्यापकत्वविर
नामेव मूर्तानां दिगुपाधित्वापरमाणौ दिक्कृतविशेषणतयाकस्याप्यसत्वात्
हात्॥ अन्यथा वस्तुमात्रस्यैव कालोपाधित्वसंभवात्परिच्छिन्नमात्रस्य संस्थानम्॥ अत एव प्रलये दशायां दिगेदानि
भागो नास्तीत्याशयेनसिद्धांतः संगच्छते॥ अन्यथा परमाणौ नांसत्वान्तदानीमपि दिग्विभागप्रसंगादिति दिक्॥ यदि च स्वदेश
हाकाशतादित्वादावतिव्याप्तिः॥ साधनसमानाधिकरणस्य महाकाशान्यत्वाद्यभावस्यापि साध्यव्यापकताघटककालि
कसंबंधेन महाकाशे प्रतियोगिसमानाधिकरणत्वात्॥ न च स्वं दृढ इत्याकारकपत्तिं विरोधयत्के विषयतासंबंधेनै
वस्यैरत्वव्यापकत्वात्यावद्दृतगतस्य तदभावस्यैव साध्यव्यापकताघटकविषयतासंबंधेन हेत्वधिकरणमहाकाशे

जाग० प्रतियोगिसमानाधिकरणत्वाभाववान्नातिव्याप्तिः॥ न हि तादृशबोधव्यक्तौ कालिकसंबंधेनापि स्पंदत्वव्यापकत्वं भाविभूत
५७ स्पंदेषु व्यभिचारादिति वाच्यं॥ विषयतायाः ज्ञानसमानकालीनतया तद्बुद्धिव्यक्त्यभाववद्दशायामेव स्पंदत्ववति विषयतासं
बंधेन तत्तद्बुद्धिव्यक्त्यभावस्य सत्वाद्विषयतासंबंधेन स्पंद इत्याकारकजन्यबुद्धेः साध्यव्यापकतासंभवात्॥ किंच व्य
धिकरणधर्मावच्छिन्नाभावस्यासत्वेपि व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यत्यंताभावमादायैव केवलान्वयिसाध्यक
स्थले लक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेत्यादिमूलस्य तद्रूपकत्वानुपपत्तेः॥ न च साध्यवन्निष्ठाभावीयप्रतियोगिता
याः सामानाधिकरण्येनानवच्छेदकधर्मवत्त्वरूपव्यापकतायां व्यधिकरणधर्मावच्छिन्नाभावमादायासंभववारकस्य
सामानाधिकरण्येनेत्यस्य व्यर्थतायामेतन्मूलग्रंथस्य तात्पर्यमिति वाच्यं॥ सामान्यधर्मेण विशेषाभावमादाय व्या
पकत्वस्याप्रसिद्धिवारणायैव सामानाधिकरण्यस्य व्यापकतायामनवच्छेदके निवेशनीयत्वादित्यादिकं विभाव्यते॥
तदा संबंधेन विवक्षयेति ग्रंथस्य साध्यव्यापकत्वस्य तदवच्छेदकप्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यघटकी राम:१
भूतप्रतियोग्यधिकरणत्वस्यैवैकसंबंधावच्छिन्नविवक्षयेत्यर्थः॥ तथा च स्वप्रतियोगितावच्छेदकीभूतसंबंधावच्छिन्नसा १२
ध्यव्यापकतावच्छेदकप्रतियोगिताकयावंतोऽभावाः स्वप्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणा
इत्यर्थलाभात् यावदंतर्गतस्य समवायादिसंबंधेन नित्यज्ञानत्वमनस्त्वस्पंदत्वाद्यभावस्य स्वप्रतियोगितावच्छेदकीभू
तसमवायादिसंबंधेन यावद्धेत्वधिकरणे प्रतियोगिसमानाधिकरणत्वान्नित्यज्ञानं नित्यत्वसविषयकत्वात् मनस्त्ववद्

णत्वान्तस्पंदेऽपि महाकालत्वादित्यादौ कुत्रापि नातिव्याप्तिः॥ न चैवं वाच्यं ज्ञेयत्वादित्यादौ अव्याप्तिः व्यधिकरणधर्मावच्छिन्न
वाच्यत्वाद्यभावस्यैव तत्र घटकतया तस्य प्रतियोगितावच्छेदकसंबंधस्तत्वे मानाभावादिति वाच्यं॥ स्वरूपसंबंधेन घटत्वा
दिना वाच्यत्वं नास्तीत्यादिप्रतीत्यनुरोधेन तादृशाभावस्यापि प्रतियोगितावच्छेदकसंबंधस्वीकारात्॥ अन्यथा भूतले सं
योगेन घटत्वावच्छिन्नघटवदित्यत्र विशिष्टाभावस्य सत्वेपि भूतले संयोगेन घटत्वेन घटो नास्तीति प्रत्ययप्रसंगात्॥ न चैवमपि
दृष्टांतः व्यधिकरणधर्मावच्छिन्नोपि चेदभावः प्रामाणिकस्तदा स्वरूपसंबंधेन तत्प्रतियोगिताऽवच्छिन्नतामितियं प्रकृते वसामा
न्याभावे वक्ष्यमाणत्वात्॥ केचित्तु॥ संबंधैक्यविवक्षयेत्यत्र साध्यवत्तासाध्यव्यापकत्वप्रतियोगित्वप्रतियोगिसामानाधि
करण्यघटकीभूतप्रतियोग्यधिकरणत्वैकेन साध्यतावच्छेदकसंबंधेन विवक्षणीयमित्यर्थः॥ तथा च साध्यतावच्छेद
कसंबंधावच्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसंबंधावच्छिन्नप्रतियोगिताकयावंतोऽभावाः साध्यतावच्छेदकसं
बंधेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभात् कुत्रातिव्याप्तिः॥ न च प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्न
त्वविवक्षणे व्याप्तिरिति वाच्यं तदनुक्तौ वाच्यत्वादिकमादायैव केवलान्वयिलक्षणसंभवे प्रतियोग्यवृत्तिश्चेत्यादिमूल
तन्निराकरणस्यासंगतत्वापत्तेः॥ न चैवमपि तत्र वाच्यत्वाद्यभावस्येति प्रत्यविरोधः वाच्यत्वादेः संयोगादिसंबंधेन ध्
माद्यव्यापकत्वादिति वाच्यं॥ वाच्यत्वाद्यभावस्य तत्रादिपदसत्त्वात् यत्र स्वरूपसंबंधेन साध्यता तत्र वाच्यत्वाद्यभावमा
दाय संयोगादिसंबंधेन साध्यतायां च वाच्याद्यभावमादायातिव्याप्तिपरतयैव तत्संगतेरित्याहुः॥ तन्मंदं॥ मनोन्यताद

जाग० भावस्येत्याद्युक्तग्रंथविरोधात् भूतत्वमूर्त्तत्वोभयस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्संबंधेन साध्यव्यापक
५८ तासंभवात् वृत्त्यनियामकसंबंधेनाधिकरणत्वस्य प्रतियोगित्वस्य चाप्रसिध्या तेन संबंधेन साध्यतायां धनीत्वेनत्वादित्या
दिसद्धेतावव्याप्तेः॥ तद्रूपान्यरूपरूपत्वादित्यादावतिव्याप्तिश्च साध्यताघटकसमवायसंबंधेन साध्यव्यापकतावच्छेदकप्रति
योगिताकानां व्यधिकरणधर्मावच्छिन्नगुणत्वाद्यभावानां सर्वेषामेव स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधि
करणत्वादिति॥ यत्तु विशेषणता विशेषणसाध्यव्यापकत्वं तेनैव च प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यं च संबंधैक्य
विवक्षयेत्यस्यार्थमाहुः॥ तदपि गवाद्यभावस्यात्मत्वाद्यभावस्येत्यादिग्रंथस्यासंगततापत्तेरुपेक्षितमिति॥ नन्वेतावतापु
यमात्मा ज्ञानादित्यादावव्याप्तिरेव घटत्वादिना त्मत्वसामान्याभावस्यापि स्वविशिष्टस्य हेतोर्विषयतयाधिकरणे घटादौ
व्यापकताघटकसमवायेन प्रतियोगिसामानाधिकरण्याभावादत आह॥ दृष्टांतरेति॥ पश्चादुक्तहेत्वधिकरणावच्छेदेने
त्यत्र हेत्वधिकरण इत्येपीत्यर्थः॥ संबंधभेदनिबंधनो दोषः एकसंबंधेन हेत्वधिकरणत्वस्य विशिष्टहेत्वधिकरणेत्यत्रान्य
संबंधेन हेत्वधिकरणत्वनिबंधनो व्याप्तिरूपो दोष इत्यर्थः॥ संबंधैक्यविवक्षयेति॥ हेतुसमानाधिकरणा इत्यत्र हेत्वधिकर राम० ५८
णत्वं येन संबंधेन स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणत्वं तेनैव संबंधेनेति विवक्षयेत्यर्थः॥ इत्थं च दृष्टांतर
पदमपि साधु संगच्छते इति तु नव्याः॥ यत्तु धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमसामान्याभावस्यापि हेत्वधिकरणयोगोल
कावच्छेदेन स्वप्रतियोगित्वस्य कालिकसंबंधेनाश्रयीभूतवह्न्यादेः समानाधिकरणत्वादत आह॥ दृष्टांतरेपीति॥ प्रतियोगि

सामानाधिकरण्यमित्यत्र प्रतियोगिताश्रय इत्येपीत्यर्थः॥ संबंधभेदनिबंधनो दोषः॥ प्रकृतसाध्यव्यापकत्वस्यैकसंबंधाव
च्छिन्नावच्छेदकप्रतियोगिताकाभावस्यान्यसंबंधावच्छिन्नप्रतियोगिताश्रयीभूतवह्न्यादेः सामानाधिकरण्यनिबंधनो दोषः॥ सं
बंधैक्यविवक्षया॥ यत्संबंधेन व्यापकतावच्छेदकत्वं प्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यमित्यत्रापि तेन संबंधेन प्रति
योगिताश्रयत्वविवक्षयेत्यर्थ इति संक्षेपः॥ अत्र संबंधैक्याविवक्षायां रूपसामान्याभाववान् पृथिवीत्वाज्जन्यपृथिवीत्वादित्या
दिविरुद्धहेतावप्यतिव्याप्तिः साधनसामानाधिकरण्यस्य पृथिव्यन्यत्वाद्यभावस्यापि हेत्वधिकरणपृथिव्यवच्छेदेन जन्यपृथिव्यु
वच्छेदेन वा दिक्कृतविशेषणतया प्रतियोगिसमानाधिकरणत्वात्॥ मूर्त्तमात्रस्यैव दिगुपाधित्वोपगमात्॥ नन्वेतस्याव्याप्यत्वे
नीरूपमित्याकारकयत्किंचित्प्रमाव्यक्तेर्विषयतासंबंधेन साध्यव्यापकताघटकतया वदंतर्गतस्य तदभावस्यैव हेत्वधिकरणाव
च्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः॥ तादृशबुद्धिव्यक्तेर्विभिन्नकालीनघटादौ केनापि संबंधेनासत्त्वादि
ति वाच्यं॥ विषयताया ज्ञानसमानकालीनतया तादृशबुद्ध्यभावदशायामेव रूपशून्ये गगनादौ विषयतासंबंधेन तद्बुद्ध्यभा
वप्रतियोगित्वावच्छिन्नाभावसत्त्वात् तादृशज्ञानव्यक्त्यभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्॥ स्वावच्छि
न्नानधिकरणसाध्यवन्निष्ठेत्यादिव्यापकतायास्तद्बुद्धिव्यक्तौ सत्त्वेपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य तद्बु
द्धिव्यक्तावसत्त्वेनोक्तस्थलेऽतिव्याप्तेरावश्यकत्वादिति भ्रमं निराकुरुते॥ रूपसामान्येत्यादिना॥ पृथिवीत्वादिकमिति॥ नि
त्यपृथिव्यादिगुपाधित्वमानाभावादादिपदं॥ तेन जन्यपृथिवीत्वाद्युपग्रहः॥ सहेतुत्वप्रतिकूलत्वे विरोधं निरस्यति॥ प्रत्यय इ

जा.ग. ति॥ महाप्रलयइत्यर्थः॥ खंडप्रलयेतु पार्थिवपरमाणौ रूपमस्त्येव अन्यथोत्तरसर्गे पार्थिवद्व्यणुकस्य रूपोत्पत्त्यर्थं पर
५९ माणौ पाकांतरकल्पनापत्तेरिति प्रांचः॥ प्रलयइत्यस्य पाकेन रूपादेः प्रलयदशायामित्यर्थः॥ तेनमहाप्रलयानभ्युप
गमेपिनक्षतिः तुल्यत्वात्रिकाले चेत्यत्र च कारेण निरुक्तप्रलयस्याप्युत्कर्षणं अवयविन्यपि पाकदशायां तत्तत्पाने ग्रंथ
न्यूनतेत्यपरे॥ ननु विरोधाविरहेपि घटाद्यवच्छेदेन व्यभिचारित्वात् कुतः सद्धेतुत्वमत आह॥ उत्पत्तीति॥ यद्यपि पाकेन
रूपोमादिरूपनाशकाले अवयविनि रूपसामान्याभावसत्वं॥ तथापि पीलुपाकवादिमते तदसंभवात्॥ अपक्वमाना
वयव्यनुरोधाच्च उत्पत्तिकालमात्रानुसरणं॥ तत्त्वाद्वादिति॥ रूपादिसामान्याभावसत्त्वादित्यर्थः॥ प्रतियोगिवदिति॥ प्र
तियोगिनइवेत्यर्थः॥ विरोधित्वं एकदैकदेशावृत्तित्वं॥ मानाभावादिति॥ प्रलयाद्यवच्छेदेन परमाण्वादौ रूपादिसामान्या
भावेतु योग्यसन्निकर्षाभावात्प्रत्यक्षासंभवेपि अनुमानादिकमेव मानमस्तीत्याशयः॥ यत्तु घटादावुत्पत्तिकालावच्छे
देन रूपसामान्याभावस्य प्रत्यक्षमेव संभवति॥ तदानीं चक्षुःसंयुक्तविशेषणतायाः सत्वेपि द्रव्यसमवेतवृत्त्यभा रामः १९
वप्रत्यक्षहेतोः चक्षुःसंयुक्तसमवेतविशेषणतायाः सत्वेन सन्निकर्षसंभवादिति॥ तन्नतुच्छं॥ चक्षुःसंयुक्तसमवेतगुण
कविशेषणतया रूपाद्यभावचाक्षुषापत्त्या चक्षुःसंयुक्तयोग्यसमवेतविशेषणतायाएव अभावग्राहकत्वेन द्रव्यान्यद्र
व्यसमवेतवृत्त्यभावचाक्षुषत्वस्यैव तत्र अन्यतावच्छेदकत्वात्॥ अन्यथात्रत्यरेणुवृत्त्यभावचाक्षुषे व्यभिचारापत्तेः॥ वस्तु
तः स्वोत्पत्तेः पूर्वं चक्षुःसंयुक्तसमवेतस्य घटादेरसत्वात्तद्विशेषणताया अपि तदानीमसत्वात् उक्तक्रमेण हेतुत्वे वनाक्तेः

तिध्येयं॥ अतएवेति॥ ध्वंसप्रागभावयोरत्यंताभावविरोधित्वे मानाभावादेवेत्यर्थः॥ रक्तिमध्वंसप्रागभावयोः सत्वमावेदपि
तुमंतरापदं॥ रक्तं रूपमिति॥ नच गुणे शुक्लादयः पुंसीत्यनुशासनात् रक्तो रूपं नास्तीत्येव प्रयोगो युक्तइति वाच्यं॥ वस्तु
तरा विशेषणस्यैव शुक्लादिशब्दस्य पुंस्त्वानुशासनात्॥ अतएव शुक्लं रूपमिति प्रयोगः समासे मालिकृतेव वक्ष्यत इ
तिध्येयं॥ एषः॥ रक्तं रूपं नास्तीत्याकारकः प्रत्ययः॥ पूर्वेत्यादि॥ पूर्वं रक्तस्य ध्वंसवति उत्तररक्तस्य प्रागभाववति इदानीं
रक्तेपीत्यर्थः॥ नच रक्ततादशायां वर्तमानस्यापि रक्तांतरध्वंसादेस्तदानीं रक्तत्वावच्छिन्नप्रतियोगिताकत्वविरहान्न
तादृशः प्रत्ययः तस्याप्युपपत्तिरिति वाच्यं॥ ध्वंसादिप्रतियोगित्वस्य धर्मानवच्छेद्यत्वात् तत्र इदनंतध्वंसप्रागभावा
दिषु रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनामपेक्ष्य रक्तत्वावच्छिन्नात्यंताभावसंबंधस्यैवांतरा रूपमादिषु कल्पनायाल
घुत्वाच्च॥ नच यावृत्ति रक्तरूपाणि तत्तद्व्यक्तित्वेतरधर्मानवच्छिन्न तत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावैरेव रक्तं रूपं नास्ती
ति प्रत्ययः क्रियते प्रकृते च विद्यमानरूपप्रतियोगिकस्य तादृशाभावस्यासत्वान्न तथाप्रतीतिरिति वाच्यं॥ तथा सत्यं
तरा रूपामेरक्तं रूपं नास्तीत्याकारकनिर्णयेपि तत्र रक्तं रूपमस्तीति प्रत्ययापत्तेः विरोधिनः सामान्याभावस्य निश्चयात्
॥ विशेषाभावकूटनिर्णयस्याप्रतिबंधकत्वात्॥ अन्यथा सामान्याभावएव न सिध्येदिति भावः॥ प्रांचस्तु॥ प्रतियोगितासं
बंधेन रूपत्वस्याश्रयावच्छिन्नप्रकारताकसंसर्गाभावविशेष्यकः प्रत्ययो रूपत्वावच्छिन्नप्रकारताकबुद्धेर्विरोधित्वेति रूपत्वं प्रति
योगितावच्छेदकमेव न तु तदिरूपामतादृशायां रूपत्वावच्छिन्नाभावएव रूपं नास्तीति प्रतीतेर्विषयः॥ किंमनुरोधेन रूपध्वंसादि

जा॰ग॰ प्रतितदत्यंताभावसिद्धिरित्याहुः॥ अंतराद्रूपामेस्समवायेन रक्तं रूपं नास्तीति प्रतीतेः श्यामरूपानुरोधेनैव ध्वंसात्यंताभा
६० वयोर्नविरोधः॥ अन्यथा समवायावच्छिन्नप्रतियोगिताकध्वंसस्य प्रसिध्या तत्रातीतेर्भ्रमत्वापत्तेरिति तु परमार्थः॥ त
त्सामानाधिकरण्यं चेति॥ प्रतियोगिसामान्याधिकरण्यं चेत्यर्थः॥ स्वविशिष्टेति॥ स्वपदलक्षणघटकतत्तदभावव्यक्ति
परं॥ तथा च तत्तदभावाश्रयीभूतं यद्धेतुताघटकसंबंधेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणं तदवच्छेदेन तत्तदभा
वस्य स्वप्रतियोगिसामानाधिकरण्यं ग्राह्यमित्यर्थः॥ तेन हेतुसमानाधिकरणस्य घटत्वादिना वृत्त्याद्यभावस्य कालिका
दिसंबंधेन धूमाद्यधिकरणस्य ह्रदादेर्व्यापकताघटकसंयोगादिसंबंधेन प्रतियोगिसामानाधिकरण्याभावेपि वह्नि
मान्धूमादित्यादौ नाव्याप्तिः॥ न वा द्रव्यं विशिष्टसत्त्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणगुणाद्यवच्छे
देन प्रतियोग्यसमानाधिकरणत्वेपि क्षतिः॥ गुणादीनां विशिष्टसत्तानधिकरणत्वात्॥ यद्यपि व्याप्यवृत्तेरवच्छेदकत्वे
मानाभावात् घटत्वाद्यभावनिष्ठप्रतियोगिसामानाधिकरण्यं तदवच्छेदकत्वेन हेत्वधिकरणस्येत्यसंभवः कथिता गम॰१
तिव्याप्तितादवस्थ्यं च॥ न च स्वविशिष्टहेत्वधिकरणताव्यापकीभूतप्रतियोग्यधिकरणतावद्वृत्तित्वं वाच्यं॥ स्वविशिष्टपर २०
वैयर्थ्यापत्तेः॥ प्रतियोग्यधिकरणीभूतस्वविशिष्टयावद्धेत्वधिकरणवृत्तित्वस्योक्तौ च द्रव्यं तद्गुणत्वादित्यादावव्याप्तिः॥ याव
वा॰२ द्धेत्वधिकरणाप्रसिद्धेः॥ तथापि यावंतो हेतुमद्वृत्तिधर्माः हेत्वधिकरणत्वानि यावंति तत्प्रत्येकाश्रयीभूतप्रतियोग्यधिकरण
वृत्तित्वस्य विवक्षितत्वाददोषः॥ एकमात्रवृत्तिहेतोरपि तत्तत्क्षणवृत्तित्वविशिष्टस्य बह्वधिकरणतानि संतीति न तत्राव्याप्तिः॥

न च प्रतियोग्यधिकरणवृत्तिस्वविशिष्टयावद्धेत्वधिकरणताकत्वमात्रमस्तु॥ स्वविशिष्टत्वस्य हेतुसमानाधिकरणत्व
स्य च वैयर्थ्यापत्तेरिति भावः॥ प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकरणावच्छेदेनेत्यस्य प्रवेशे एतत्फलकतया उक्ततः पश्चादुक्त
स्यापि तस्य प्रथमं प्रयोजनमाह॥ तेनेति॥ गोत्वादिना गवाद्यभावस्य तद्वृत्तिकाले वृत्तावपि यदा गोत्वं तदा गौरित्यादौ नाति
प्रसंग इति योजना॥ इदमुपलक्षणं॥ तत्तद्योगोपलक्षकान्यत्वाद्यभावस्यापि काले प्रतियोगिसमानाधिकरणत्वात् धूमवान्
वह्नेरित्यादावतिप्रसंगो द्रष्टव्यः॥ गवाद्यभावस्य प्रतियोग्यधिकरणे दैशिकसंबंधेनापि वृत्तित्वमुपपादयितुमाह॥ गवा
द्यनधिकरणेति॥ इदानीं चत्वरे गौर्नास्तीति प्रत्ययात् गोमत्यपि काले कालिकसंबंधावच्छिन्नगवाद्यभावस्य गवानधिकरण
चत्वराद्यवच्छेदेन वृत्तौ न विरोधः॥ न च एतत्प्रत्ययस्य चत्वर एव तत्कालावच्छेदेन गवात्यंताभावो विषय इति वाच्यं॥ देशवृत्तौ
कालस्येव कालवृत्तौ देशस्यावच्छेदकत्वानुभवादेकशेषस्य कर्तुमशक्यत्वात्॥ इदानीं गगने गौर्नास्तीति प्रतीतेः॥ गवाद्यभा
वस्य तत्कालावच्छेदेन गगनवृत्तित्वावगाहिन्या अप्रमात्वापत्तेश्च॥ गवाद्यभावस्य गगनादौ सार्वदिकत्वेन व्याप्यवृत्तितया
कालावच्छेद्यतासंभवादिति भावः॥ तद्वृत्तीति॥ गवादिमतीत्यर्थः॥ काले॥ जन्यकाले॥ ननु चरमध्वंसात्मकस्य प्रलयात्यंता
भावाभावस्यापि यावदंतर्गतत्वात्तस्य सृष्टिकाले प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरत आह महाकाले वेति॥
तथा च तस्यापि महाकाले प्रतियोगिसामानाधिकरण्यं तस्य कालिकसंबंधेन जगदाधारत्वादिति भावः॥ ननु गोत्वादिजातेः
प्रलये कालिकसंबंधेन सत्त्वे प्रमाणाभावात् यदा गोत्वं तदा गौरित्यस्य हेतुरेवेति यदि नूपात्तदाप्याह॥ यत्र काले त्वमिति॥

जा.ग.
६१

कविवक्षानारदेघटादिसाधारणरूपेणापि गोःसाध्यतायामतिव्याप्तिरित्याशयेनसाध्यांतरमाह॥ जन्यद्रव्यमिति॥ द्रव्य
स्यसाध्यतायांकालत्वस्यहेतुत्वेपिकालिकसंबंधेनपरमाण्वादेःसत्वात्॥ कार्यद्रव्यानधिकरणीभूतत्वेसतिद्र
व्यवृत्तेर्नैवधर्मिग्राहकप्रमाणेनतत्सिद्धेरतोव्यभिचारित्वसंपत्तयेजन्यपदं॥ ननुमहाप्रलयानंगीकारेप्रागुक्तहेतुद
यमेवजन्यस्यंदूप्रलयेपिब्रह्मांडांतरेजन्यद्रव्यसत्वात्‌अतःसाध्यांतरमाह॥ प्रलयावृत्तित्वेति॥ खंडप्रलयादेर्निर्वक्ष्यपर्यः
॥यद्यपिप्रतियोगिनोयदधिकरणंतद्वृत्तित्वस्यदैशिकसंबंधेनविवक्षायामपियद्गोत्वंतद्गोगोरित्यादेरतिव्याप्तिवा
रणंसंभवतिप्रलयाद्यवृत्तित्वावच्छिन्नाभावस्यप्रतियोग्यधिकरणेमहाकालादौदैशिकविशेषणतासंबंधेनवृत्ति
विरहात्॥ नचद्रव्यंमहाकालत्वादित्यादावव्याप्तिः॥ कालिकसंबंधेनमहाकालनिष्ठस्यद्रव्यत्वाद्यभावस्यस्वप्रतियोग्य
धिकरणेदैशिकविशेषणतयावृत्त्यभावादितिवाच्यं॥ हेतुसमानाधिकरणत्वस्यापितादृशविशेषणतयाविशेष
णीयत्वात्॥ तथापिरूपभिन्नंगुणत्वादित्यादौसाधनसमानाधिकरणस्यरूपान्यत्वाद्यभावस्यरूपभिन्नत्वप्रकारकप्र रामः।
माविशेष्यत्वाद्यभावस्यचरूपत्वादिस्वरूपतयादैशिकविशेषणतासंबंधेनवृत्तित्वविरहेणयावदंतर्गतत्वात्॥ घट २१
त्वादिनारूपभिन्नत्वाद्यभावस्यचसर्वस्यैवतादृशाभावस्यमहाकालादौस्वप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिरतः
स्वविशिष्टहेत्वधिकरणत्वादिविवक्षानुसरणमितिवदंति॥ वस्तुतोदैशिकविशेषणताघटितस्यलक्षणांतरत्वादेकेनाप
रस्यान्यथाकर्तुमशक्यत्वाद्युक्तलक्षणेनैवपर्य्यमितिपरमार्थः॥ यत्तुहेत्वधिकरणेविशेषणतयावर्तमानानांनिरूपा

वदभावानांप्रतियोगिवृत्तित्वमेवविशेषणतासंबंधेनोचितंप्रतियोग्यधिकरणवृत्तित्वप्रवेशेगौरवात्॥ सर्वत्रव्यभिचारस्यज
न्यत्वाद्यभावमादायातिव्याप्त्यभावादिति॥ तत्तुच्छं॥ स्ववृत्तित्वविशिष्टानांकेवलान्वयिधर्माणामत्यंताभावस्यस्वप्रतियोगिभ
वृत्तित्वेनासंभवापत्तेः॥ नहिवाच्यत्वादिवृत्तित्वविशिष्टानांवाच्यत्वादीनामभावोवाच्यत्वादिरूपप्रतियोगिवृत्तिरितिदिक्॥ ज्ञा
नामत्तेसंयोगसामान्याभावसाधकमेयत्वंद्रव्यएवव्यभिचारीत्यतःकपिपदं॥ प्रतियोगिवैयधिकरण्यघटितमेवसाध्य
व्यापकत्वमत्रप्रवेशितम्॥ यथासंनिवेशेवैयर्थ्यविरहादतस्तदवच्छेदकत्वंसंयोगाभावनिष्ठप्रतियोगित्वेप्यक्षतमि
त्याशयेनसंयोगात्मकाभावस्याभिधानंतद्घटितसाध्यव्यापकतायाःप्रवेशेतुगगनत्वादिविशिष्टवाच्यत्वाद्यभावस्य
गगनत्ववाच्यत्वोभयत्वावच्छिन्नाभावादेर्वैयर्थ्यादंतर्गतत्वात्तस्यचहेत्वधिकरणीभूतगगनावच्छेदेनप्रतियोग्यसमाना
धिकरणत्वादव्याप्तिरतस्तद्विशिष्टपदं॥ एतदभिप्रायेणैवसंयोगाद्यात्मकाभावेत्यत्रादिपदमुपात्तं॥ वस्तुतःसत्तावान्द्र
व्यत्वादित्यादौगुणत्ववान्रूपत्वादित्यादौकालजन्यरूपेचहेतुसमानाधिकरणस्यसत्ताभावस्यगुणत्वसामान्याभावस्यचके
नापिसंबंधेनात्मगगनादौनित्यरूपेचावृत्तित्वाद्धेत्वधिकरणावच्छेदेनतस्यैवयावदंतर्गतस्यप्रतियोगिसामानाधिकरण्य
विरहादव्याप्तिःस्यात् यदिस्वविशिष्टपदंनस्यादितिदिक्॥ ननुधूमाद्यभाववतिजलादौवृत्तित्वविशिष्टस्यगोत्वाद्यभावस्या
भावोधूमाद्यभावएवअभावप्रतियोगिकस्याभावाधिकरणकस्याभावस्याधिकरणस्वरूपत्वात्॥ तथाधूमादौसाध्येव
ह्न्यादिहेतावतिव्याप्तिः॥ धूमाद्यभावस्यहेत्वधिकरणावच्छेदेनगोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वादतआह॥

जाग॰ ६२ जलादावृत्तीति॥ न्यूनतादृशाभावस्य धूमाभावस्वरूपत्वेऽपि जलादेर्न तादृशाभाववत्तावच्छिन्नाधिकरणत्वं किंतु धूमाभावत्ता-
वच्छिन्नाधिकरणत्वमेवेति न प्रत्ययापत्तिप्रसंग इति वाच्यं॥ एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसंगात्॥ उक्तक्रमेणैवाति-
प्रसंगस्य वारणसंभवादिति भावः॥ ननु तथापि धूमवान् वह्नेरित्यादावतिव्याप्तिः॥ समनियताभावानामैक्यात् धूमाभाव-
स्य वह्निधूमोभयाभावाभिन्नस्यायोगोलकान्यत्वाभावादेश्चायोगोलकभेदत्वादिना भेदसामान्याभावाद्भिन्नस्य हेत्व-
धिकरणावच्छेदेनैव वृक्षादिभेदात्मकप्रतियोगिसमानाधिकरणत्वादिति चेत्॥ अत्राहुः॥ यावत्पदस्य फलतः प्रतियो-
गितावच्छेदकत्वेन साध्यव्यापकतावच्छेदकीभूतयद्यत्प्रतियोगिताकोऽभावस्तत्तत्स्वविशिष्टहेत्वधिकरणावच्छेदेन
तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षितं तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठतादृशप्रतियोगिताक-
स्य धूमादिनिष्ठप्रतियोगिताश्रयेण धूमादिना हेत्वधिकरणावच्छेदेन समानाधिकरण्यविरहान्नातिव्याप्तिः॥ न चैवं यत्स-
मानाधिकरण्यमित्यस्य वैयर्थ्यं॥ आत्मत्वसामान्याभावीयप्रतियोगितायाः अपि साध्यव्यापकतावच्छेदकतया तत्प्रति- रामः १ २२
योगिताकस्यात्मत्वसामान्याभावस्य तादृशप्रतियोगिताश्रयसामानाधिकरण्यविरहाद् यमात्मा ज्ञानादित्यादावव्या-
प्तिवारकत्वात्॥ जलादिवृत्तित्वविशिष्टत्वादिरूपेण तु वस्तुगतिमनुरुध्यैवोक्तः॥ ते न तादृशाभावस्य धूमाभावस्वरूपत्वेऽपि
तस्य हेत्वधिकरणावच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताव्यक्त्याश्रयसामानाधिकरण्यविरहाद-
व्यातिव्याप्त्यसंभवेऽपि नासंगतिः॥ न च धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तत्तद्धूमत्वे तत्प्रमेयसामानाधि-

स्य प्रमेयसामान्यनिष्ठं प्रतियोगित्वं लाघवान्न तु तद्भिन्नं प्रतियोगित्वांतरं गौरवात् इत्युक्तविवक्षयाप्यप्रतिकार इति वाच्यं॥
स्वरूपसंबंधात्मिकायाः प्रतियोगितायाः सामान्याभावस्येऽपि प्रतियोगिभेदेनैव भिन्नत्वादिति सांप्रदायिकाः॥ वस्तुतः सा-
ध्यव्यापकतावच्छेदिकायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नायाः यादृशप्रतियोगितायाः निरूपकोऽभावस्तत्स्वविशिष्टहेत्वधि-
करणावच्छेदेन तादृशप्रतियोगिताश्रयसामानाधिकरण्यमेव वक्तव्यं॥ तथा च धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसा-
मान्याभावानतिरेकेऽपि तदीयं प्रमेयसामान्यनिष्ठप्रतियोगित्वं स्वन्यूनवृत्तिनैव धूमत्वादिधर्मेणावच्छिन्नमतो न तादृशप्रतियो-
गिताश्रयसामानाधिकरण्यमुपादायातिप्रसंग इति युक्तमुत्पश्यामः॥ यत्तु॥ समनियताभावैक्यमते धूमवान् वह्नेरित्यादाव-
तिव्याप्तिवारणार्थं येन येन संबंधेन साध्यव्यापकता तेन तेन संबंधेन प्रत्येकं प्रतियोगिसामानाधिकरण्यं विवक्षितं॥ तथा च
व्यभिचारिमात्र एव यत्राधिकरणे व्यभिचारस्तदन्यत्वस्य स्वात्मकस्वरूपसंबंधेनापि साध्यव्यापकतया तद्भावस्य च हेत्वधिक-
रणावच्छेदेन तादृशान्यत्वात्मकस्वरूपसंबंधेन स्वप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः॥ अत एव विषयितासंबंध-
स्य व्यापकताघटकत्वेऽपि नित्यज्ञानं नित्यसविषयकत्वादित्यादेर्नातिव्याप्तिः॥ नित्यज्ञानत्वाद्यभावस्य व्यापकताघटकीभूतेन
समवायसंबंधेनैव प्रतियोग्यसमानाधिकरणत्वादिति मतं॥ तत्तुच्छं॥ घटत्वादिना वाच्यत्वाद्यभावस्यैव घटत्वादिनाऽयःपिंडा-
न्यत्वाभावस्वरूपतया तस्य च व्यापकताघटकेनायःपिंडान्यत्वनिरूपितस्वरूपसंबंधेन यावद्धेत्वधिकरणे प्रतियोगिसामा-
नाधिकरण्यविरहाद्धूमवान् वह्नेरित्यादौ अतिव्याप्तिविरहापत्तेः इत्यस्य स्वविशिष्टेत्यस्य यत्समानाधिकरण इत्यस्य च वैयर्थ्य-

जा.ग. ताप्रात्र इति दिक्॥ ननु व्यधिकरणधर्मावच्छिन्नाभावासत्त्वेऽपि सर्वत्र सद्धेतौ घटत्वादिविशिष्टवाच्यत्वाभावं गगनत्वबाधितोऽन्यथा
६३ भावं वा समादाय प्रोक्तलक्षणसंभवात्॥ प्रतियोग्यवृत्तित्वेत्यादिमूलावतारानुपपत्तिः॥ न च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छि
न्नत्वेन व्यापकतावच्छेदकीभूतप्रतियोगिताया विशेषणीयत्वान्नैवमिति वाच्यं॥ व्यभिचारवारकत्वेन तादृशविशेषणस्यावश्य
त्वात्॥ अन्यथा व्यधिकरणधर्मावच्छिन्नाभावकालीनत्वेन हेतुविशेष्यैव ग्रंथावतारणं कुतो न समर्थयेत् अतो लक्षणांतरमाह
॥यत्सामानाधिकरण्यमित्यादि॥ वह्निमान्धूमात्सत्त्वाद्वा द्रव्यत्वादित्यादौ व्याप्तिः॥ साध्यव्यापकप्रतियोगिकानां जन्यत्व
विशिष्टद्रव्यत्वाभावगुणत्वविशिष्टसत्त्वाद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकीभूतजन्यत्वविशिष्ट
द्रव्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्याभावादत उक्तं॥ रूपावच्छिन्नेति॥ तथा च जन्यत्वविशिष्टद्रव्यत्वत्वादेः साध्यव्यापकता
नवच्छेदकत्वाददोषः॥ यत्तु॥ साध्यव्यापकप्रतियोगिकस्य घटः घटत्वेन वृत्त्यभावस्य यावद्धेत्वधिकरणे घटत्वावच्छिन्नसामा
नाधिकरण्याभावात् व्यापकतावच्छेदकरूपावच्छिन्नेति॥ तदत्यंतमसत्॥ घटत्वेन वृत्त्यभावस्य वह्नित्वेन घटाभावतया तस्य रा.म.१
पि यावद्धेतुमति स्वप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात्॥ ननु समवायित्वस्य वाच्यत्वव्यापतानव २३
च्छेदकत्वात् तदवच्छिन्नवाच्यत्वाद्यभावस्य मूलोक्तस्येन लक्षणाघटकत्वादाह॥ तेयत्वादिनेति॥ शेषमित्यादि॥ येन संबंधेन
हेतुस्तेन संबंधेन हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वमभावे बोध्यं तेनायमात्मा ज्ञानात् घटान्यत्वे सति आत्मघटसं
योगादित्यादौ वात्मत्वसामान्याभावस्य तथात्वेऽपि नाव्याप्तिः॥ एवं येन संबंधेन व्यापकता तत्संबंधावच्छिन्नप्रतियोगिताका

भावस्य स्वप्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यं॥ अतो व्यधिकरणधर्मावच्छि
न्नाभावस्यासत्त्वेऽपि व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तित्वेत्यादिग्रंथा
वतारानुपपत्तिः॥ न वा जन्यत्वादेः समवायेन साध्यतायां महाकालत्वादावतिव्याप्तिः॥ प्रतियोगितावच्छेदकावच्छिन्नसामाना
धिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं॥ तेन द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य काले हेतुमति प्रतियोगिसमा
नाधिकरणत्वेऽपि नातिव्याप्तिः॥ इदं त्ववधातव्यं॥ साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वरू
पमेव व्यापकतावच्छेदकत्वमत्र पूर्वलक्षणे च प्रवेश्यं॥ न तु प्रतियोगिवैयधिकरण्यघटितं॥ तथा सति व्यधिकरणधर्माव
च्छिन्नाभावासत्त्वेऽपि सर्वं प्रमेयमित्याकारकजन्ययत्किंचिद्बुद्धिविषयत्वसामान्याभावमादाय सर्वत्र लक्षणान्वयसंभवे
प्रतियोग्यवृत्तित्वेत्यादिग्रंथावतारानुपपत्तेः॥ जन्यज्ञानव्यक्तिविषयत्वस्य तादृशज्ञानदशायामेव सत्त्वेन तादृशत्वदशा
यामेव तादृशज्ञानविषयत्वाभावस्य हेतुसमानाधिकरणत्वात्॥ एवं च अत्र स्वविशिष्टपदं न कपिसंयोगाद्यात्मकाभावं
गगनत्वादिविशिष्टवाच्यत्वाद्यभावमादाय कपिसंयोगाभाववान् प्रमेयत्वादित्यादौ अव्याप्तिवारकं कपिसंयोगाभावत्वा
देरुक्तव्यापकतावच्छेदकताभावात्॥ किंतु हेतुमति काले वर्तमानस्य सत्त्वसामान्याभावस्यापि निरुक्तरूपत्वात्तस्य
चात्मादावसत्त्वेन यावद्धेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहात्तत्तावान् द्रव्यत्वादित्यादाव
व्याप्तिवारकमेव स्वविशिष्टपदं॥ ननु साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावो यदि

जाग॰ त्वधिकरणावच्छेदेन स्वावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणस्तत्वमित्येवसम्यक्॥ वाच्यत्वादि
६५ नाघटाद्यभावमादायैववाच्यंज्ञेयत्वादित्यादौ लक्षणसमन्वयादिति वाच्यं॥ स्वरूपसंबंधेन प्रमेयत्वावच्छिन्नाभावाप्रसिध्याप्र
मेयवान्ज्ञेयत्वादित्यादावव्याप्तिः॥ गुरुधर्मावच्छिन्नप्रतियोगित्वाप्रसिध्याप्रमेयवह्निमान्धूमादित्यादावव्याप्तेः॥ वृत्यनिया
मकसंबंधस्यप्रतियोगितानवच्छेदकतयागोमीमेनत्वादित्यादौस्वामित्वादिसंबंधेनगवादेः साध्यतायामव्याप्तेश्चेति दि
क्॥ ननुवह्नित्वेनधूमवद्वृत्तिसामान्याभावोधूमीयसंयोगसंबंधेनद्रव्यसामान्याभावोवाधूमाभावएवतथा संयोगत्वकभेद
तदभावान्यतरत्वेन संयोगैत्वकावृत्तेरभावोऽयोगोजकान्यत्वस्वरूपसंबंधेनभेदसामान्याभावोवासंयोगोजकान्यताभावएव
समनियताभावानामैक्यात्॥ तथाचधूमाद्यभावस्यप्रतियोगितावच्छेदकं यद्वह्नित्वादिकंतदवच्छिन्नेनैवसमंयावद्धेत्वधि
करणे धूमाद्यभावस्यप्रतियोगिसमानाधिकरणत्वात्धूमवान्वह्नेरित्यादावतिव्याप्तिः॥ सामान्यधर्मेणविशेषाभावाभ्यु
पगमेतुसुतरां तथा॥ धूमत्वेनधूमाद्यभावानामेवप्रमेयत्वादिनाधूमाद्यभावतया तस्यचप्रतियोगितावच्छेदकीभूतप्रमेयत्वा
द्यवच्छिन्नसमानाधिकरणत्वादितिचेत् अत्रापि यावत्वस्यफलतः प्रतियोगित्वस्यविशेषणतयासाध्यव्यापकतावच्छेदकरू
पावच्छिन्नयत्प्रतियोगिताकोयत्समानाधिकरणोऽभावस्तद्विशिष्टहेत्वधिकरणावच्छेदेनतत्तत्प्रतियोगितावच्छेदकावच्छि रामः
न्नसमानाधिकरणत्वपर्यवसितार्थः॥ तथाचधूमादिनिष्टतादृशधूमत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्यधूमादिभि २५
न्नंयत्प्रतियोगित्वंतदवच्छेदकीभूतधूमत्वाद्यवच्छिन्नेनसार्धं हेत्वधिकरणावच्छेदेनसामानाधिकरण्यविरहान्नातिप्रसंग

इतिसंप्रदायविदः॥ वस्तुतोऽत्रापि साध्यव्यापकतावच्छेदकरूपावच्छिन्नयास्त्वन्यूनवृत्तिधर्मानवच्छिन्नयायादृशप्रतियोगित
यानिरूपितोऽभावस्तादृशप्रतियोगितायायदवच्छेदकंतदवच्छिन्नसामानाधिकरण्यंवक्तव्यं॥ धूमत्वादिनाधूमाद्यभावस्तु
नप्रमेयत्वादिनाधूमाद्यभावः सामान्यधर्मेणविशेषाभावस्यानभ्युपगमात्॥ तदभ्युपगमेतुयादृशप्रतियोगिताकाभावेतादृ
शप्रतियोगितावच्छेदकावच्छिन्नवद्वृत्तितस्यजगद्वृत्तिभिन्नत्वस्यच द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृश
प्रतियोगिताकाभावानांतादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यंवाच्यमतोनकोपिदोषइतिध्येयम्॥ ॥चक्र
वर्तिलक्षणमन्याह॥ ॥केचित्विति॥ अनवच्छेदकमिति॥ ॥यत्साध्यतावच्छेदकमितिपरेणान्वितं॥ घटत्वादिना वह्न्याद्यभावमादा
यवह्निमान्धूमादित्यादौ लक्षणसंगतिः॥ व्यभिचारिणितु हेतुसमानाधिकरणसाध्यसामान्याभावस्यैव प्रतियोगितावच्छेदकं
साध्यतावच्छेदकमतोनातिव्याप्तिः॥ कपिसंयोग्येतत्वादित्यादावव्याप्तिवारणार्थं व्याप्यवृत्तेरिति॥ वह्नित्वादिनाघटाद्यभावमा
दायाव्याप्तिरतः साध्येति॥ अत्रचप्रतियोगितासाध्यतावच्छेदकसंबंधेनग्राह्या तेनसमवायादिसंबंधेन वह्न्याद्यभावस्यहेतुस
मानाधिकरणस्यप्रतियोगितावच्छेदकत्वेपि वह्नित्वादेर्नासंभवः॥ प्रतियोगिवैयधिकरण्यप्रवेशे वाच्यंज्ञेयत्वादित्यादावव्याप्तिः
॥प्रतियोगिवैयधिकरण्यस्याप्यभावाप्रसिद्धेरतस्तत्त्यागः॥ व्याप्यवृत्तित्वंतुनिरवच्छिन्नहेत्वधिकरणवृत्तिकत्वं॥ हेत्वधिकरण
यत्किंचिद्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकंयदभावव्यक्तित्वंतत्त्वं वा॥ एवंचैतल्लाभार्थमेवहेतु
समानाधिकरणस्येत्युक्तंनतुस्वातंत्र्येणतद्विशेषणंवैयर्थ्यात्॥ यत्किंचित्वनिवेशाच्चकपिसंयोगाभावस्यहेत्वधिकरणीभूत

गाग॰ ६५ द्व्यनिष्ठाभावप्रतियोगित्वेपि कपिसंयोगी सत्त्वादित्यादौ नातिव्याप्तिः॥ ननु समनियताभावानामैक्यात् घटत्वेन वह्न्यभावस्यैव
वह्नित्वेन घटाभावतया हेतुसमानाधिकरणस्य तादृशस्यैव साध्यप्रतियोगिकाभावस्य प्रतियोगितावच्छेदकं वह्नित्वादिकमि
त्यव्याप्तिरतः समनियताभावैक्यमतेपि निरुक्तिमाह॥ हेतुसमानाधिकरणस्येति॥ व्याप्यवृत्तेरभावस्य प्रतियोगितायाः सा
मानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना॥ नन्वत्रापि हेतुसमानाधिकरणस्य वह्नित्वेन वह्निधूमोभया
भावस्य वह्नित्वेन पर्वतावृत्तेरभावस्य च प्रतियोगितायाः समानाधिकरणं सदेव वह्नित्वमवच्छेदकमित्यव्याप्तिः॥ तादृशप्रति
योगितायाः अन्यूनवृत्तित्वे सति पदवच्छेदकतदन्यत्वोभयावपिततया॥ पर्वते वह्नित्वेन तार्णतार्णेतरदहनोभयं नास्तीति प्रती
तिसिद्धस्यैव तादृशाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्य॥ न च तादृशाभावप्रतियोगितावच्छेदकत्वं वह्नित्वमात्रे पर्या
प्तं किंतु तार्णतार्णोभयत्वेपि॥ अन्यथा तादृशप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नवति पर्वतादौ तादृशाभावासत्त्वप्र
संग इति वाच्यं॥ मोद्दंडमते प्रतियोगितावच्छेदकधर्मावच्छिन्नवत्तामात्रस्याभावाविरोधित्वात् अन्यथा घटवृत्तिघटत्वेन पटा रामः
भावस्यापलापापत्तेः॥ किंतु प्रतीतिबलात् व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारी २५
भूतधर्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नेनैव साधर्मनापत्याऽभावस्य विरोधित्वं वाच्यं॥ तदेतद्वह्नित्वादिना तार्णता
र्णोभयाभावादिसत्त्वेपि न क्षतिकरं॥ अत एव इदन्त्वेन वह्निर्नास्ति वह्नित्वेन तद्वह्निर्नास्तीति प्रतीत्या सामान्यधर्मेण विशे
षाभावोऽभ्युपेयते॥ न च तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं भासते इदन्त्वस्य तु वैशिष्ट्यमात्रं विषय इति वाच्यं॥ वह्निमा

नयमित्येवं निर्णये सत्यपि इदन्त्वेन वह्निर्नास्तीति प्रत्ययात् इदन्त्वस्यैवावच्छेदकतयाभानात् अन्यथा वह्नित्वावच्छिन्नवह्निनि
ष्ठप्रतियोगिताकत्वप्रकारेण वह्न्यभावबुद्धिं प्रति वह्नित्वेन वह्निविशिष्टनिश्चयस्यैव प्रतिबंधकत्वात् तादृशप्रतीत्यसंभवा
पत्तेः॥ अस्माकं तु इदन्त्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धिं प्रति इदन्त्वेन वह्निविशिष्टनिश्चयस्यैव विरोधि
त्वात्तदसत्त्वादेव तादृशाभावप्रतीतिसंभवादित्यतो लक्षणांतरमाह॥ प्रतियोगिव्यधिकरणस्येति॥ केचित्तु सामानाधि
करण्यमभेदः॥ तथा च हेतुसमानाधिकरणाभावीयस्वाभिन्नप्रतियोगितायाः अवच्छेदकं यद्यत्त्वं तदन्यत्वं साध्यतावच्छेद
के विवक्षितम्॥ प्रतियोगित्वं हि स्वरूपसंबंधविशेषः॥ सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरूप एव न तु प्रति
योगिस्वरूपः॥ ननु गमादौ दैनाधाराधेयभावानुपपत्तेः॥ सामान्यधर्मेण विशेषाभावस्थले प्रतियोग्यंशे प्रकारीभूतो
विशेषधर्म एव तथा न तु सामान्यधर्मः अतिप्रसक्तत्वात्॥ व्यधिकरणधर्मावच्छिन्नाभावस्थले च प्रतियोगितावच्छेदकोऽपि
स्वरूपं न प्रतियोगित्वं किंत्वतिरिक्तमेव॥ अन्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनैव साधर्मभावस्य विरोधात्
तदवच्छिन्नवति तादृशाभावस्यासत्त्वप्रसंगात्॥ विषयतोऽप्यतिरिक्तायां प्रतियोगितायामेव॥ अन्यथा समनियताभावैक्यानन्ति
स्विन्व्यधिकरणधर्मावच्छिन्नाभावस्य गगनाभावात्मकत्वात् गगनाभावः स्वीकर्तृणां चिंतामणिकाराणां तदंगीकारानु
पपत्तेः॥ इत्थं च पर्वते वह्नित्वेन तार्णतार्णे वह्नी न स्त इति प्रतीतिबलात् तादृशाभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेपि ता
दृशप्रतियोगित्वं न वह्नित्वाभिन्नं किंतु तादृशोभयत्वाभिन्नमतिरिक्तमेवेति स्वाभिन्नायाः साधनवन्निष्ठाभावप्रतियोगितायाः

ग्ना॰ग॰
६६

पदवच्छेदकं तद्भिन्नत्वस्य वह्नित्वेसत्वात्तस्य धूमव्यापकतावच्छेदकत्वहानिः॥ न च लक्षणे हेत्वधिकरणवृत्तित्वमभा
वस्य संबंधमात्रेण न वाच्यं॥ वह्निसामान्याभावस्यापि कालिकादिसंबंधेन धूमवति सत्वादव्याप्त्यापत्तेः॥ नापि दैशिकविशे
षणतया घटभिन्नं द्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः घटत्वस्वरूपस्य साध्याभावस्य दैशिकविशेषणतया वृत्तित्वविरहादि
त्यतो लक्षणांतरमाह॥ प्रतियोगिव्यधिकरणस्य वेति प्राहुः॥ ॥अपरे तु॥ प्रागुक्तं व्याप्यवृत्तित्वपार्त्किंचित्वघटितत्वेन दु
र्वचमतः प्रतियोगिव्यधिकरणस्येत्यादि लक्षणांतरमुक्तमित्याहुः॥ अन्ये तु कालिकसंबंधावच्छिन्नप्रतियोगिताका
कात्यंताभावाभाववादौ साध्ये आत्मत्वादिहेताववव्याप्तिः आकाशाभावात्मकस्य साध्याभावस्य निरवच्छिन्नवृत्तिकत्वात्तत्र
तियोगितावच्छेदकमेव साध्यतावच्छेदकमतः प्रतियोगिव्यधिकरणस्य वेति लक्षणांतरमित्याहुः॥ हेतुसमानाधिकरण
स्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजनं
॥अथात्र प्रतियोगिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधिकरणभिन्नत्वं समनियताभावानामभिन्नतया घटितत्वेन घटाभावा
देरपि घटत्वेन प्रमेयसामान्याभावस्वरूपत्वात्तस्य च प्रमेयात्मकप्रतियोगिसमानाधिकरणतया तद्भिन्नत्वासंभवात्॥ अत एव
वस्य प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणे यो यस्तदन्यत्वमपि न तथा॥ घटत्वेन घटाभावादेरपि प्रमेयत्वादिना घटा
द्यभावस्य द्रव्यत्वेन घटवद्वृत्तेरभावस्य वा तादात्म्यापगमादप्रसिद्ध्यापत्तेः॥ व्यधिकरणधर्मावच्छिन्नाभावस्यापि तत एव वा
रणसंभवेऽव्याप्तिवारकसामानाधिकरण्ये तस्यैव पर्याप्तत्वाच्च॥ न च साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रया

राम:
२६

घट

नधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितां तात्पर्यं॥ तथा च वह्नित्वेन घटाभावीयं निष्ठं प्रतियोगित्वमपि ताद
शमतस्तदवच्छेदकत्वं वह्नित्वेप्यस्तीति सामानाधिकरण्यपदं॥ तेन तादृशप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकाप्र
सिद्धात तद्भिन्नप्रतियोगितैव लक्षणघटकेति वाच्यं॥ विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिः गुणादीनामपि विशिष्टसत्ताभि
न्नप्रतियोगिताश्रयाधिकरणत्वात्॥ घटवान्महाकालत्वादित्यादावव्याप्तिप्रसंगात्त्व॥ हेतुमतो महाकालस्य साध्यताघटकका
लिकसंबंधेन घटाद्यभावप्रतियोगिताश्रयाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरिति चेदत्राहुः॥ साध्यतावच्छेद
कसंबंधेन स्वाश्रयवृत्तिस्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्व्यक्त्यधिकरणिकायावत्यः प्रतियोगितास्तदन्यप्रतियोगित्वं प्र
तियोगिनां तात्पर्यं॥ तथा च वह्नित्वेन घटाद्यभावस्यापि घटादिनिष्ठप्रतियोगितातादृशीति तदवच्छेदकत्वं वह्नित्वेप्यस्तीत्यतः सामा
नाधिकरण्यपदं॥ घटवान्महाकालत्वादित्यादौ तु गगनाभावीयं गगननिष्ठमेव तादृशप्रतियोगित्वं सुलभमिति न कोपि दो
षः॥ वस्तुतो धूमवति वह्नित्वेन घटो नास्तीतिवद्धूमवान्वह्नित्वेन न घटवान् किंतु घटत्वेनेति प्रतीतिबलात् व्यधिकरणधर्माव
च्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभावोप्यस्ति अत एव समवायितया वाच्यत्ववच्छेदे घटादौ पक्षधरमिश्रैः स्वीकृ
तः॥ तथा च यादृशप्रतियोगितावच्छेदकावच्छिन्नायत्वेन साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रयाधिकरणान्य
त्वं हेतुमतस्तादृशप्रतियोगितासमानाधिकरणवृत्तितावच्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकत्वाभाववत्तं
तादृशप्रतियोगितावच्छेदकान्यत्वं वा साध्यतावच्छेदके विवक्षितं॥ तथा च घटादिनिष्ठस्य वह्नित्वेन घटाद्यभावप्रतियोगित्व

जाग० स्याप्रिता दृशत्वेन वह्नित्वादेस्तदवच्छेदकत्वाद्व्याप्तिरतः सामानाधिकरण्येनेत्युक्तं॥ तथा च वह्नित्वस्य तादृशप्रतियोगि
६७ तावच्छेदकत्वेपि तादृशप्रतियोगितासमानाधिकरणवृत्तित्वरूपव्यधिकरणधर्मेण तादृशप्रतियोगितावच्छेदकं भेदस्य
तत्र सत्त्वान्नातिव्याप्तिः॥ कालो घटवान् महाकालत्वादित्यादौ हेतु घटादिसामान्याभावप्रतियोगितायाः अन्यथात्वेपि घटत्वे
न पटाद्यभावप्रतियोगितामादायैव लक्षणसमन्वयः॥ कालः पटत्वेन पटवान्न तु घटत्वेनेत्यनुभवात्॥ वह्नित्वादिसामान्य
धर्मेण महानसीयवह्न्याद्यभावसत्त्वे तु पादृशप्रतियोगितावच्छेदकेत्यत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वं ग्राह्यं॥ तद्वत्त्वृत्ति
रिक्तवृत्तित्वे सति तत्समानाधिकरणं यद्यत्र द्रव्यत्वं नातो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अन्तु एव वारणसंभवेऽस
मानाधिकरण्यदलवैयर्थ्यमित्यस्मद्गुरुचरणाः॥ यत्तु॥ यत्प्रतियोगितावच्छेदकविशिष्टस्य यत्प्रतियोगिताश्रयस्य च
द्वयोः साध्यतावच्छेदकसंबंधेनानधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितांतार्थः॥ तथा च वह्नित्वेन घ
टाद्यभावस्य घटनिष्ठप्रतियोगिताया अपि तादृशत्वाद्वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरतः सामानाधिकरण्ये रामः २७
नेति प्रागुक्तार्थकं॥ एतन्मते च सामान्यरूपेण द्वेषाभावानभ्युगमः नातो वह्नित्वेन तद्धूमाभावमादायाव्याप्तिः॥ न च
स्वरूपसंबंधात्मकप्रतियोगितायाः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान्धूमादित्यादावव्याप्तिः॥ वह्निसामान्याभावीयं यन्तु
महानसीयवह्निनिष्ठं प्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतमहानसीयवह्नेश्च द्वयो
रनधिकरणं तस्य हेतुमति पर्वते सत्त्वादिति वाच्यं॥ प्रतियोगिव्यक्तीनां भेदेपि एकधर्मावच्छिन्नप्रतियोगिताया ऐक्येना

स्वीकारादिति॥ न च कालो घटवान् महाकालत्वादित्यादौ तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिः गगनाद्यभावीयप्रतियोगिताश्र
यीभूतगगनस्याधिकरणाप्रसिद्ध्या तादृशप्रतियोगितायाः लक्षणघटकत्वादिति वाच्यं॥ महाकालान्यत्वविशिष्टघटाद्य
भावस्य तादृशविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वात्॥ यत्प्रतियोगितावच्छेदकविशिष्टयत्प्रतियोगिताश्र
योभयत्वं वा हेत्वधिकरणयत्किंचिन्निष्ठाभावप्रतियोगितावच्छेदकं तादृशप्रतियोगिताया एव निवेश्यतया घटत्वेन गगना
भावादिकमादायैव तत्र लक्षणसंभवाच्चेति॥ तन्न॥ प्रतियोगिभेदेपि प्रतियोगितावच्छेदकभेदेन प्रतियोगितायाः पृथग्भेद
स्तदा वह्नित्वेन घटाभावस्य यावद्वह्नित्वावच्छिन्नाधारनिष्ठप्रतियोगितास्वेव वह्नित्वादिना वह्निधूमोभयाभावस्यापि वह्नित्वाव
च्छिन्नाधूमादिनिष्ठप्रतियोगिताश्रयवान् तथा च सामानाधिकरण्येनेत्यस्य वैयर्थ्यं दुर्वारं॥ वह्नित्वेन घटाभावीयं यद्घटनिष्ठं
प्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तादृशप्रतियोगिताश्रयीभूतवह्निधूमादेश्च द्वयोरधिकरणत्वस्य सर्वत्रैव हे
तुमति सत्त्वेन वह्नित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाः लक्षणघटकत्वादित्यादिकं॥ एवं चेति॥ तथा चास्य पारिभा
षिकत्वान्नादृशेपि न क्षतिरिति भावः॥ वह्नित्वाद्यवच्छिन्नघटाद्यभाववति धूमादेर्वर्तमानत्वादुक्तसाध्याभावेति॥ अत्र साध्याभावो
व्याप्यवृत्तिर्बोध्यः॥ एवं परत्रापि॥ विशिष्टेति॥ महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकस्येत्यर्थः॥ ननु विशिष्ट
स्यातिरिक्तत्वान्महानसीयत्ववह्नित्वयोर्वैशिष्ट्यस्यैव वा परंपरयात्रावच्छेदकत्वान्नेष दोष इत्यत आह॥ कृहत्ववह्नित्वेति॥
ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगी सत्त्वादित्यत्रातिव्याप्तिः स्वसमानाधिकरणाभावप्रतियोगित्वरूपस्यावच्छिन्न वृ

जाग० त्रिकान्यतरूपस्य वा व्याप्यवृत्तित्वस्य संयोगाभावे ऽसत्वादत आह॥ सत्ववतीति॥ तथा च हेतुसमानाधिकरणस्य व्याप्यवृ
६८ त्तेरित्यंतेन निरवच्छिन्नहेत्वधिकरणवृत्तित्वं हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगित्वं वा ऽभावस्य विवक्षि
तमिति भावः॥ गुरुधर्मेण साध्यतायां व्यभिचारिण्यपि व्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे ऽव्या
प्यवृत्तित्वस्य प्रकृतनिरुक्तावप्रवेशेऽपि न क्षतिरित्याशयेनाह॥ वक्ष्यमाणेवेति॥ यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरि
क्तवृत्तित्वस्योक्तेः सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः॥ तादृशप्रतियोगितावच्छेदकीभूतं द्रव्यान्यत्वविशिष्टसत्तात्वानतिरिक्त
वृत्तित्वात् सत्तात्वस्येत्यतो वक्ष्यमाणमिति॥ सिद्धांतलक्षणे वक्ष्यमाणमित्यर्थः॥ तथा च हेतुमन्निष्ठाभावीययत्संबंधावच्छिन्न
प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितायाः सामा
नाधिकरण्येनानवच्छेदकं तद्देव पारिभाषिकावच्छेदकं तद्रूपत्वं साध्यतावच्छेदके वाच्यमिति भावः॥ ननु उत्पत्तिदशायां
गुणसामान्याभावस्य संयोगवति घटादौ सत्वात् गुणत्वस्य संयोगत्वविशिष्टसंबंधिनिष्ठाभावीयतत्संबंधावच्छिन्नप्रतियो रामः।
गितानवच्छेदकत्वविरहान्नतमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वसंभावनापीत्यत आह॥ गुणवृत्तित्वेति॥ गुणस २८
मवेतत्वेत्यर्थः॥ घटादावुत्पत्तिदशायामपि गुणसमवेतस्य द्रव्यत्वादेः सत्वान्न तदभाव इति भावः॥ संयोगीगुणान्यत्वस
तिसत्वादित्यादौ गुणवृत्तित्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं सूक्ष्ममाह॥ द्रव्यमात्रेति॥ द्रव्यान्यासमवे
तत्वेत्यर्थः॥ + भवति गुणवृत्तित्वावच्छिन्नाभावस्य हेत्वसमानाधिकरणत्वात् अतः संयोगसाध्यकव्यभिचारिमात्रे यद्धर्म

मादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं त + उक्ताभावानामव्याप्यवृत्तित्वे संयोगात्मकस्य प्रतियोग्यधिकरणवृत्तित्वेन क
दाचिद्गुणत्वादिरूपाणां तत्प्रतियोगितावच्छेदकानां संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं न स्यात्तत्तद
वतु नोक्तिस्तेषां व्याप्यवृत्तितया संयोगात्मकस्य प्रतियोग्यधिकरणवृत्तित्वादेतावन्मात्रं सूचयितुमुक्तं व्याप्यवृत्तीति॥ प्रागल्भ
लक्षणं दूषयितुमुपन्यस्यति॥ साध्यतावच्छेदकेति॥ स्वपदं विशिष्टहेतुपरं॥ तथा च यद्धर्मावच्छिन्नसमानाधिकरणसाध्याभाव
तावच्छेदकेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं तद्धर्मवत्वं पर्यवसितं॥ अवच्छेदकत्वं चानतिरिक्तवृत्तित्वं॥ व्यभि
चारिणि तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव साध्यसामानाधिकरण्यविरहान्नातिप्रसंगः॥ विशिष्टसत्तावा
न् जातेरित्यादौ यावत एव हेतुसमानाधिकरणस्य साध्याभावस्य सत्तारूपसाध्यसामानाधिकरण्यादतिव्याप्तिरतः साध्यता
वच्छेदकावच्छिन्नेति॥ तथा च विशिष्टसत्ताभावस्यैव तादृशस्य विशिष्टसत्तारूपसाध्यसमानाधिकरणत्वाभावान्नातिप्रसंगः॥
उक्तं च साध्यसामानाधिकरण्यं येन संबंधेन साध्यता तेन संबंधेन साध्यस्याधिकरणे दैशिकविशेषणतया वृत्तिमत्त्वरूपं ग्राह्यं ते
न द्रव्यत्वादिसमानाधिकरणस्य ज्ञानाद्यभावस्य विषयतया ज्ञानाद्यधिकरणे वृत्तावपि समवायेन ज्ञानसाध्यके द्रव्यत्वादि
हेतौ नातिव्याप्तिः॥ न च कालः प्रमेयत्वादित्यादौ सर्वेषामेव साध्याभावानां साध्यवति काले कालिकसंबंधेन वृत्तावप्यतिप्र
संगः॥ साध्याभाववन्निष्ठहेतुसामानाधिकरण्यमपि हेतुतावच्छेदकसंबंधेन प्रकृतहेतोर्यदधिकरणं तत्र विशेषणतया वृत्तिम
त्वरूपं बोध्यं॥ तेनायमात्मा ज्ञानादित्यादौ विषयतया ज्ञानस्य हेतोरधिकरणे वर्त्तमानस्यात्मत्वाभावस्य द्रव्यविशिष्टसत्तादि

जाग॰ ६९

त्यादौ च सत्तासमानाधिकरणस्य द्रव्यत्वसामान्याभावस्य साध्यसामानाधिकरण्यविरहेऽपि नाव्याप्तिः॥ न वा कालः कालप
रिमाणमित्यादौ हेत्वधिकरणे कालिकसंबंधेन वर्त्तमानस्य कालत्वादिसामान्याभावस्य साध्यवति दैशिकविशेषणतया वृ
त्तिमत्वविरहेऽपि क्षतिः॥ साध्याभावस्तु पूर्वोक्तद्वितीयरीत्या बोध्यः॥ तेन व्यधिकरणधर्मावच्छिन्नाभावासत्वेऽपि साध्यस्य विशिष्टा
भावादिकमादायैव लक्षणसंभवान्न प्रतियोग्यवृत्ति इत्यादिग्रंथावतारसंगतिः कपिसंयोगिसत्वादित्यादौ तु कपिसंयो
गाद्यभावस्य साध्यसामानाधिकरण्येऽपि द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य साध्यसामानाधिकरण्यविर
हान्नातिव्याप्तिः॥ कालिकसंबंधावच्छिन्नप्रतियोगिताकेगगनाभावस्याभावे साध्ये यत्र प्रमेयत्वादिकं हेतुः तत्र हेतुमति दै
शिकविशेषणतया वर्त्तमानस्याकाशाभावात्मकस्य साध्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तावपि हेतुसमानाधि
करणस्य नित्यत्वादिसामान्याभावस्यापि निरुक्तसाध्याभावतया तस्यैव साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः॥ पक्षस
मानाधिकरणेति॥ पक्षसमानाधिकरणसाध्याभावप्रमासामान्य इत्यर्थः॥ तेन धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्न
साध्याभावप्रमायाः क्वचित् साध्यवत्ताज्ञानाविरोधित्वेऽपि साध्यसामान्याभावप्रमाया एव साध्यवत्ताज्ञानविरोधितया नातिव्याप्तिः॥ रामः ६९
व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य साध्यसामान्याभावत्वभ्रमदशायां पर्वतो वह्निमानित्याकारकसाध्यवत्ताज्ञानविरो
धित्वादसंभवः स्यादतः प्रमात्वोपादानं॥ प्रमात्वं चात्र भ्रमसामान्यभिन्नज्ञानत्वं नातस्तादृशबुद्धेरपि भ्रांतः प्रमात्वादुक्तदोषता
दवस्थ्यं॥ ह्रदादौ वह्निसामान्याभावप्रमायाः साध्यवत्ताज्ञानविरोधित्वादव्याप्तिरतो पक्षसमानाधिकरणेति फलतः प्रमाविशेष

णं॥ तथा च पक्षधर्मावच्छिन्नवद्विशेष्यकसाध्याभावप्रमासामान्य इत्यर्थः॥ तेन वृक्षत्वसमानाधिकरणस्य संयोगसामान्याभाव
स्यैव गुणे धर्मिणि प्रमायाः साध्यवत्ताज्ञानविरोधित्वेऽपि संयोगी वृक्षत्वादित्यादौ नाव्याप्तिः॥ यत्तु॥ साध्यवत्ताज्ञानविरोधित्वं हेतु
मन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यत्साध्यवत्ताज्ञानं तद्विरोधित्वरूपं वाच्यं॥ तथा च गुणो न संयोगीति प्रमायाः गुणः संयोगी
त्याकारकबुद्धिविरोधित्वेऽपि तादृशसाध्यवत्ताधीर्न हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यिका गुणत्वादेर्हेतुमदन्यवृत्तित्वादतो
नोक्तदोष इति॥ तन्न॥ पक्षसमानाधिकरणेत्यस्य वैयर्थ्यापत्तेः॥ साध्याभावप्रमासामान्ये यद्वन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यक
साध्यवत्ताज्ञानस्य विरोधित्वं नास्तित्वमित्यस्यैव सम्यक्त्वात्॥ जलादिधर्मिकवह्निसामान्याभावप्रमायाः साध्यवत्ताधीविरोधि
त्वेऽपि धूमवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यद्वह्निमत्ताज्ञानं तद्विरोधित्वादेव वह्निमान्धूमादित्यादौ अव्याप्त्यसंभवादिति दिक्
॥अत्र च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकरूपेण च साध्यवत्ताज्ञानं बोध्यं॥ तेन पर्वतो न समवायेन वह्निमानित्यादि
प्रमायाः समवायेन वह्निमत्ताबुद्धिं प्रति पर्वतो महानसीयवह्निमान्नेति प्रमायाश्च संयोगेन महानसीयवह्नि+प+मत्त्वबोधं प्रतिप्र
तिबंधकत्वेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः॥ प्रतिबंधकत्वं चावच्छेदकधर्मवत्ताज्ञानव्यावृत्तं ग्राह्यं॥ तेन वह्निसामान्याभावा
वच्छेदकतया गृहीतस्य महानसीयवह्न्यभावादेः पर्वतादौ प्रमायाः संयोगसंबंधावच्छिन्नपर्वतधर्मिकवह्निमत्ताबुद्धिविरोधि
त्वेऽपि नासंभवः॥ सर्वत्रेति॥ साध्यसामानाधिकरण्यावच्छेदकस्य समानाधिकरणत्वकत्वमित्यत एव प्रथमस्य द्वितीयस्य च य
त्समानाधिकरणप्रमासामान्ये साध्यवत्ताज्ञानविरोधित्वं नास्तित्वमित्यत एव सामंजस्यादिति भावः॥ यत्तु॥ पक्षसमानाधि

जा ग० करणसाध्याभाववत्तावच्छेदेनसाध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यं न त्वमेवं लक्षणं+प्रथम+पं॥ तथा
७० चधूमसमानाधिकरणस्य घटादिसामान्याभावस्य वह्नित्वावच्छिन्नघटाद्यप्रसिध्या साध्यतावच्छेदकावच्छिन्नप्रतियोगि
सामानाधिकरण्याभावासंभवस्यादतः साध्याभावपदं॥ नचैवमपि प्रतियोगिपदं व्यर्थमेवेति वाच्यं॥ अनतिरिक्तवृत्ति
त्वरूपावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावस्याखंडस्यैव निविष्टत्वात्॥ एवं दितापुर्वक्षे
ऽपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्ताग्रहविरोधित्वं निवेश्य साध्याभावपदस्य सार्थक्यं बोध्यं इति॥ तन्मन्दं॥ प्रतियो
ग्यवृत्तिश्चेत्यादिग्रंथावतारानुरोधेन साध्याभावस्य पूर्वोक्तवृत्तिपरत्वे एवकव्यतया हेतुसमानाधिकरणस्य वह्नित्वेन घ
टाभावादेरेव साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याप्रसिद्ध्या तदंशपदप्रक्षेपस्याप्यसंभवतादवस्थ्यात्॥
नच घटत्वेन वह्न्यभावो वह्नित्वेन घटात्मकः समनियताभावाभेदात् तन्न पाच तस्यापि साध्यतावच्छेदकविशिष्टवह्नित्वरू
पप्रतियोगिनः सामानाधिकरण्यमक्षतमेवेति वाच्यं॥ तथा सति घटसामान्याभावादेरपि घटत्वादिना प्रमेयसामान्याभावा
त्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रमेयरूपप्रतियोगिसामानाधिकरण्यमादायासंभववारकस्य
साध्याभावपदस्य व्यर्थतापाप्तवृत्तेपत्वात् इति॥ प्रगल्भस्यैव लक्षणं निरमुपन्यस्यति॥ पात्विति॥ यद्वृत्ताविति॥ यन्निष्ठसाध्या
भाववद्वृत्तित्वसामान्यमित्यर्थः॥ तेन वह्निनिष्ठस्य व्यधिकरणधर्मावच्छिन्नधूमाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेपि
धूमवान्वह्नेरित्यादौ नातिव्याप्तिः॥ धूमादिनिष्ठं धनत्वाद्यवच्छिन्नधूमाभाववद्वृत्तित्वस्यापि इंधनत्वादिप्रकारेणव्यानुमितेर्विरो॥ राम: ३०

धित्वादसंभवः स्यादतः प्रकृतेति॥ साध्यतावच्छेदकेन संबंधेन रूपेण च प्रकृतसाध्यकेत्यर्थः॥ तथा च तादृशसाध्याभाववद्वृत्तित्वस्य
वह्नित्वेन वह्न्यनुमितिं प्रत्यविरोधित्वाददोषः॥ प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिज्ञानविषयत्वमात्रं धूमनिष्ठवृत्ति
त्वस्यापि वह्न्यनुमितिविरोधिनो व्यभिचारभ्रमस्य विषयत्वसंभवात् किंतु विषयविधया प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वं
॥ तथा च वह्निनिष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधितावच्छेदकताभावात् व्यभिचारिण्यतिव्याप्तिरतः साध्याभाववेति
ति॥ तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यं प्रकृतानुमितिप्रतिबंधकतानवच्छेदकत्वमर्थः॥ नच घटाभाववद्वृत्तित्वादेः साध्या
भाववद्वृत्तित्वात्त्वभ्रमदशायामपि धूमसाध्यकानुमित्यनुत्पत्त्या वह्निनिष्ठनिर्धूमवृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबंधकतानव
च्छेदकत्वाद्व्यभिचारिण्यतिव्याप्तितादवस्थ्यमिति वाच्यं॥ यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्येन प्रकृतानुमितिप्रतिबंधका
तानतिरिक्तवृत्तित्वमित्यस्योक्तत्वात्॥ साध्याभाववत्त्वपूर्वोक्तवृत्तीपरीत्या प्रवेशनीयम्॥ तेन न पूर्वोक्तदोषः॥ अनुमित्यविरोधित्वज्ञा
नस्येति॥ अनुमितिविरोधित्वं हि न साक्षादनुमितिप्रतिबंधकत्वं व्यभिचारधियः साक्षादतथात्वेन व्यभिचारिमात्रेतिप्रसंगापत्तेः॥ किं
त्वनुमितिजनकज्ञानविरोधित्वं तच्च न कंचयदिनिरुक्तव्याप्तिज्ञानं तद्धतादृशज्ञानं प्रति न साध्याभाववद्वृत्तित्वज्ञानं विरोधि॥ किंतु सा
ध्याभाववद्वृत्तित्वमनुमितिविरोधीत्याकारकज्ञानमेवतथेति व्यभिचारिण्यतिव्याप्तिः॥ यदि च साध्याभाववद्वृत्तिर्हेतुरित्याकारकज्ञा
नं प्रकृतानुमितिजनकं तदा निरुक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानमपार्थकं स्यादिति भावः॥ एतेन यदि प्रकृतानुमि
तिपदं प्रकृतहेतुधर्मिकसाध्याभाववद्वृत्तित्वानुमितिपरं न तु प्रकृतसाध्यकानुमितिपरं विरोधित्वं चात्र साक्षादेवनिवेश्यते॥

मा. गृ. तदानव्यभिचारिण्यतिप्रसंग इत्यपास्तं॥ तादृशव्याप्तेरनुमित्यनुपयुक्ततया तदभिधाने र्थान्तरतादवस्थ्यमिति॥ ॥श्री॥ मि
७१ श्रलक्षणमेव परिष्कृतोपन्यस्यति॥ केचित्विति॥ केवलान्वयिनि प्रसिद्धावपि वृक्षादिसाध्यकेव्यतिरेकिणि यावंतः साध्याभावास्त
त्तत्सजातीयत्वं तत्तदधिकरणवृत्तित्वाभावेतादृशान्यतररूपात्मकमप्रसिद्धमेत उक्तं प्रत्येकमिति॥ यावंतः साध्याभावास्तेषां
प्रत्येकमपि सजातीयत्वमेव स्मिन्नभावे नास्तीत्यत उक्तं॥ तत्तत्सजाती इति तदधिकरणवृत्तित्वाभावा इत्युक्ते तत्पदेन यावत्साध्या
भावपरामर्शो वह्निमान्धूमाद्रूपसामान्याभाववान्वायुत्वादित्यादौ साध्याभावात्मकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावयावद्रूपा
द्यधिकरणाप्रसिद्ध्याव्याप्तिरेतत्तत्तदधिकरणेति॥ तथा च प्रातिस्विकरूपेण साध्याभावानुपादाय तत्तत्सजातीयस्तत्तदधिके
रणवृत्तित्वाभावो ग्राह्य इति भावः॥ व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयं घटत्वादिना तत्तदधिकरणवृत्तित्वाभावमादाय दृधि
व्यभिचारिण्यतिव्याप्तेर्यावंत इति॥ तथा च साध्यसामान्याभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य तत्रासत्वाद दोषः॥ साध्य
सामान्याभाववद्वृत्तित्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावो व्यभिचारिण्यप्यस्तीत्यतः सजातीया इत्युक्तं॥ ननु घटत्वेन निर्धूमवृत्ते रामः
तस्याभावोपि अभावत्वादिना धूमसामान्याभावसजातीय एवेत्यतिव्याप्तितादवस्थ्यमत आह॥ साजात्यं चेति॥ यद्यपि साध्याभा ३१
वनिष्ठं यत्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपं तेनैव रूपेण सा
जात्यं वाच्यं॥ तथा च वह्निसामान्याभावादिनिष्ठं यत्तादृशान्यतररूपं वह्निनिष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वस्वरूपं तस्यानिर्व
ह्निवृत्तित्वसामान्याभावे असत्वादसंभवः॥ तथापि यावंतः समानाधिकरणधर्मावच्छिन्नाभावास्तावदन्यतमत्वतद्भिन्नत्वान्यत

ररूपेण साजात्यं वाच्यमित्यदोषः॥ समनियताभावानामैक्यात् गगनाभाव एव निरुक्तव्यधिकरणधर्मावच्छिन्नाभाव इति मते तु गग
नाभावत्व तद्भिन्नत्वान्यतररूपेणैव साजात्यं वाच्यं॥ तेन घटत्वेन निर्धूमवृत्तित्वाभावस्यैव गगनत्वादिसमानाधिकरणधर्मावच्छिन्न
प्रतियोगिताकतया धूमसामान्याभावसजातीयत्वेपि नातिव्याप्तिः॥ साध्याभाववत्त्वेति॥ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छे
दकरूपावच्छिन्नप्रतियोगिताकाभावोत्र साध्याभावपदेनोक्त इत्यर्थः॥ साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वरूपप्रथमरीत्या
भिधाने घटत्वविशिष्टवान्यतादृशाभावस्यापि साध्याभावपदार्थतया तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्यापि हेतावसत्वा
दसंभवस्यादत्तत्परित्यागः॥ अत्र च साध्यव्यापकताघटकसंबंधेनैव साध्यव्यापकस्याभावो ग्राह्यः॥ तेनैकसंबंधेन साध्यव्या
पकस्य संबंधांतरावच्छिन्नाभाववति हेतौ वृत्तावपि न क्षतिः॥ यत्तु॥ साध्यतावच्छेदकसंबंधेन साध्यव्यापकत्वं तेनैव साध्यव्या
पकस्याभावो निवेश्य इति मतं॥ तत्तुच्छं॥ यत्नु तादात्म्यसंबंधेन प्रमेयमात्रं साध्यं तत्र तेन संबंधेन साध्यव्यापकतावच्छेदकं प
त्प्रमेयत्वादिकं तादात्म्येन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या तत्र सद्धेतावव्याप्तिः॥ प्रमेयत्वेन घटपटोभयभेदस्वीका
रेणैकधर्मिनिष्ठाव्याप्तिवारणेपि वृत्त्यनियामकसंबंधेन साध्यतायामव्याप्तिः॥ साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताप्रसि
द्धेः॥ किं चैवं धूमवान् वह्नेरित्यादावतिव्याप्तिः॥ संयोगेन धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वेन घटाद्यभावस्यैव तादृशा
स्य यावदंतर्गतत्वेन तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य वह्नौ सत्वात्॥ अस्माकं तु स्वरूपसंबंधेनापः पिंडमेदस्यापि
धूमव्यापकतया वह्नेस्तदभाववद्वृत्तित्वादेवातिव्याप्तिनिरासादिति ध्येयं॥ ननु कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः॥ कपिसं

जाग० योगसामान्याभावस्यापि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन यावदंतर्गतत्वे
७२ तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावेवाभावादत आह ॥ व्याप्यवृत्तीति ॥ व्याप्यवृत्तित्वं अवच्छिन्नवृत्तिकान्यत्वं ॥ संयोगी
सत्वादित्यादौ तु द्रव्यत्वादिसामान्याभावस्यापि साध्याभाववतया हेतोः तदधिकरणवृत्तित्वादेव नातिव्याप्तिः ॥ ननु रूपवान् पृथिवीत्वा
दित्यादावव्याप्तिः रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावांतर्गतत्वात् तत्सजातीयस्य तदधिकरणवृत्तित्वसामा
न्याभावस्य हेतावसत्वात् ॥ सामान्यधर्मेण विशेषाभावस्वीकारे तु रूपत्वेन तद्रूपाभावमादायाव्याप्तिरत आह ॥ प्रतियोगितावच्छे
दकावच्छिन्नेत्यादि ॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वं च यत्प्रतियोगिताकाभावस्यावच्छेदकसंबंधेन स्वसमा
नाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगिताकत्वं बोध्यं ॥ तेन नित्यरूपात्मकेन प्रतियोगितावच्छेद
कावच्छिन्नप्रतियोगिना सामानाधिकरण्यविरहेपुक्ताभावस्य न संग्रहः ॥ न च वाच्यत्वे तेन प्रमेयताघभावस्यैव तत्त्वेन वाच्यता
घभाववतया व्यधिकरणधर्मावच्छिन्नाभावमात्रस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्येपि तत्संग्रहः ॥ रामः
अत्र च निरुक्तयावत्तदन्यप्रतियोगिताया एव साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यं ॥ तेन संयोगात्मकस्यैव साध्याभाव ३२
स्य समवेतसामान्याभावनिष्ठनिरुक्तप्रतियोगिताकत्वकपिसंयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियो
गिताकत्वयोः सत्वेपि कपिसंयोगाभाववान् वाच्यत्वादित्यादौ रूपत्वेन नित्यसमवेताभावस्यैव नित्यरूपसामान्याभावतया तत्र नि
त्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगिताकत्वे साध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियोगिताकत्वयोः सत्वेपि रूपवान्

पृथिवीत्वादित्यादौ वनाव्याप्तिः ॥ समवेतसामान्याभावत्वाद्यवच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छेदकरूपानवच्छे
द्यत्वादिति ध्येयं ॥ विपरीतेः प्रवेशस्य फलमाह ॥ तत्र साध्यव्यक्तेरिति ॥ अभाववति हेतोर्वृत्त्यभावेपि नाव्याप्तिरित्यन्वयः ॥ व्या
प्यवृत्तित्वादेः फलमाह ॥ अव्याप्यवृत्तेर्वा साध्यस्येति ॥ तत्र साध्याभाववत्यादि ॥ सामान्यतः साध्याभाववद्वृत्तित्वं तद्व्यापकेत्यु
क्तौ वह्निसामान्याभावसजातीयस्य व्यधिकरणधर्मावच्छिन्नाभावस्य साधारण्येन साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभा
वस्याप्रसिद्ध्या व्यतिरेकिमात्रेऽव्याप्तिरत उक्तं तदिति साध्याभावविशेषणं ॥ तथा च निर्वह्निवृत्तित्वसामान्याभावएव निर्वह्निवृत्तित्व
त्वव्यापकप्रतियोगिताकस्तत्र साध्याभावसजातीयोक्तात्पदोषः ॥ नन्वेवमपि जलवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्य निरुक्त
रूपज्ञानविनो वह्नौ सत्वादतिव्याप्तिः ॥ न च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वे परित्यज्यत्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमेव प्रतियोगिता
या विशेषणं वाच्यमिति दोषः ॥ तथापि गुणभेदाभावसजातीयस्य पूर्वक्षणवृत्तित्वविशिष्टगुणसमवेतत्वाभावस्य हेतौ सत्वात् गुण
भिन्नं सत्वादित्यादावतिप्रसंगादत आह ॥ तत्र साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता
कोवा बोध्य इति ॥ अयं पाठः क्वाचित्कः ॥ तत्र चातिरिक्तं तेन निर्वह्निवृत्तित्वसामान्याभावादेः संग्रहः ॥ अन्यथा वह्निसामान्या
भावसजातीयस्य समानाधिकरणधूमेनावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्या व्याप्तिप्रसंगात् ॥ न च निर्धूमत्वादि सजाती
यस्य निर्धूमवृत्तित्वत्वादिनावह्निवृत्तेरभावस्य हेतौ सत्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिः ॥ हेतुताघटकसंबंधावच्छिन्नवृत्ति
तामात्रनिष्ठत्वेन प्रतियोगितायां निवेशनीयत्वेपि निर्धूमवृत्तित्वत्वेन जलवृत्तित्व जलान्यनिर्धूमवृत्तित्वोभयाभावमादा

जाग॰ ७२ याति व्याप्तितादवस्थ्यमिति वाच्यं॥ एतद्रसस्यैव पक्षेऽन्यादिलक्षणान्तरस्य वक्ष्यमाणत्वात्। यद्यपि तत्र साध्याभाववद्वृत्ति
त्वत्वावच्छिन्नाभावा इत्यस्यैव सम्यक्त्वे समानाधिकरणधर्मादिकं प्रक्षिप्य निषेधद्वयप्रवेशो निरर्थकः॥ स्ववत्र व्यधिकरणध
र्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन तादृशाभावस्यैव तादृशस्य साध्याभावसजातीयस्यासंभवात्॥ तथापि यथाश्रुते दोषेन वैय
र्थ्यं॥ यत्र तादात्म्यसंबंधेन हेतुता तत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववृत्तादात्म्यस्य जगत्स्वरूपतया तादृशतादात्म्य
त्वस्य केवलान्वयित्वेन तदवच्छिन्नाभावाप्रसिद्ध्या व्याप्तिस्यादतो वा निषेधद्वयं गमता॥ परं तु॥ तत्र साध्याभाववद्वृत्तित्वत्वावच्छि
न्नाभाव इत्युक्तावसंभवः स्यात् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः॥ तादृशवृत्तित्वत्वमपेक्ष्य
घोर्वृत्तित्वत्वमात्रस्यैव उक्ताभावप्रतियोगितावच्छेदकत्वात् इति॥ तन्न तुच्छं॥ गुरोः प्रतियोगितावच्छेदकत्वमंगीकृत्यैव लक्षणक
रणात्॥ अन्यथा महाकालभेदसाध्ये जन्यत्वविशिष्टघटादेः कालिकसंबंधेन हेतुतायामव्याप्तिप्रसंगात्॥ महाकालभेदाभावव
द्वृत्तित्वत्वमपेक्ष्य लघुना वृत्तित्वत्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्रतियोगितायाअवच्छेदात्। महाकालभेदाभाव रामः ३२
सजातीयस्य तद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेरिति ध्येयं॥ तादृशवृत्तित्वत्वा
पकेत्यस्य प्रयोजनमाह॥ साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्येति॥ अभावमादाय नातिप्रसंग इत्यन्वयः॥ ननु व्यभिचारनिरू
पकाधिकरणव्यक्त्यन्यत्वेऽस्याभावस्यापि साध्याभाववत्यातद्वृत्तित्वसामान्याभावस्य व्यभिचारिण्यसत्त्वात् कुतोऽतिव्याप्तिरत
आह॥ पार्थिवत्वादीति॥ पार्थिवत्वविशिष्टयन्निर्धूमवृत्तित्वं तद्धेतौ नास्ति वह्नेरपार्थिवत्वादित्यतिप्रसंग इति भावः॥ आदिना ज

लत्वादिसंग्रहः॥ व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य फलमाह॥ द्वित्वाद्यवच्छिन्नस्य वेति॥ निर्धूमवृत्तित्व वह्निभेदोभयत्वाद्य
वच्छिन्नस्य वेत्यर्थः॥ न दोष इति॥ अन्यथा निर्वह्निसंयुक्तत्वाभाववस्य साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकत्वाभा
वान्निर्वह्निवृत्तित्वसामान्याभावस्य च धूमेऽसत्त्वादव्याप्तिरेवस्यादिति भावः॥ इत्थं चेति॥ साध्याभाववद्वृत्तित्वस्य हेतुता
वच्छेदकसंबंधेनोक्तौ चेत्यर्थः॥ तादृशसंबंधेन हेत्वधिकरणत्वप्रवेशगौरवमतः कस्यचिदित्यादि इत्युक्तं॥ तथा च हेतुता
वच्छेदकसंबंधावच्छिन्नाधिकरणतावद्वृत्तित्वसाध्याभाववविशेषणमित्यर्थः॥ सत्त्वादावित्यादिपादेन वह्निमान् धूमादित्यादेः
परिग्रहः॥ तत्रापि जातिसामान्याभावादेः साध्याभाववत्तया तद्वृत्तिसंयोगसंबंधेन वृत्त्यप्रसिद्धेरव्याप्तिसंभवात्॥ ननु द्र
व्यं विशिष्टसत्त्वादित्यत्राव्याप्तिः॥ विशिष्टसत्त्वस्य सत्तानतिरेकेण द्रव्यत्वाभाववृत्तिवृत्त्या द्रव्यत्वाभावसजातीयस्य तद्वृत्ति
त्वाभावस्य हेतावसत्त्वात्॥ न चैवं विशिष्टहेत्वधिकरणे वर्तमानएव साध्याभावो गृह्यतां तावतैवोक्तदोषशुद्धासादिति वाच्यं
॥ तथापि धूमवान् वह्नेरित्यत्रातिव्याप्तिः॥ निर्धूमवृत्तित्वसामान्याभावस्य महानसीयवह्नौ सत्त्वात्॥ न च हेतुतावच्छेदक
धर्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितं॥ तथा सति निर्धूमत्वादिसजातीयनिर्धूमवृत्तित्वत्वेन रूपेण वस्त्वन्तरभा
वं तादृप्येण जलवृत्तित्वजलान्यनिर्धूमवृत्तित्वोभयाभावं चादायातिव्याप्तितादवस्थ्यादत आह॥ यद्वेति॥ वह्नित्वाद्यवच्छिन्न
धूमाभावसजातीयस्य तद्व्यापकीभूतस्य तस्यैवाभावस्य प्रतियोगितावच्छेदकत्वेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नप्रतिया
पकतावच्छेदाद्व्यभिचारिण्यपि व्याप्तिरतो यावंत इति॥ तथा च धूमादिसामान्याभावस्यापि साध्याभाववत्तया यावदंतर्गतत्वात्

आग० ७४ व्यापकीभूताभावप्रतियोगितावच्छेदकेन धूमत्वादिना वह्न्यादिकं प्रतिव्यापकत्वाभावान्नातिव्याप्तिः॥ तत्र तद्वह्न्यभावसजातीय
स्य तद्व्यापकीभूताभावस्य प्रतियोगितावच्छेदकेन तत्तद्वह्नित्वादिना धूमादिकं प्रतिव्यापकत्वाभावादसंभवस्यादित्यत आह
तादृशाः साध्याभावा इति॥ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इति तदर्थः॥ तत्र वह्नि
त्वादिकं तु न साध्यव्यापकतावच्छेदकमनन्तवह्न्यभावमादाय नोक्तदोषः तादृशा यावत्साध्याभावसाजात्यं तादृशयावत्
साध्याभाववृत्ति प्रागुक्तान्यतररूपवत्त्वं तच्च व्यतिरेकिण्यप्रसिद्धमतः प्रत्येकमिति॥ यद्यपि तादृशयावत्साध्याभावानां प्रत्ये
कनिरूपितमपि साजात्यं न कुत्राप्यभावेऽस्तीति व्यतिरेकिण्यव्याप्तितादवस्थ्यं॥ तथापि तेषामित्यत्र तस्य तस्य तस्येत्येकशेष
करणात् यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीयस्य तत्तद्व्यापकीभूताभावस्याभावाद्दोषः॥ धूमादिसामान्याभावव्या
पकस्य वह्नित्वादिना घटाद्यभावप्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रतिव्यापकत्वाद्व्यभिचारिण्यतिव्या
प्तिरतः सजातीयस्येति॥ साजात्यं तु प्रागुक्तदिशा ग्राह्यं॥ तेन संयोगादिसंबंधावच्छिन्नद्रव्यत्वादिनिष्ठावच्छेदकताकवह्न्याद्य
भावप्रतियोगितावच्छेदकेन द्रव्यत्वादिना वह्न्यादिव्यापकत्वेऽपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः॥ तादृशाभावस्य धूमादि रामः ३४
सामान्याभावसाजात्यविरहादिति ध्येयं॥ धूमादिसामान्याभावसजातीयस्य तद्व्यापकीभूतस्य च वह्निसंयोगाद्यभावस्य
प्रतियोगितावच्छेदकेन वह्निसंयोगत्वादिना वह्न्यादिकं प्रतिव्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तेरिति॥ वस्तुतो वह्नित्वेन धूम
वद्वृत्तेरभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्निं प्रतिव्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तितानिरूपकप्रतियोगिता

पाश्वत्वाभावव्याप्यवृत्तिपदं॥ तेन यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छि
न्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगिताया एव लक्षणघटकत्वान्नोक्तदोषः॥ धूमाद्यभावसजातीयस्य वह्न्याद्यभावस्य
प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्न्यादिकं प्रतिव्यापकत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिरतो व्यापकीभूतस्येति॥ यद्य
पि तत्र व्यभिचारस्थानीयत्वाभावस्यापि निरुक्तसाध्याभाववत्तया तत्समानाधिकरणस्य तत्सजातीयाभावस्य प्रतियोगितावच्छे
दकधर्मेण तत्तद्योगोलकभेदत्वादिना वह्नित्वाद्यवच्छिन्नं प्रतिव्यापकताभावात्सामानाधिकरण्यमात्रोक्तावपि नातिव्याप्तिः॥
तथापि साध्याभावव्यापकत्वघटितनिरुक्तौ साध्याभावे सजातीयाभावे साध्याभावसामानाधिकरण्यस्याप्रविष्टतया न साध्या
भावव्यापकीभूतपर्यंतस्य व्यर्थतेति ध्येयं॥ यत्तु॥ साध्यतावच्छेदकसंबंधेन साध्यव्यापकताया यदवच्छेदकं तेन संबंधेन
तद्रूपावच्छिन्नाभावोऽत्र साध्याभावपदार्थः॥ तथा चायोगोलकभेदत्वस्य न संयोगात्मकसाध्यतावच्छेदकसंबंधेन धूमव्या
पकतावच्छेदकत्वमिति तदवच्छिन्नाभावो न साध्याभावः किंतु धूमाद्यभाव एव तत्समानाधिकरणस्य च वह्न्याद्यभावस्य प्रति
योगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रतिव्यापकत्वादतिव्याप्तिरतः समानाधिकरणस्येत्यपहाय व्यापकीभूत
स्येत्युक्तं॥ न चैवं वह्निमान् धूमादित्यत्रैवाव्याप्तिः संयोगेन वह्न्याद्यभावस्यापि साध्याभाववत्तया तस्य केवलान्वयितया तत्स
जातीयतद्व्यापकीभूतव्याप्यवृत्त्यभावाप्रसिद्धेरिति वाच्यं॥ यावंतो व्याप्यवृत्तयः साध्याभावास्तेषामेव प्रवेशे तथा वह्निसा
मान्याभावस्य निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वरूपव्याप्यवृत्तित्वविरहेण यावदनंतर्गतत्वात्॥ धूमाद्यभावस्तु वह्निमद

मिश्र०

त्र

जागदी० ७५ योगोल्लक एव तादृशव्याप्यवृत्तिरिति तत्त्वं ॥ तादात्म्येन प्रमेयमात्रसाध्यतायामव्याप्तेः ॥ तत्र प्रमेयत्वादेरेव तादात्म्येन सा
ध्यव्यापकतावच्छेदकतया तादात्म्येन तद्वच्छिन्नाभावाप्रसिद्धेः ॥ अन्ये तु यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिष्ठयद्य
द्रूपावच्छिन्नप्रतियोगिताकाभाववत्त्वं तत्तत्साध्याभावव्यापकतावच्छेदकं तत्तद्रूपेण यद्रूपावच्छिन्नं प्रति व्यापकत्वं अवच्छिद्य
ते तद्रूपवत्त्वमर्थः तत्र च साध्याभावव्यापकतावच्छेदकत्वमपहाय साध्याभावसमानाधिकरणवृत्तित्वोक्तौ गुणान्यत्ववि
शिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्टसत्ताभावादित्यत्रातिव्याप्तिः ॥ गुणान्यत्वविशिष्टसत्ताभावाभावरूपस्य द्रव्यान्यत्वाद्यभाव
रूपस्य वा निरुक्तसाध्याभावस्य सजातीयसमानाधिकरणेन सत्तास्वरूपेण भावे वर्त्तते यत् द्रव्यान्यत्वविशिष्टसत्ताभावत्व
रूपधर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मेण हेतुतावच्छेदकावच्छिन्नं प्रति व्यापक
तावच्छेदात् ॥ साध्याभावव्यापकतावच्छेदकत्वोक्तौ तु द्रव्यान्यत्वविशिष्टसत्ताभावाभाववत्त्वादिकं न गुणान्यत्वविशिष्टसत्ता
भावाभावात्मकस्य द्रव्यान्यत्वाद्यभावरूपस्य वा साध्याभावस्य व्यापकतावच्छेदकं द्रव्य एव व्यभिचारात् इतो नोक्तदोष इति
प्राहुः ॥ द्रव्यं विशिष्टसत्तादित्यादौ व्यापकीभूततादृशाभावप्रतियोगितावच्छेदके न धर्मेण गुणकर्मान्यत्वविशिष्टसत्ता रामः ३५
त्वादिना सत्तादिकं प्रति व्यापकतानवच्छेदात् व्याप्तेराह ॥ यद्रूपावच्छिन्नं प्रतीति ॥ नचेदं गमनं स्पंदत्वादित्यादौ तादृशस्पगति
त्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतगतित्वत्वादिनापि कालिकसंबंधेन स्पंदत्वव्यापकतादर्शनेऽव्याप्तिरिति वाच्यं ॥ ताद
शाभावस्य यत्संबंधावच्छिन्नप्रतियोगितायाः अवच्छेदकीभूतो यो धर्मस्तत्प्रतियोगितावच्छेदकसंबंधेन हेतुव्यापकत्वस्यो

क्तत्वादिति भावः ॥ परैः परिष्कृतं निरसितुमाह ॥ साधनस्येत्यादिना ॥ तादृशेति ॥ यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीय
तद्व्यापकीभूताभावेत्यर्थः ॥ तदवच्छेदकत्वमिति ॥ तत्तत्साध्याभावसजातीयतद्व्यापकीभूताभावप्रतियोगितावच्छेदक
त्वं चेत्यर्थः ॥ प्रथमे दूषणमाह ॥ द्रव्यमित्यादि ॥ तादृशाभावेति ॥ साध्याभावसजातीयतद्व्यापकीभूताभावेत्यर्थः ॥ द्वितीये
दूषणमाह ॥ ज्ञेयं प्रमेयादित्यादि ॥ प्रमेयत्वादेरिति ॥ न च सामान्यधर्मेण विशेषाभावस्यापि व्यवस्थापितत्वात् प्रमेयत्वे
न गगनाभावस्य प्रागुक्तक्रमेण साध्याभावसजातीयस्य प्रतियोगितावच्छेदकं प्रमेयत्वमादाय नाव्याप्तिरिति वाच्यं ॥ त
थापि विषयत्वापेक्षया गुरोः प्रमाविषयत्वस्य प्रतियोगितानवच्छेदकत्वेनोक्ताव्याप्तितादवस्थ्यादिति भावः ॥ नव्यास्तु ॥ या
यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीयो तत्समानाधिकरणव्याप्यवृत्त्यभावः तत्प्रतियोगित्वमेव व्याप्तिः ॥ व्याप्यवृ
त्तित्वं तु प्रकृतहेतुसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वं ॥ तेन धूमसामान्याभावसमा
नाधिकरणस्य तत्तत्सजातीयस्य च वह्निधूमोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगित्वेपि धूमसाध्यके वह्न्यादौ नातिव्याप्तिः
॥ तादृशोभयाभावस्य निरुक्तव्याप्यवृत्तित्वाभावात् ॥ एवं च यत्राभावे प्रकृतसाध्यसामानाधिकरण्यव्यधिकरणध
र्मावच्छिन्नाभावभिन्नत्वोभयाभावः स एव साध्याभावपदार्थः ॥ तेनाभाववान् प्रमेयत्वादित्यादौ साध्यप्रतियोगिकस्य
घटावृत्तित्वावच्छिन्नाभावस्याधिकरणे घटादौ वर्त्तमानस्य तत्तत्सजातीयहेत्वभावस्य निरुक्तव्याप्यवृत्तितापप्रसिद्धावपि

जागदी० नाव्याप्तिः॥ इत्थं च द्रव्यं सत्त्वादित्यादौ गुणान्यत्वाद्यभावस्यापि निरुक्तसाध्याभाववत्तान्नरधिकरणे गुणादौ वर्त्तमानस्य
७६ तत्सजातीयाभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिध्येव नातिव्याप्तिः॥ वाच्यं प्रमेयादित्यादौ तु व्यधिकरणधर्मावच्छिन्न
वाच्यत्वाद्यभावसमानाधिकरणस्याविरुद्धघटत्वपटत्वाभ्यां प्रमेयाभावस्य घटत्वादिना वाच्यत्वाद्यभावस्येव वा निरु
क्तव्याप्यवृत्तिताश्रयाच्छिन्नः प्रतियोगितामादाय लक्षणसंभव इति यथाश्रुतमेव सम्यगिति प्रतीम इति प्राहुः॥ व्यापकी
भूतस्य सजातीयस्येत्यादि परित्यागेन लघुलक्षणमाह॥ यदेति॥ तादृशा इति॥ प्रकृतसाध्यव्यापकतावच्छेदकरूपा
वच्छिन्नप्रतियोगिताकाभावा इत्यर्थः॥ अत्रापि यत्संबंधेन साध्यव्यापकता तत्संबंधावच्छिन्नाभावानां प्रतियोगिता
वच्छेदकधर्मैस्तत्तत्संबंधेन यद्रूपावच्छिन्नप्रतिव्यापकत्वमवच्छिद्यते इति पर्यवसितार्थः॥ तेन गगनं स्पंदत्वादित्यादौ ग
गनत्वत्वावच्छिन्नप्रतियोगितावच्छेदके गगनत्वत्वादिभिः कालिकसंबंधेन स्पंदत्वादिहेतुव्यापकतावच्छेदकत्वेपि
नातिव्याप्तिः॥ न वा वाच्यत्वादिभेदप्रतियोगितावच्छेदकमादायैव केवलान्वयिस्थले लक्षणसंभवे प्रतियोग्यवृत्ति रामः
श्चेत्यादिग्रंथावतारकत्वानुपपत्तिः॥ ननु धूमत्वेन धूमाभावस्य वह्नित्वेन धूमवद्वृत्तेरभाववत्त्वात् अयःपिंडान्यत्वाभा ३६
वस्यायःपिंडान्यत्वलक्षणस्वरूपसंबंधेन भेदत्वावच्छिन्नाभाववत्त्वात् तत्प्रतियोगितावच्छेदकीभूतवह्नित्वभेदत्वा
दिभिर्वह्नित्वाद्यवच्छिन्नप्रतिव्यापकतावच्छेदात् धूमवान् वह्नेरित्यादावतिव्याप्तिरिति वाच्यं॥ यत्प्रतियोगिताकाभावे

स्वावच्छेदकावच्छिन्नवद्वृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगितायाएवावच्छेदकधर्मस्य
लक्षणघटकत्वादिति संक्षेपः॥ परे त्विति॥ साध्याभाववद्वृत्तित्वस्य घटत्वादिनाभावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावं
त इत्युक्तं॥ तादृशवृत्तित्वाभाववत्त्वमपि दैशिकविशेषणतयैव ग्राह्यं॥ तेन निर्धूमवृत्तित्वादिसामान्याभावस्यापि कालि
कादिसंबंधेन वह्न्यादिवृत्तित्वाद्यावत्वोपादानेपि नातिव्याप्तितादवस्थ्यं॥ वह्निमान् धूमादित्यत्र ज्ञेयत्वादित्यादावव्याप्तिः
॥ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वादिसमनियतप्रतियोगिताकस्य संयुक्तत्वादिसामान्याभावस्य
हेतावसत्वादतो वृत्तिमद्वृत्तय इत्युक्तं॥ तदनुक्तावसंभवस्तु नाशक्तितादात्म्यसंबंधेन सद्धेताववनिरुक्तिगमनात्॥ व्यधि
करणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यप्रतियोगिकस्य व्यधिकरणधर्मावच्छिन्नाभावस्येव वस्तुगत्यातादृशवृत्तित्व
व्यापकप्रतियोगिताकतयातथाविधयावदभावस्येव हेतौ सत्वादिति ध्येयं॥ येन संबंधेन हेतुता वृत्तिमद्वृत्त्यपदस्य त्वा
पि वृत्तिमत्वं तेनैव बोध्यमिति पाठः॥ तदभावस्येति॥ तत्सामान्याभावस्येत्यर्थः॥ जात्यादाविति॥ समवेतत्वघटितजाति
लक्षणासंबंधांतरेण यो वृत्तिमान् तद्वृत्तित्वमुपदर्शितं॥ न त्विति॥ नाव्याप्तिः॥ हेतुताघटकसंबंधेन यो वृत्तिमांस्तद्वृत्तित्वे
न तादृशाभावस्य यावदंतर्गतत्वादिति भावः॥ अत्र वृत्तिमति वृत्तिता दैशिकविशेषणतया ग्राह्या॥ तेन वाच्यं द्रव्यत्वादि
त्यादौ व्यधिकरणधर्मावच्छिन्नवाच्यताभाववत्समवेतत्वत्समनियतप्रतियोगिताकस्य समवेतत्वसामान्याभावस्य हेतुता
घटकसमवायसंबंधेन वृत्तिमत्तिस्पंदादौ कालिकसंबंधेन वर्त्तमानस्य दैशिकविशेषणतया द्रव्यत्वादि हेतावसत्वेपि नाव्या

व्याप्तिः इत्यत्रापि त्यपिकारेण साध्याभाववद्वृत्तित्वेऽपि हेतुताघटकसंबंधेनैव वाच्येति व्यंजितं॥ तेन तत्तद्धूमावयवान्यता
भाववस्यापि पूर्वोक्तद्वितीयरीत्या साध्याभाववत्तेन तद्वृत्तिसंबंधसामान्येन यावद्वृत्तित्वं स्तद्भाववस्य तत्तद्धूमावयवासमानकाली
नद्रव्यत्वे धूमहेतावसत्वेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः॥ ननु साध्यप्रतियोगिकाभावमात्रस्य प्रवेशे ऽधूमस्य तत्त
द्धूमाभाववद्वृत्तित्वेन वह्निमान्धूमादित्यादावव्याप्तिः॥ साध्यतावच्छेदकधर्मावच्छिन्नाभावस्य प्रवेशे तु गगनादेः साध्यत्वे
द्रव्यत्वादावतिव्याप्तिः॥ तादृशसाध्याभावस्य केवलान्वयित्वात्॥ एवं प्राणग्राह्यगुणवान्प्रमेयवान् पृथिवीत्वादित्या
दावव्याप्तिः॥ तादृशधर्मावच्छिन्नप्रतियोगिताप्रसिद्धेरत आह॥ साध्याभावश्चेति॥ पूर्ववदिति॥ प्रकृते साध्यव्यापक
तावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्त्यभावोऽत्र साध्याभावशब्दार्थ इत्यर्थः॥ यथाश्रुते साध्याभाववत्प्रवेशा
नासंगत्यापत्तेः॥ अत्रापि येन संबंधेन व्यापकता तत्संबंधेन तादृशरूपावच्छिन्नाभावो बोध्यः॥ तेन ज्ञानवानात्मत्वादि
त्यादौ स्वरूपसंबंधेन साध्यव्यापकस्य प्रमेयत्वादेः कालिकसंबंधावच्छिन्नाभावाधिकरणसमवेतत्वाभावस्यस्यदंत्वा
दिनिष्ठस्य हेतावसत्वेऽपि न क्षतिः॥ यत्तु साध्यतावच्छेदकसंबंधेन तादृशरूपावच्छिन्नाभावानां विवक्षणात् ज्ञानवानात्मा
त्वादित्यादावपि नाव्याप्तिः॥ कालिकसंबंधेन प्रमेयत्वाभावस्य साध्यताघटकसमवायसंबंधानवच्छिन्नत्वात्॥ इत्थं च व्याप
कतापि तेनैव संबंधेनास्या॥ तेन विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यताघटकसमवायसंबंधेनाभाववद्वृत्तिहेतोर्व
क्तमानत्वेऽपि द्रव्यं पृथिवीत्वादित्यादौ नाव्याप्तिरिति तन्तुच्छं॥ वृत्त्यनियामकसंबंधेन साध्यतायां तदवच्छिन्नप्रतियोगिता

प्रसिद्ध्या सद्धेतावव्याप्तेः॥ धूमवान्वह्नेरित्यादावति॰॰व्याप्तेश्च॥ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव संयोगसंबं
धावच्छिन्नाभावस्य व्याप्यवृत्तितया तद्वृत्तित्वाभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वह्नित्वमवृत्तित्वा
त्॥ प्रमेयं वाच्यत्वादित्यादौ तादात्म्येन साध्यतायामव्याप्तेश्च॥ साध्यताघटकतादात्म्यसंबंधेन प्रमेयत्वादेरेव साध्यव्या
पकतावच्छेदकतया तत्संबंधेन तदवच्छिन्नाभावाप्रसिद्धेरिति दिक्॥ वह्निमान्धूमादित्यादावव्याप्तिः॥ वह्निसंयोगाभा
वस्यापि साध्यव्यापकतया तदभावात्मकवह्निसंयोगवद्वृत्तित्वसामान्याभावस्य घटादिनिष्ठस्य हेतावभावादतो व्याप्यवृ
त्तित्वेनाभावो विशेषितः॥ वस्तुतस्तु निरुक्तसाध्याभावाधिकरणत्वमवच्छिन्नं विशेषणताविशेषणप्रवेशं॥ अन्यथा द्रव्यं
गुणादित्यादौ द्रव्यत्वाभावस्य कालिकसंबंधेनाधिकरणे गुणस्य वृत्तेर्द्रव्यत्वाभाववत्समवेतत्वसामान्याभावस्य ज्ञाननि
ष्ठस्य हेतावसत्वादव्याप्त्यापत्तेः॥ तथा च वह्निसंयोगाद्यात्मकाभावस्य तादृशसंबंधेनाधिकरणाप्रसिद्ध्या तमादाय नाव्याप्ते
र्वारणार्थं न व्याप्यवृत्तिपदं॥ परं तु रूपवान्पृथिवीत्वादित्यादौ नित्यत्वादिना रूपाभावस्यापि तादृशधर्मावच्छिन्नाभावव
त्तया तत्समवेतत्वाद्यभावस्य नित्यरूपादिनिष्ठस्य हेतावसत्वादव्याप्तिरतो व्याप्यवृत्तिपदं॥ न च तस्यापि व्याप्यवृत्ति
त्वादुक्तदोषतादवस्थ्यं॥ यत्प्रतियोगिताकाभावे स्वावच्छेदकसंबंधेन स्वावच्छेदकधर्मावच्छिन्नवद्वृत्तित्वस्य व्यधिकर
णधर्मावच्छिन्नाभावभिन्नत्वस्य वा व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावस्यो
क्तत्वात् नित्यत्वादिना रूपाद्यभावस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नस्य स्वावच्छेदकीभूतनित्यत्वावच्छिन्नवद्वृत्तितादव

जाग० व्युदासः॥ एतेन संयोगाभाववत्त्वादेः साध्यवद्भिन्नाभावप्रतियोगितावच्छेदकतया प्रतियोगिव्यधिकरणाघटितसाध्यव्यापक
७८ तानवच्छेदकत्वेपि न व्याप्यवृत्तिपदवैयर्थ्यमिति ध्येयं॥ ननु वह्निमान् धूमादित्यादावालोकाद्यवृत्तित्वादिनालोकावृत्तिसामा
न्याभावोपि साध्याभाववदवृत्तित्वाभावो यावदंतर्गतः संयोगादिसंबंधावच्छिन्नवह्निसामान्याभाववदवृत्तित्वस्याप्यालोकावृ
त्तिमध्यनिवेशात् एवं निर्धूमवृत्तित्वावच्छिन्नवृत्त्यभावाधिकरणीभूतमहानसवृत्तित्वादेर्महानसवृत्तित्वत्वादिनायोऽभावः सो
पि साध्याभाववदवृत्तित्वाभावो यावदंतर्गतस्तयोर्धूमादावसत्त्वादसंभव इत्यत आह॥ तदवृत्तित्वाभावोपीति॥ मिश्रास्तु
एतादृशापि तत्तत्साध्याभाववदवृत्तित्वत्वव्यापकयोरन्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वप्रवेशे आलोकावृत्ति
त्वावच्छिन्नाभावस्य हेतावसत्त्वाद्वह्निमान् धूमादित्यत्राव्याप्तिरतोऽन्यथा व्याचष्टे॥ स्वव्यापकेति॥ स्वं प्रतियोगिता त
द्व्यापकीभूतं यत्तत्साध्याभाववदवृत्तित्वत्वं तद्व्यापकप्रतियोगिताक इत्यर्थः॥ व्यधिकरणधर्मावच्छिन्नसाधारणसा
ध्याभाववदवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमदवृत्तित्वाद्व्यभिचारिण्यतिव्या राम:
प्तिरत उक्तं तत्रेति॥ तथा च निर्धूमवृत्तित्वाभावस्यैव स्वव्यापकतत्तत्साध्याभाववदवृत्तित्वत्वव्यापकप्रतियोगिता ३८
कतया तस्य धूमादावसत्त्वान्नातिव्याप्तिरिति भावः॥ स्वनिष्ठवृत्तित्वत्वरूपेण वृत्तित्वसामान्याभावस्य व्यधिकरण
धर्मावच्छिन्नसाध्याभाववदवृत्तित्वत्वसमनियतप्रतियोगिताकस्य हेत्वंतरवृत्तेः स्वस्मिन्नसत्त्वाद्धेतुमात्रे संभवाप
त्तेः कल्पांतरमाह॥ तत्रेति॥ समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्य यावदभावस्यैव व्यभिचारिण्यप्रति

प्रसंजकत्वादतिरिक्तं तं॥ तत्रापि निर्धूमवृत्तित्वत्वस्यापि सामान्यतः साध्याभाववदवृत्तित्वत्वातिरिक्तसमानाधिकरण
धर्मतया तदवच्छिन्नसामान्याभावमादाय तत्र व्याप्तेर्वारणायोगात्तत्रेति त्युक्तं॥ नन्वेवमपि व्यधिकरणधर्मावच्छिन्न
वृत्त्वाभाववदवृत्तित्वत्वेन घटवृत्तित्वजातित्वान्यतराभावमादाय द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः॥ हेतुतावच्छेदकसंबं
धावच्छिन्नवृत्तित्वभिन्नावृत्तित्वेनापि प्रतियोगिताया विशेषणीयत्वात्॥ अत एव तत्तत्साध्याभाववदवृत्तित्वत्वावच्छिन्नाभाव
इत्युक्तं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः॥ साध्याभाववद[illegible]वृत्तित्वत्वावच्छिन्नं यद्धेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्व
भिन्नावृत्तिप्रतियोगित्वं तादृशप्रतियोगिताकस्य वृत्तिमदवृत्तित्वाभावस्याप्रसिद्धेरतो निषेधद्वयगर्भता॥ तेन घटत्वा
दिना तादृशवृत्तित्वाभावमादायैव तत्र लक्षणसंगतिः॥ केचित्तु॥ यद्यपि तत्तत्साध्याभाववदवृत्तित्वत्वावच्छिन्नाया वंतोभा
वा इत्येव लाघवादुक्तमुचितं॥ तथापि वाच्यं प्रमेयादित्यादौ तादात्म्येन हेतौ जगत एव साध्याभाववत्तादात्म्यतया तादृश
तादात्म्यत्वावच्छिन्नाभावाप्रसिद्ध्याव्याप्तिरतो निषेधद्वयगर्भता इत्थं च विरुद्धघटत्वपटत्वाभ्यामेव तादृशवृत्तित्वाभावः
सुलभ इति वदंति॥ यत्तु वृत्तित्वत्वमपेक्ष्य गुरोर्वाच्यत्वाभाववदवृत्तित्वत्वस्य प्रतियोगितानवच्छेदकतया केवलान्वयिन्य
व्याप्तिः स्यात् तत्तत्साध्याभाववदवृत्तित्वावच्छिन्नाभावानोक्ता इति॥ तन्नुच्छं॥ गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमादायैव लक्ष
णकरणात्॥ अन्यथा एतत्कल्पे वृत्तिमदवृत्तिपदवैयर्थ्यापत्तेः॥ वृत्तित्वत्वमात्रस्यैव तत्तत्साध्याभाववदवृत्तित्वत्वातिरिक्तसमाना
धिकरणधर्मतयैव तदवच्छिन्नाभावमादायाव्याप्त्यसंभवात्॥ किंचैवं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तद्घटभिन्नत्वं व्य

गाग० ७९ तादित्यादावतिव्याप्तिरपि स्यात् तत्तद्घटवृत्तित्वापेक्षया गुरुत्वेन तत्तद्घटभेदाभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः॥ तत्तद्घट कृ रा०
वृत्तित्वत्वस्य च साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मतया तदवच्छिन्नाभावस्य लक्षणाघटकत्वात्॥ एवं स्नेहशू
न्यं द्रव्यत्वादित्यादौ स्नेहशून्यत्वाभाववद्वृत्तित्वादेः जलवृत्तित्वाद्यपेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्यापत्तिर्व्याप्ति
र्दुष्टव्येति दिक्॥ यस्य कस्यचित्सामानाधिकरण्यमव्यावर्तकमतः तत्तत्प्रतियोगितासमानाधिकरणत्वनिवेशापेक्षया
लाघवमनुसृत्याह॥ वृत्तित्ववृत्तिनावेति॥ साध्याभाववद्वृत्तित्ववृत्तिना वेति पाठे साध्याभाववद्वृत्तित्वं संपातायातं॥ यद्यपि वृत्ति
त्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वादिसामान्याभावस्य घटाद्यन्यत्वाभावस्य च हेतावसत्त्वात् वह्निमान्धूमा
ता दित्यादौ सर्वत्रासंभवः॥ तादृशधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिकाभावविवक्षणेऽपि घटभेदत्वेन घटभेदस्य वह्निवृत्ति
त्वान्यतराभावस्य तादृशस्य हेतावसत्त्वात्॥ तथापि पूर्ववदत्रापि कल्पे वृत्तित्वभिन्ना वृत्तितेनापि प्रतियोगित्वं विशेषणीय
मित्यदोषः॥ स्वन्यूनवृत्तिधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताया एव तादृशवृत्तित्वत्वातिरिक्तवृत्ति[illegible]त्ववृत्तिधर्मानव
च्छिन्नत्वं विवक्षणीयं इत्यपि कश्चित्॥ वृत्तित्ववृत्तिना धर्मेणैवेति पाठे तु धूमत्वाद्यभावमादायासंभवभयादेव धर्मेणेति रामः ३९
कल्पांतरोल्लेखः॥ तथा च धूमत्वं घटभेदत्वादेस्तादृशवृत्तित्वत्वातिरिक्तधर्मत्वादेव तदवच्छिन्नाभावमादाय नासंभ
वः॥ वाच्यं प्रमेयादित्यादौ तु तादात्म्येन हेतौ विरुद्धघटत्वपटत्वाभ्यामवृत्तिगगनादिना वा वृत्तित्वाभावमादाय लक्षणसमन्व
य इति ध्येयं॥ स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वेत्यस्य व्यावृत्तिमाह॥ आलोकाद्यवृत्तित्वेनेति॥ निर्वह्निवृत्तित्वस्येति॥

प्रतियोगितायां तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वमदृष्टार्थं न स्वव्यापकवृत्तित्वत्वकेत्युक्तावपि आलोकावृत्तित्वाव
च्छिन्नाभावस्य वारणसंभवात् प्रतियोगिताव्यापकश्चित्तत्साध्याभाववत्त्वं विशेष्यमिति वाच्यं॥ आलोकावृत्तिवृत्तित्वाभा
वमादाय व्याप्तिवारणार्थं तस्याव्यापकत्वात्॥ स्वसमानाधिकरणात्यंताभावाप्रतियोगितत्तत्साध्याभाववद्वृत्तित्वाश्रयनि
ष्ठात्यंताभावाप्रतियोगिप्रतियोगिताकत्वरूपपर्यवसितार्थे तत्तत्साध्याभाववतः सकृदेव निविष्टतया वैयर्थ्यशंकानवकाश
इति भावः॥ तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगितेत्यस्य फलमाह॥ पर्वतेत्यादिना॥ घटत्वादेः साध्यव्यापकत्वाव
दकत्वाभावात्तदवच्छिन्नवह्न्याद्यभावस्य लक्षणाघटकत्वादाह॥ इंधनत्वेति॥ इंधनत्वावच्छिन्नसामान्याभावस्य महानसादा
वसत्त्वात्तमादाय पक्षवृत्तित्वविशिष्टवह्न्यादाह॥ वह्न्यभावेति॥ तादृशवृत्तित्वत्वव्यापकप्रतियोगितेत्यस्यानुक्तावसंभव एवेत्य
त्र ननु वह्निमान्धूमादित्यादावव्याप्तिमात्रं प्रमेयमात्रस्य हेतुतास्थलेऽपि तत्तत्प्रमेयनिष्ठवृत्तित्वाभावस्य प्रमेयांतरवृत्तेस्तत्त
त्प्रमेयेऽविरहादित्याविदयितुं सर्वत्रसाधनसाधारण्येनाह॥ स्वनिष्ठेति॥ स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तत्सामान्याभावस्ये
त्यर्थः॥ अत्र घटत्वादौ साध्ये स्वीयविशेषणतया घटान्यत्वादि हेतावतिव्याप्तिः॥ साधनस्येव हेतुतावच्छेदकसंबंधेन
तिमत्त्वात्तन्निष्ठस्येव यावदभावस्य हेतौ सत्त्वात्॥ न चैतस्य विरुद्धतात्साध्यसामानाधिकरण्येन हेतुविशेषणेन देव नाति
व्याप्तिरिति वाच्यं॥ तथापि द्रव्यत्वादौ साध्ये स्वीयसमवायादिना सत्त्वादि हेतावतिव्याप्तिः॥ तादृशसंबंधेन हेतोरेववृत्तिमत्त्व
यात्तन्निष्ठयावदभावस्य साध्यसामानाधिकरण्यस्य च हेतौ सत्त्वात्॥ एवं महाकालान्योन्याघटादित्यादौ कालिकसंबंधेन हेता

जा॰ गृ॰ ८० वतिव्याप्तिः॥ हेतुताघटककालिकसंबंधेन महाकालवृत्तेस्तेन संबंधेन तद्वृत्तित्वासंभवात्॥ सामानाधिकरण्यस्य व्याप्य
वृत्तित्वात्॥ अन्यथा घटादिहेतावपि खंडकालावच्छेदेन महाकालवृत्तित्वाभाववत्तादृशकालव्याप्तितादवस्थ्यात्॥ एवं द्रव्यत्वादेः सा
ध्यतायाम वृत्तिगगनादिहेतावतिव्याप्तिः॥ विशिष्टसत्तायामव्याप्तिः॥ द्रव्यान्यस्मिन्गुणादौ विशिष्टसत्ताया वृत्तिमत्त्वादिति वदंति
॥ यदि च वृत्तिमद्वृत्तयो यावंतः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वावच्छिन्नाधिकरणतासामान्यकधूमवत्त्वं व्याप्तिरिति विवक्ष्य
ते तदा नैतेषामेकोपि दोषः पदमादधाति॥ वृत्तिमद्वृत्तय इत्यादौ सर्वत्र दैशिकविशेषणतासंबंधेन वृत्तेर्निवेशनीयता
त् अन्यथाधिकरणत्वमात्रस्यैव संयोगादिसंबंधेनावर्तमानत्वाधूमवान्वह्नेरित्यादावतिव्याप्तिसंगादिति ध्येयं॥ अन्ये त्वि
त्यादि॥ अत्र साध्याभावकूटाधिकरणवृत्तित्वस्य घटत्वादिनाभावमादाय व्यभिचारिण्यपि व्याप्तिरत उक्तं यावंत इति॥ न
या च तादृशवृत्तित्वसामान्याभावस्य तत्र हेतावसत्वान्नातिप्रसंगः॥ न च तादृशवृत्तित्वत्वावच्छिन्नाभाववतो कावपि ता
दृशाभाववधुद्दाम संभवतीति वाच्यं॥ तथापि तादृशवृत्तित्वत्वेन घटादेरभावमादायातिव्याप्तितादवस्थ्यात्॥ तादृशवृत्ति
त्वत्वस्य गुरुतया तदवच्छिन्नाभावाप्रसिद्धेश्च॥ अत एव तादृशवृत्तित्वसामान्याभाववत्त्वमपि न विवक्षितं॥ केवलान्वयिन्यव्या राम॰
प्तेः वाच्यताभावकूटाधिकरणवृत्तित्वसामान्याभावस्य ज्ञेयत्वादिहेतावभावादिति भावः॥ इत्थमपि वाच्यताभावकूटाधिक ८०
रणवृत्तित्वसामान्याभावस्यैव यावदंतर्गतस्य ज्ञेयत्वादिहेतावसत्वादिदं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिरतो वृत्तिमद्वृत्तय इत्यु
क्तं॥ तथा चैतस्य वृत्तिमद्वृत्तित्वाभावान्न निरुक्तयावदंतर्गतत्वं किं तु घटत्वादिना तादृशवृत्तित्वाभावस्यैव स च ज्ञेयत्वादिहेतो

न

वर्त्तत एवेति नाव्याप्तिः॥ अत्र वृत्तिमत्वादिकं पूर्वलक्षणादिशावसेयं॥ तेन नमसुक्तदोषः॥ ननु प्रलयभिन्नो गोत्वादित्यादौ कालि
कसंबंधेन हेतावतिव्याप्तिः॥ महाकालस्यापि कालिकसंबंधेन प्रलयान्यत्वाभावकूटवत्वेन तत्र या हेतुताघटकसंबंधेन वृ
त्तिः तस्या व्यधिकरणधर्मावच्छिन्नाभावस्येव वृत्तिमद्वृत्तित्वात्॥ न च दैशिकविशेषणतया साध्याभावकूटवत्वं विवक्षितमत
स्तादृशकूटाधिकरणप्रलयवृत्तित्वसामान्याभावस्याधुनिकघटादिवृत्तेर्गोत्वादिहेतावसत्वान्नातिव्याप्तिरिति वाच्यं॥ घटत्वा
भाववान्पटत्वादित्यादावभावसाध्यके व्याप्तिप्रसंगात्॥ साध्याभावकूटांतर्गतस्य घटत्वरूपसाध्याभावस्य विशेषणतया
ऽधिकरणाप्रसिद्धेः॥ विशेषणतया वृत्तिमतामेव साध्याभावानां प्रवेशे तु घटत्वाभाववान्द्रव्यत्वादित्यादावतिव्याप्तिः॥ व्यधि
करणधर्मावच्छिन्नसाध्याभावस्यैव तत्र दैशिकविशेषणतया वृत्तिमत्तया तत्कूटाधिकरणवृत्तित्वाभावस्यापि तादृशधूमाव
च्छिन्नस्यैव वृत्तिमद्वृत्तित्वात्॥ एवं कालिकसंबंधावच्छिन्नप्रतियोगिताकगगनत्वाभावस्याभावे साध्ये ज्ञानादिहेतावव्याप्तिः॥
गगनत्वाभावघटितकूटस्य दैशिकविशेषणतासंबंधेन यदधिकरणं तद्वृत्तित्वसामान्याभावस्य वृत्तिमति ज्ञानादौ प्रसिद्धस्य
ज्ञानादिहेतावभावादिति चेन्न॥ साध्यतावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्वबुद्धेः संसर्गविधया प्रति
बंधकतावच्छेदको यः संबंधस्तेन वृत्तिमतः साध्याभावकूटस्य तादृशसंबंधेनैवाधिकरणत्वस्योक्तत्वात्॥ संयोगाभाववान्
प्रमेयत्वादित्यादौ च संयोगादिरूपः साध्याभावो न तादृशसंबंधेन वृत्तिमान्विवक्षितत्वसमवायसंबंधेनैव संयोगादिनिरू
पस्य तदभाववत्त्वाविरोधित्वादतो न तत्राव्याप्तिः॥ केवलान्वयिनि च तादृशप्रतियोगितावच्छेदकविशिष्टसाध्यवत्वबुद्धेर्न

जाग० ८१ रूपैव सुलभा॥ सत्त्वं हि घटत्वेन वाच्यत्वं नास्तीति बुद्धेर्जात्यपि घटत्वेन वाच्यत्वमस्तीति ज्ञानानुदयात्॥ घटत्वाद्यभाववत्त्वावु
च्छिन्नप्रतित्वसमवायादिना घटत्वादिमत्त्वानिरूपस्य प्रतिबंधकत्वादेवोक्ताव्याप्त्यादेर्दुरासत्त्वात्॥ तादृशवृत्तित्वे व्यापकप्रतियो
गिताकत्वे प्रवेशित एव समुदायपदं सार्थकं भवत्यतः प्रागेव वृत्तित्वाभावव्याचष्टे॥ तादृशेति॥ स्वेति॥ स्वं प्रतियोगिताव्या
पकं यत्साध्याभावकूटवृत्तित्वं तद्व्यापकप्रतियोगिताक इत्यर्थः॥ प्रयोजनं चेति॥ वह्निमान् धूमादित्यादौ उक्ता वृत्ति
सामान्याभावस्य साध्याभावकूटाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्य यावदंतर्गतस्य हेतावसत्त्वादव्याप्तिरतः
नत्रिवह्नि वृत्तित्वंतधू मत्रिः स्वव्यापकेति॥ तथा चोक्तावृत्तित्वावच्छिन्नाभावप्रतियोगित्वस्य व्यापकं निवेशयेत्वान्न वह्निवृत्तित्वादेर्व्यभिचारित्वादिति
पमभावो न लक्षणघटक इति नाव्याप्तिः॥ प्रतियोगितायां तादृशवृत्तित्वव्यापकत्वानुक्तौ वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः॥ प्र
तियोगिताव्यापकसाध्याभावकूटवृत्तित्वकस्य घटवृत्तित्वसामान्याभावस्य यावदंतर्गतस्य हेतावसत्त्वात्तदुपादाने च त
दृशाभावप्रतियोगित्वं न वाच्यत्वाभावकूटवृत्तित्वव्यापकं पटवृत्तित्वे व्यभिचारादिति तस्य लक्षणाघटकत्वान्नाव्याप्तिरिति रामः। ४१
भावः॥ अत्र च प्रतियोगिता स्वन्यूनवृत्तिधर्मानवच्छिन्ना ग्राह्या॥ तेनेदं वाच्यं ज्ञेयत्वादित्यादौ घटवृत्तित्वेन वृत्तित्वसामान्याभाव
स्य घटान्यत्वादिवृत्ते हेतावसत्त्वेपि नाव्याप्तिः॥ सार्वभौममते वैकविशिष्टापरत्वमेवोभयत्वं तेन न घटवृत्तित्वघटान्यवृत्तित्वोभ
याभावमादायापि नाव्याप्तिः॥ तत्प्रतियोगितायास्तादृशवृत्तित्वाताव्यापकत्वादिति ध्येयं॥ स्वव्यापकत्वदलस्य पूर्वलक्षणोक्तेव
व्यावृत्तिः॥ तादृशवृत्तित्वव्यापकत्वस्य न प्रागिव वह्निमान् धूमादित्यादौ व्यावृत्तिः॥ तत्र महानसादेः साध्याभावकूटानधिकर

णत्वात्॥ किंतु केवलान्वयिस्थल एवेत्याशयेनाह॥ उक्तप्रायमिति॥ न च स्वव्यापकेत्याद्युपेक्षया लाघवात् साध्याभावकूटा
धिकरणवृत्तित्वत्वावच्छिन्नाभाव एव यावत्त्वेन निवेश्यतां तादृशवृत्तित्वेन घटाद्यभावमादायैव केवलान्वयिनि लक्षणसंभ
वादिति वाच्यं॥ वह्निमान् धूमादित्यादौ वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रासंभवापत्तेः॥ निर्वह्निवृत्तित्वस्य वृत्तित्वाद्यपेक्षया गुरुत्वेन व
ह्न्यभावकूटाधिकरणवृत्तित्ववाच्यत्वाभावकूटवृत्तित्वादेः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेरिति भावः॥
॥ ननु वृत्तिमत्त्वयोर्यावत्त्वः साध्याभाववृत्तित्वव्यापकप्रतियोगिताकाभावास्तु तत्त्वमेवोच्यतां कृतं कूटनिवेशेनेत्यत आ
ह॥ साध्याभावेति॥ साध्यप्रतियोगिताकाभावेत्यर्थः॥ व्यधिकरणेति॥ साध्यप्रतियोगिताकाभाववद्वृत्तित्वसामान्याभावस्य
वृत्तिमात्रनिष्ठत्वादिति भावः॥ अत इति॥ तथा च धूमाभावकूटाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्य निर्धूमवृत्तित्व
सामान्याभावस्यैव वह्न्यादिहेतावसत्त्वात्तन्न व्यभिचारिण्यतिव्याप्तिः॥ न चैवं गगनाभाववान् वाच्यत्वादित्यत्राव्याप्तिः॥ गगनस्या
पि साध्याभाववतया तदधिकरणाप्रसिद्धेरिति वाच्यं॥ वृत्तिमत्त्वेनापि साध्याभावस्य विशेषणीयत्वात्॥ न च मते गगनस्य त्वाभा
व विरहत्वे मानाभावाद्वेति भावः॥ अत्र साध्याभावसमुदायाधिकरणवृत्तित्वव्यापकप्रतियोगितेत्येव समुदायपदस्य फलं प्रपं
हते वोक्तं॥ प्रतियोगिताव्यापकं साध्याभावसमुदायाधिकरणवृत्तित्वत्वमित्यत्र समुदायपदस्य फलं तु नालोकावृत्त्यभावमादाय
वह्निमान् धूमादित्यादावव्याप्तिवारणं तादृशाभावस्य स्वव्यापकवृत्तितात्वकप्रतियोगिताकेत्युक्तावपि वारणसंभवात्॥ धूमत्वादव
पि तदभावे प्रतियोगितासत्त्वात् परं तादृशोक्तावृत्तिवृत्तित्वस्याभावमादायाव्याप्तिवारणमेव तत्फलमिति भावः॥ तत्तु च्छे॥ स्वाश्रयानि

व्याग० ८२

श्चात्यन्ताभावाप्रतियोगिनः साध्याभावकूटाधिकरणवृत्तित्वस्याश्रये वर्त्तमानस्यात्यन्ताभावस्याप्रतियोगिप्रतियोगिताका
भाववत्त्वेनैव तादृशवृत्तित्वाभावानां निवेशात् तत्र च स्वरूपे देवसमुदायपदस्यातभावेनोभयथा तन्निवेशफलानुसंधानस्यवा
यसहस्रेणानुसंधानसमानत्वात्॥ अन्यथा साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्ना
भावस्यापि प्रतियोगिताव्यापकसाध्याभावकूटवद्वृत्तित्वकत्वाभावादेवमुदासान्तमाहासव्यभिचारिण्यतिप्रसंगवारणा
र्थं ग्रन्थकृतां समुदायपदोपन्यासानौचित्यापत्तेरिति ध्येयं॥ धूम इति॥ नातिव्याप्तिरित्यग्रेऽन्वयः॥ एवमग्रेऽपि॥ ननु संबं
धविशेषाविवक्षायां प्रलयोत्पन्नकर्मनित्यरूपादिकमेव वह्न्यभावकूटाधिकरणं वाच्यं विभुमूर्त्तजन्यभावयथायोगं काचि
त्कसंयोगादिकं तद्विशेषणतामि वह्निमत्वेन द्रव्यस्य वह्न्यभावकूटवत्वविरहात् वह्न्यसमानकालीनस्य धूमासंयोगिद्र
व्यस्यासत्वात्॥ तथा च तत्र साध्याभावकूटवति हेतुतावच्छेदकसंयोगसंबंधेन वृत्त्यप्रसिद्धेव धूमेनातिव्याप्तिः॥ सम
वायेन धूमस्य हेतुत्वे तु विरुद्धत्वादेव तद्व्युदासासंभवादत आह॥ संयोगेन चेति॥ तथा च वह्नेः साध्यत्वे तथा चात्र वह्न्य रामः ८२
भावकूटाधिकरणं यन्नित्यरूपादिकं तत्र हेतुतावच्छेदकसमवायसंबंधेन तद्वृत्तित्वस्य रूपेतादो प्रसिद्ध्या भावो व
र्त्तत एव वह्न्यवयववत इत्यतिव्याप्तिस्यात् यदि साध्यतावच्छेदकसंबंधेन साध्याभावस्य प्रवेशो न स्यादिति भावः॥ ननु
समवायेन वह्न्यभावस्य वह्न्यवयवतासमानाधिकरणत्वात् अग्रे वक्ष्यमाणेन साध्याभावानां हेतुसमानाधिकरणत्वावि
शेषणेनैव न तादृशाभावमंतर्भाव्योक्तहेतावतिव्याप्तिरतो हेत्वंतरमाह॥ पर्वतेति॥ अत्र समवायेन वह्न्यभावस्य

पर्वते संयोगेनैव वह्न्यभावस्य च वह्न्यवयवे हेतुसमानाधिकरणत्वात् उभयघटितसाध्याभावकूटस्याधिकरणं यन्नित्य
रूपादिकं तत्समवेतत्वाभावस्य तादृशसंयोगहेतोः सत्वात् भवत्यतिव्याप्तिः॥ यत्तु संयोगेन वह्नेः साध्यत्वे वह्न्यवयवत्त
स्य विरुद्धत्वाद्धेतोः साध्यसामानाधिकरण्यविशेषणादेव तद्वारयितुं शक्यत्वात् इत्यतः पर्वतेत्यादि हेत्वंतरमिति॥ तन्तुच्छं॥
वह्न्यवयवेऽपि संयोगेन वह्न्यंतरस्य वृत्त्याविरोधविरहात् तादात्म्ये न साध्यतानुरोधात् साध्यसंबंधितामात्रस्यैव सामानाधि
करण्ये प्रवेश्यत्वादिति भावः॥ समवायसंबंधद्वयेति॥ पर्वतस्य संयोगावच्छिन्नवह्न्यभावानधिकरणत्वात् वह्न्यवयवस्य च सम
वायावच्छिन्नवह्न्यभावानधिकरणत्वादिति भावः॥ नातिव्याप्तिरिति॥ प्रागुक्तरीत्या साध्याभावकूटाधिकरणे नित्यरू
पादौ हेतुतावच्छेदकसंयोगसंबंधेन वृत्त्यप्रसिध्या वह्निमान् धूमादित्यादावव्याप्तिर्नेति ध्येयं॥ अत्र च वृत्त्यनियाम
कसंबंधस्य प्रतियोगितावच्छेदकत्वमत एवेदमुक्तं गते न धनी चैत्रत्वादित्यादौ स्वत्वादिसंबंधेन साध्यतायां नाव्या
प्तिः॥ साध्यतावच्छेदकसंबंधातिरिक्तसमानाधिकरणसंसर्गानवच्छिन्नप्रतियोगिताकसाध्याभावो ग्राह्य इति नयु
क्तं॥ धनी द्रव्यत्वादित्यादौ व्यधिकरणसंसर्गावच्छिन्नसाध्याभावस्यैव तादृशत्वेनातिप्रसंगात्॥ ननु साध्याभावो यदि सा
ध्यतावच्छेदकरूपेणाविवक्षितः तदा प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तिः॥ प्रमेयत्वावच्छिन्नप्रतियोगिताप्रसिद्धेः॥ न च
साध्यतावच्छेदकातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभाव एव साध्याभावो वक्तव्यः॥ तथा च वह्नि
गगनादिनाप्रमेयादेरभाव एव तत्र साध्याभावो सुलभ इति वाच्यं॥ घ्राणग्राह्यगुणवान् द्रव्यत्वादित्यादावतिप्रसंगात्॥ तो

आग० दशागुणत्वस्याश्रयगंधत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया व्यधिकरणधर्मावच्छिन्नाभावानामेव ताद
८३ शसाध्याभावत्वादत आह ॥ तथेति ॥ स्वप्रतियोगिताप्रतियोगिताव्यापकसाध्यतावच्छेदकेत्यस्य फलमाह ॥ पृथिवी
त्वाभावादाविति ॥ तत्र हि पक्षो घटादिः ॥ तथा च घटावृत्तित्वावच्छिन्नाभाव पटावृत्तित्वावच्छिन्नाभावादिघटितसाध्याभावकू
टाधिकरणाप्रसिद्ध्या पृथिवीत्वाभाववान् जलत्वादित्यादौ नाव्याप्तिः ॥ घटावृत्तित्वाद्यवच्छिन्नाभावप्रतियोगितायाः
पटत्वादावपि सत्वेन साध्यतावच्छेदकस्य तद्व्यापकतया तादृशाभावानां लक्षणाघटकत्वात् प्रतियोगिभेदेपि एकधर्मा
वच्छिन्नप्रतियोगिताया एकत्वादिति भावः ॥ सद्धेताविति ॥ नाव्याप्तिरित्यन्वयः ॥ वह्निमान् धूमादित्यत्र साध्यतावच्छेद
कसंयोगसंबंधेन विपक्षीभूत तत्तज्जलाद्यवृत्तित्वावच्छिन्नाभावकूटस्य गुणादौ द्रव्यं पृथिवीत्वादित्यत्र च विपक्षीभूतरू
परसादिप्रत्येकासमवेतसामान्याभावकूटस्य जात्यादावधिकरणतासत्वात्तदप्रसिद्धिनिबंधनाव्याप्तेरुक्तस्य
जविरहात् तदुभयं नोदाहृतं ॥ ननु यावतां एकाधिकरण्यं तावत्समुदायस्य विवक्षयां नोक्ताव्याप्तिरत आह ॥ पृथिवी रामः ८३
त्वादाविति ॥ साधनसमानाधिकरणत्वेन साध्याभावस्य विशेषणीयत्वे न जातित्वावच्छिन्नाभावमादाय नातिव्या
प्तिसंभव इत्यादि पदमुपात्तं ॥ तथा च जलासमवेतत्वावच्छिन्नाभावस्य तेजोसमवेतत्वावच्छिन्नाभावस्य च साधन
समानाधिकरणत्वात् तदुभयघटितसाध्याभावकूटाधिकरणे जात्यादौ प्रकृतहेतोरसत्वादिति व्याप्तिरिति भावः ॥ द्र
व्यत्वस्य समवायेन हेतुत्वे तादृशसाध्याभावकूटे यति जात्यादौ हेतुतावच्छेदकीभूतसमवायेन वृत्त्यप्रसिद्ध्यैव नाति

व्याप्तिस्यादत उक्तं द्रव्यत्वप्रकारकेति ॥ सामान्यादौ च स्वरूपसंबंधेन वृत्तिर्वाच्यतादावेव सुलभा ॥ प्रमाविशेष्यतादाविति
॥ नातिव्याप्तिरित्यन्वयः ॥ तादृशप्रतीतिविषयत्वं प्रमेयमादाय जात्यादावपीत्यतः प्रमेति ॥ अत्र प्रतियोगिताप्रतिव्याप
कत्वं साध्यतावच्छेदकताघटकसंबंधेनैव ग्राह्यं ॥ तेन नित्यज्ञानवत्सत्तादात्म्येन साध्यतायां ईश्वरत्वादिहेतौ घटान्यभेद
स्य पटान्यभेदस्य च द्वयोर्विषयतासंबंधेन प्रतियोगिताव्यापकीभूतनित्यज्ञानकयोरेकाधिकरण्याप्रसिद्धावपि नाव्या
प्तिः ॥ न वा तादृशाए व साध्ये द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादित्यत्र पृथिव्यादौ साधनसमानाधिकरणस्य पृथिव्यादिनव
द्रव्याणां प्रत्येकभिन्नद्रव्यभेदकूटस्याधिकरणे गुणादौ हेतोरसत्वेपि अतिव्याप्तिः ॥ न चैवं वह्निधूमोभयवान् धूमादित्यत्राव्या
प्तिः प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसिततया तेन तां प्रति पर्याप्त्याख्यसाध्यतावच्छेदकताघटकसंबंधेन केनाप्यव्याप
कतया निरुक्तसाध्याभावाप्रसिद्धेरिति वाच्यं ॥ एकविशिष्टापरत्वानतिरिक्तस्योभयत्वस्य सार्वभौममते पर्याप्तिभिन्नसंब
धेनैव साध्यतावच्छेदकत्वादिति भावः ॥ साध्यतावच्छेदकव्यापिका प्रतियोगितेत्यस्य फलमाह ॥ नापीति ॥ घटत्वाभावत्वेन
साध्यत्वे साध्याभावकूटवत्वं घटस्यैव सुलभमत उक्तं ॥ अभाववत्वादिनेति ॥ आदिना प्रमेयत्वादिपरिग्रहः ॥ तथा चाभाववान्
प्रमेयवान् वा घटत्वादित्यत्र साधनसमानाधिकरणस्य तत्तद्घटान्यत्वाभावकूटस्याधिकरणाप्रसिद्ध्याव्याप्तिः स्यादतः
साध्यतावच्छेदकव्यापकेति ॥ साध्यतावच्छेदकीभूताभावत्वादिव्यापकप्रतियोगिताकत्वाभावादेव तत्तद्घटान्यत्वा
भावानां लक्षणाघटकत्वादिति भावः ॥ अत्रत्वन्यूनवृत्तिधर्मानवच्छिन्नाया एव प्रतियोगिताया साध्यतावच्छेदकसमनैय

त्पंवाच्यं॥ तेनघटत्वाभाववत्वेनपटत्वाभाववत्वेनच प्रमेयसामान्याभावयोरेकाधिकरणप्रसिद्धावपिनोक्ताव्याप्तितादवस्थ्यं॥
घटत्वाभाववत्वादेः प्रमेयसामान्यनिष्ठप्रतियोगितान्यूनवृत्तित्वेनतादृशप्रतियोगिताकाभावानांलक्षणघटकत्वात्॥
एवंसाध्यसामानाधिकरण्यमपिहेतौवक्तव्यं। तेनसत्तावत्समवेतत्वसमनियतप्रतियोगिताकस्यव्यधिकरणधर्मा
वच्छिन्नाभावस्यैववृत्तिमत् वृत्तित्वात्तादृशस्यचयावत एवहेतोसत्वेपिजात्यभाववान्द्रव्यत्वादित्यादिविरुद्धहेतौनातिव्या
प्तिरितिध्येयं॥ यद्यपिघटवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्यघटान्यवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्यचद्वयोरेकाधिकरणप्र
सिद्धावाच्यंज्ञेयत्वादित्यादौअव्याप्तिः॥ नचघटादिवृत्तित्वविशिष्टवाच्यत्वत्वंनप्रतियोगितावच्छेदकंतदपेक्षयालघोर्घटादि
वृत्तित्वविशिष्टत्वस्यैवतथात्वात्॥ तादृशविशिष्टत्वाद्यवच्छिन्नाभावानांचसाध्यतावच्छेदकसमव्याप्तप्रतियोगिताकत्वाभा
वादेवव्युदासः घटवृत्तित्वविशिष्टवस्तुमात्रएवतत्प्रतियोगितासत्वादितिवाच्यं॥ वाच्यत्वनिष्ठाधेयताविशेषणघटावच्छि
न्नप्रतियोगिताकाभावस्यतादृशसंबंधेनघटान्यावच्छिन्नप्रतियोगिताकाभावस्यचद्वयोस्तथाप्यधिकरणप्रसिध्याव्या राम॰
प्तितादवस्थ्यात्॥ नचाधेयताविशेषणघटादेः प्रतियोगितावच्छेदकत्वेमानाभावः तस्यतथापिअवश्यवाच्यत्वात्॥ अन्यथा ५५
घटवृत्तित्वविशिष्टवाच्यत्ववान्द्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः॥ गुरुतरतादृशवाच्यत्वत्वावच्छिन्नाभावस्याप्रसिध्या
विशिष्टता- घटवृत्तित्वावच्छिन्नाभावस्यचसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावेनव्यधिकरणधर्मावच्छिन्नस्यैवघटवृ
त्तित्वविशिष्टवाच्यत्वाभावस्यलक्षणघटकत्वात्॥ तथापिदूषणमिदंस्फुटतयोपेक्ष्याह॥ पृथिवीत्वेति॥ ननुसार्वभौमाणां

मतेविरुद्धयोरुभयत्वस्यातिरिक्तत्वेपिसमानाधिकरणयोरेकविशिष्टापरत्वमेवोभयत्वं॥ तथाचपृथिवीत्वद्रव्यत्वोभयत्वम
पिपृथिवीत्वविशिष्टद्रव्यत्वत्वमेवसाध्यतावच्छेदकीभूतंपर्यवसितमितितत्समनियतप्रतियोगिताकत्वाभावादेवतदुभया
न्यतरत्वावच्छिन्नाभावमादायनातिव्याप्तिः॥ तत्प्रतियोगितायाः पृथिवीत्वेपिसत्वेननिरुक्तसाध्यतावच्छेदकस्यतद्व्यापकत्वाद
तआह॥ अपिचेति॥ उद्देश्यविधेयभावस्यलेसमानलिंगकत्वस्यातंत्रत्वात् पृथिव्यामन्यत्वविशिष्टद्रव्यत्वस्यसाध्यताऽभिम
तत्वाद्॥
निरा कर्तुंपक्षमुल्लिखति॥ इदमिति॥ पृथिवीति॥ पृथिव्यन्यत्वेसतिद्रव्यान्यासमवेतसकलद्रव्यसमवेतत्वादित्यर्थः॥ नन्वस्तक
लद्रव्यवृत्तित्वांतर्भावेनद्रव्यत्वस्यसाध्यत्वेद्रव्यान्यासमवेतत्वावच्छिन्नाभावस्यतादृशसाध्यतावच्छेदकसमनियतप्रतियोगि
ताकत्वाभावाद्गुरुतरसकलद्रव्यवृत्तित्वघटितद्रव्यत्वत्वावच्छिन्नात्यंताभावस्यचाप्रसिद्धत्वादग्रेद्रव्यत्वत्वावच्छिन्नाभावमा
दायातिव्याप्तेरसंगत्यापत्तिरितिवाच्यं॥ द्रव्यत्वत्वादीत्यत्रद्रव्यत्वत्वपदेनद्रव्यमित्याकारकबुद्धिव्यक्तिप्रकारत्वस्यैवा
ग्रेवक्तव्यत्वात्॥ तस्यचद्रव्यान्यासमवेतत्वमपेक्ष्यापिलघुत्वेनप्रतियोगितावच्छेदकत्वसंभवादितिभावः द्रव्यत्वत्वादीत्या
दिनापृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वस्यपृथिवीवृत्तित्वविशिष्टद्रव्यत्वत्वस्यचद्वयोरेवावच्छेदकयोःपरिग्रहः॥ ननुसाध्य
तावच्छेदकान्यसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावएवसाध्याभावपदार्थोवाच्यः॥ तथाचविशिष्टद्र
व्यत्वस्यसाध्यतायांद्रव्यत्वसामान्याभावस्यातथात्वान्नातिप्रसंगः॥ गुरुधर्मस्यप्रतियोगितावच्छेदकत्वोपगमाद्वेताद्रू
प्येणसाध्यतायामपिनातिव्याप्तिरतआह॥ किंचेति॥ ननुविशिष्टस्यातिरिक्तत्वमतेद्रव्यत्वादिसामान्याभावस्यविशिष्टरू

जाग॰ ष्पता वच्छेदकसमनियतप्रतियोगिताकत्वाभावादेवतमादृाय नातिव्याप्तिरत आह॥ किंचेतीति प्राचः॥ सद्धेतो॥ वायुत्वादे॥
८५ अप्रसिद्धिरिति॥ कालस्य सकलरूपवत्वेपि साध्यवत्ताया अविरोधिता घटकेन समवायेन दैते न धिकरणत्वादिति भावः॥
शंकते॥ यावतामिति॥ तथा च व्यधिकरणधर्मावच्छिन्नाभावैरेकाधिकरण्यापन्नस्य तत्र रूपस्याधिकरणे वृत्तित्व प्रसिध्येव
नाव्याप्तिरिति भावः॥ विवक्षतेपीत्यपि नातदविवक्षायामपि वक्ष्यमाणातिव्याप्तिसूचितो॥ ननु यावतां मिथः सामानाधि
करण्यं तावतां समुदायो विवक्षितः॥ किं वा यावतां साध्याभावांतरेण सामानाधिकरण्यं तावत्समुदायो भिप्रेतः॥ प्रथमोऽ
दृमित्यादि॥ अत्रेदमिति पृथिव्याः विशेषणं न तु पक्षनिर्देशः॥ अन्यथा घटत्वायुद्धित्वपटत्वायुद्धित्वकुड्यत्वायुद्धित्वा
नामेव तद्वायो मिथः सामानाधिकरण्यापन्नसाध्याभावानामधिकरणे तद्वायो वृत्तिमत्वादेव वायुत्वादिहेतावतिव्याप्त्य
नुपपत्तेः॥ एतत्पृथिवीसमवेतप्रतियोगिताकाभावस्य साध्यत्वे वायुत्वादेः सद्धेतुत्वात्समवेतत्वापेक्षया गुरुत्वेनैतत्पृ
थिवीसमवेतत्वावच्छिन्नाभावस्य चाप्रसिध्येवसाध्यत्वायोगाद्गुणपदं॥ ननु एतत्पृथिवीवृत्तिगुणत्वावच्छिन्नाभावसाध्यक
मपि वायुत्वादिकं सद्धेतुरेव प्रलयेपरमाणावुत्पत्तिकाले चाव पविनि वायो तत्सत्वादतः साध्यांतरमाह॥ सत्तान्येति रामः
॥ अत्र पृथिवीपदमेतत्पृथिवीपरं॥ अन्यथा प्रागुक्तद्वित्वव्यक्तीनां तद्वायो मिथः सामानाधिकरण्यापन्नसाध्याभावतया ८५
वायुत्वादेस्तत्कूटाधिकरणीभूतवायुवृत्तित्वेनैवातिव्याप्त्यसंभवापत्तेरिति ध्येयं॥ अत्रापि एतत्पृथिवीसमवेतप्रतियो
गिताकाभावस्यैकेव जात्यन्वयितया तत्र साध्ये वायुत्वादेः सद्धेतुत्वात्समवेतत्वापेक्षया गुरुत्वेन तत्पृथिवीसमवेतत्वावच्छि

न्नाभावस्य चाप्रसिध्या साध्यत्वायोगात्सत्तान्यपदं॥ न च सत्तान्यैतत्पृथिवीसमवेतत्वावच्छिन्नाभावोप्यप्रसिद्धः द्रव्य
त्वत्वस्यैव तदवच्छेदकत्वादिति वाच्यं॥ सकलद्रव्यवृत्तित्वाद्दिघटितद्रव्यत्वत्वस्यैवतादृशसमवेतत्वापेक्षया गुरुतयाऽ
नवच्छेदकत्वादिति॥ सत्तान्यसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वात् समवेतत्वावच्छिन्नाभावस्य साध्यत्वे च समवेतमात्र
स्यैव तद्भावतया मिथः सामानाधिकरण्यापन्नसमवेतकूटवति वायो हेतोः सत्वादेव नातिव्याप्तिरतः पृथिवीपदं॥
ननु वायुत्वस्योक्तसाध्यसामानाधिकरण्याभावादेव न तत्रातिव्याप्तिरतो हेत्वंतरमाह॥ रूपवदिति॥ अयं हेतुर्गुण
दौ साध्यसमानाधिकरणः रूपात्यताभावस्य पृथिव्यामपि उत्पत्तिकालावच्छेदेन सत्वादतिव्याप्त्यसंभवाद्रूपवद
न्यत्वानुधावनं॥ रूपवद्भेदस्यापि तद्दानी पृथिव्यामुपगमेत्वाह॥ इत्यादाविति॥ आदिना वायुरूपान्यतरत्वादेः प
रिग्रहः॥ तादृशेति॥ मिथः सामानाधिकरण्यापन्नेत्यर्थः॥ द्वितीयत्वाह॥ वस्तुत इति॥ तादृशाभावेति॥ व्यधिकरण
धर्मावच्छिन्नसाध्याभावेत्यर्थः॥ सहस्रेत्यवच्छेदकभेदेनाभावभेदमस्युपेत्योक्तं दुर्वारैवेति॥ ननु यावतामेकव्य
क्तिवृत्तित्वं तावत्समुदायस्याधिकरणत्वोक्तानाप्रसिद्धिः न वा प्रागुक्तातिव्याप्तिः॥ किंच सत्तान्यैतत्पृथिवीसमवे
तमूर्त्यत्वस्याभावो द्रव्यत्वमेव लाघवात् न तु सत्तान्यैतत्पृथिवीसमवेतमात्रं बहूनां तथात्वे गौरवात् अतः परस्पर
सामानाधिकरण्यापन्नतादृशद्रव्यत्वादिरूपसाध्याभाववत्तामवति हेतोः सत्वादेव नोक्तातिव्याप्तिरिति यदि ब्रूयात्तदा
दोषांतरमाह॥ किंचेति॥ यत्तु सत्तान्यपृथिवीसमवेतमूर्त्यत्वस्यरूपे सामान्याभावस्य चाभावो नुगतप्रतीतिबलादति

रिक्तएवेतितद्वृत्तिहेतोः सत्तासत्ताभ्यां नोक्तातिव्याप्त्यव्याप्त्योः संभवइत्यतः किं चेति॥ तन्नुक्तं॥ इदानीमेवाभावाभाव
स्यातिरिक्तत्वमंगीकृत्यदोषनिरासेभूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावाभावस्याप्यतिरिक्ततादशेभूतत्वमूर्त्तत्वेत्या
दिनातिव्याप्त्यभिधानस्यसंदर्भविरोधापत्तेः॥ साध्याभावकूटाधिकरणवृत्तित्वस्यसंयोगसमवायादिप्रत्येकसं
बंधेनप्रवेशमभिप्रेत्याह॥ धूमादाविति॥ अव्याप्तिरिति॥ निर्वह्निसमवेतत्वसामान्याभावस्यैवयावदंतर्गतस्यधू
मे सत्त्वादितिभावः॥ संबंधसामान्येनतादृशवृत्तित्वस्यप्रवेशमभिप्रेत्याह॥ साध्यतेति॥ कालादावित्यादिपदेनादि
शः परिग्रहः॥ व्यभिचारिणि॥ पृथिवीद्रव्यत्वादित्यादौ॥ ननु धूमवान्वह्नेरित्यादौ तत्र हेतुतावच्छेदकसंबंधेनवृ
त्तेर्विवक्षायामपि नातिव्याप्तेर्धूमानधिकरणे कालादिगोदौ मूर्त्तमात्रस्यैवसंयोगसंबंधेनवृत्तेस्तत्सामान्या
भावस्यहेतुतावच्छेदकसंयोगसंबंधेनयोवृत्तिमान्तद्वृत्तित्वेनलक्षणाघटकत्वादितिध्येयं॥ सत्तादीत्यादिनासम
मवेतादेः साध्यस्योपग्रहः॥ शंकते॥ साधनेति॥ तथा च सद्धेतुस्थलेव्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैवसाध
नसमानाधिकरणत्वात्तत्कूटाधिकरणवृत्तित्वस्यापितादृशाभावमादायैवलक्षणसंगतिः॥ इत्यच वृत्तिमद्वृत्तिप
दस्यव्यावृत्तिर्व्यतिरेकिण्यपिसंभवतीतिद्रष्टव्यं॥ यथा चैवंसाध्यतावच्छेदकस्यप्रतियोगिताव्यापकत्वदलसा
र्थक्यं तथोपपादितंप्रागेव॥ यद्यपि हेतुसमानाधिकरणत्वेनसाध्याभावानांनिवेशेतादृशसाध्याभावकूटवद्वृत्ति
तात्वेप्रतियोगिताव्यापकत्वस्योपादानंविफलंवह्निमान्धूमादित्यादौ आलोकावृत्तितावच्छिन्नाभावमादायाव्या

प्तिप्रसंगस्यतादृशाभावेसाधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वव्यापकप्रतियोगिताकत्वाभावादे
वव्युदासात्॥ नचात्र कल्प्येतादृशावृत्तित्वस्यप्रतियोगिताव्यापकत्वंनदेयमितिवाच्यं॥ तथासतिसाधनसमानाधिकर
णसाध्याभावकूटाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्यद्रव्यवृत्तित्वसामान्याभावस्यैवस्पर्शवदन्यत्वहेतौअ
सत्वादशेभूतत्वमूर्त्तत्वेत्यादिनातिव्याप्तेरसंगत्यापत्तेः॥ तथापि वृत्तिमत्वालोकान्यत्वोभयत्वावच्छिन्नाभावस्यैवहेतुस
मानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्यधूमहेतावसत्वेनतमादायाव्याप्तिवार
कत्वेनैवतस्यसार्थकत्वं॥ न च पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावमादायाव्याप्तिवारणार्थंव्यासज्य
वृत्तिधर्मानवच्छिन्नत्वेनप्रतियोगितावद्रूपंविवक्षणीयमितितत एवालोकाभावस्यव्युदासइतिवाच्यं॥ पर्वतवृत्तित्वपर्व
तान्यवृत्तित्वोभयत्वावच्छिन्नाभाववारणाय वृत्तित्वपर्याप्तव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनैवप्रतियोगितायावक्तव्य
त्वात्तादृशप्रतियोगिताकत्वस्य च वृत्तिमत्वालोकान्यत्वोभयाभावेपिसत्वादितिध्येयं॥ भूतत्वमूर्त्तत्वान्यतरप्रतियो
गिकाभावस्यकेवलान्वयित्वात्तत्वेनसाध्येस्पर्शवदन्यत्वादिकंसद्धेतुरेवेत्यतउक्तमन्यतरत्वेनेति॥ तादृशेति
॥ हेतुसमानाधिकरणेयोभूतत्वमूर्त्तत्वोभयघटितसाध्याभावस्तोमस्तद्वतीत्यर्थः॥ पृथिव्यादावित्यादिनाजलते
जोनिलानांपरिग्रहः॥ अत्रभूतत्वंविशेषगुणवत्वेसत्यात्मान्यत्वंनतुबहिरिंद्रियग्राह्यजातीयविशेषगुणवत्वं
॥ मूर्त्तत्वमपिस्पर्शवन्मनोन्यतरत्वंजातिविशेषो वा न त्ववच्छिन्नपरिमाणवत्वंतथासतिमनःपरिमाणशून्ययोरे

जाग° वत्साधनसमानाधिकरणतादृशसाध्याभावयोरेकाधिकरणाप्रसिध्यातिव्याप्त्यसंभवादिति द्रष्टव्यं॥ ननु साधना
८७ धिकरणयत्किंचिद्व्यक्तिवृत्तिसाध्याभावकूटस्य निवेशान्नेष दोषः॥ क्वचिदपि स्पर्शवद्भिन्ने भूतत्वमूर्त्तत्वोभयोरस
त्वात्तदुभयान्यतरघटितसाध्याभावकूटवत्याकाशे मनस्यपि च हेतोः सत्वात्॥ वस्तुतः समनियताभावानामैक्यमते भू
तत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभाव एव भूतत्वमनस्त्वान्यतरत्वावच्छिन्नस्य मूर्त्तत्वगगनत्वान्यतरत्वावच्छिन्नस्य चाभावः
॥ तथा च मनस्त्वगगनत्वयोरपि भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभाववत्वसाध्यस्याभाववत्त्वाद्धेतुसमानाधिकरणत
दुभयघटितकूटाधिकरणाप्रसिध्यैव नोक्तातिव्याप्तिः॥ अस्तु वा यावंति निरुक्तसाध्याभाववत्वानि तावतां प्रत्येकावच्छि
न्नस्यापदधिकरणं तद्वृत्तित्वाभावाः वृत्तिमद्वृत्तयो यावंतः तद्वत्वमेव व्याप्तिः॥ तथा च भूतत्वमूर्त्तत्वान्यतराभाववाभाव
त्वावच्छिन्नस्याधिकरणे मनस्येव हेतोः सत्वान्नातिव्याप्तिरत आह॥ किंचेति॥ ननु भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभा रामः
वस्याभावोनुगतव्यवहारादतिरिक्त एव न तु भूतत्वमूर्त्तत्वोभयस्वरूपः तथा च साधनसमानाधिकरणतादृशाभा ८७
ववति गगने मनसि वा हेतोः सत्वान्नातिव्याप्तिरतः किंचेतीत्यपि वदंति॥ गुरुचरणास्तु॥ ननु यावंतो हेतुसमानाधिक
रणाः पदार्थाः साध्यवद्वृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववंतः स्तावत्पदार्थकूटाधिकरणवृत्तित्वा
भावा वृत्तिमद्वृत्तयो यावंतः तद्वत्वं विवक्षितं॥ तथा च हेतुसमानाधिकरणयोर्गगनत्वमनस्त्वयोरेवतादृशपदार्थयो
रेकाधिकरणाप्रसिध्या नातिव्याप्तिः॥ निरुक्तोभयाभाववताघटत्वपटत्वादीनामेकाधिकरणाप्रसिध्या वह्निमान्

धूमादित्यादावव्याप्तेर्हेतुसमानाधिकरण्योपादानमित्यतः किंचेतीति प्राहुः॥ कालान्यत्वसाध्यकस्य कालिकसंबं
धेन हेतोर्विरुद्धत्वादेव तत्र नातिव्याप्तिरत उक्तं महेति॥ तथा च महाकालान्यो घटादित्यादावित्यर्थः॥ वृत्तिमन्मात्रस्यैवे
ति॥ तथा च महाकालवृत्तित्वसामान्याभावस्य वृत्तिमद्वृत्तित्वाभावाद्यधिकरणधर्मावच्छिन्नाभावस्य च यावत एव हेतौ स
त्वादतिव्याप्तिरितिभावः॥ अत्र केचित्॥ सार्वभौममते सामानाधिकरण्यस्याव्याप्यवृत्तित्वाद्दंडकालावच्छेदेन घटादावेव
वृत्तिमति वर्त्तमानस्य महाकालवृत्तित्वसामान्याभावस्य यावद्धेत्वधिकरणावच्छेदेन हेतावसत्वान्नातिव्याप्तिः॥ वृत्तिम
द्वृत्तयो यावंतस्तादृशाभावाः यावद्धेत्वधिकरणावच्छेदेन तद्वत्वस्य विवक्षितत्वात्॥ अत एव एतद्रूपाभिन्नं गुणत्वादित्या
दौ तद्रूपभिन्नसमवेतत्वतत्समनियतप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेपि नातिव्या
प्तिः॥ तद्रूपावच्छेदेन गुणत्वादावेव वर्त्तमानस्य तद्रूपभिन्नसमवेतत्वसामान्याभावस्य हेत्वधिकरणीभूतगुणांतरावच्छे
देन हेतावसत्वादित्याहुः॥ तच्चिंत्यं॥ यत्तु वृत्तिमद्वृत्तय इत्यस्य वृत्तिमद्वृत्तित्वसाध्यवद्वृत्तित्वप्रतियोगिकत्वोभयान
धिकरणत्वमर्थः॥ तथा च महाकालवृत्तित्वसामान्याभावस्यापि साध्यवद्वृत्तित्वप्रतियोगिकत्वविरहेण निरुक्तोभया
नधिकरणस्य हेतावसत्वान्महाकालान्यो घटादित्यादौ नातिव्याप्तिः॥ न च महाकालवृत्तित्वापेक्षया लघोः कालिक
संबंधावच्छिन्नवृत्तित्वत्वस्यैव महाकालवृत्तित्वाभावप्रतियोगितावच्छेदकतया महाकालवृत्तित्वसामान्याभावस्य न
निरुक्तवृत्तिमद्वृत्तित्ववृत्तिमद्वृत्तेस्तस्य साध्यवद्वृत्तित्वप्रतियोगिकत्वादिति वाच्यं॥ यावंति कालिकसंबंधेन महाकाल

जा॰ग॰ ८८ वृत्तित्वानितावदन्यतमत्वावच्छिन्नाभावस्य तावद्धर्मिकयत्किंचिद्धर्मविशेष्यत्वावच्छिन्नाभावस्य वा निरुक्तोभयानधिक
रणस्य हेतावसत्वेनातिव्याप्त्यसंभवात्॥ कालिकसंबंधावच्छिन्नवृत्तित्वमपेक्ष्य तावदन्यतमत्वलक्षणगुरुभेदस्यैव
लाघवेन प्रतियोगितावच्छेदकत्वौचित्यादिति॥ तन्मते पापि नित्यज्ञानभिन्नं घटादित्यादौ विषयितासंबंधेन हेतावति
व्याप्तेर्दुर्वचत्वापत्तात् नित्यज्ञानविषयत्वसामान्याभावस्याप्रसिद्धत्वाद्यधिकरणधर्मावच्छिन्नतादृशविषयत्वाभावस्य
चयावत एव हेतौ सत्वात्॥ न व्याप्तिः॥ साधनसमानाधिकरणा यावंतो व्याप्यवृत्तयः साध्याभावाः साध्यसामानाधि
करण्यापन्नतावत्कूटाधिकरणवृत्तिताभावो विवक्षितः॥ तथा च व्यभिचारिमात्र एव साध्यसामान्याभावघटितकूट
स्य साध्यसामानाधिकरण्याप्रसिध्या नातिप्रसंगः॥ यावंतस्तादृशाः साध्याभावाः तत्कूटाधिकरणस्य वा साध्यव
त्वं विवक्षितं लाघवात्तादृशवृत्तिताभावस्य च वृत्तिमद्वृत्तित्वं पाव त्वं च नापेक्षितं वैयर्थ्यात् इत्थं च साधनसमानाधिक
रणाः यावंतस्तादृशाः साध्याभावाः साध्याश्रयीभूततावत्कूटाधिकरणवृत्तित्वमपि लक्षणं साधीय इति प्राहुः॥ रामः ४८
वस्तुतस्तु॥ पूर्वलक्षण इवात्रापि वृत्तिमद्वृत्तयो यावंतः साध्याभावसमुदायवृत्तिताभावो वस्तद्वत्त्वावच्छिन्नाधिकरण
तासामान्यकधर्मवत्त्वमेव व्याप्तिर्वाच्या॥ तत्र वृत्तिमद्वृत्तित्वं साध्याभाववृत्तित्वं च दैशिकविशेषणतयैव वक्तव्य
मतो न कोपि दोषः पदमादधाति इत्यवधारयमिति॥ एतेनेति॥ महाकालान्यो घटादित्यादावतिप्रसंगेनेत्यर्थः॥
परास्तमिति परेणान्वयः॥ अत्र वाच्यं ते यत्ता तत्तावान् द्रव्यत्वादित्यादिना नाव्यक्तिवृत्तिसद्धेतौ तद्व्यक्तिवृत्तित्ववि

ष्टसाध्याभावस्य तदन्यव्यक्तिवृत्तित्वविशिष्टसाध्याभावस्य च द्वयोः साधनसमानाधिकरणयोरेकाधिकरणाप्रसिध्या सा
धनाधिकरणयत्किंचिद्व्यक्तिवृत्तिकूटाधिकरणवृत्तित्वसामान्याभावानां हेतावसत्वेन वाव्याप्तिरतः प्रतियोगिताकांतर्य
वद्भावविशेषणं॥ विशिष्टसत्तावान् जातेरित्यादौ जातिसमानाधिकरणस्य साध्यीभूतस्य व्यापकतावच्छेदकरूपावच्छिन्नाभा
वस्य व्यधिकरणधर्मावच्छिन्नाभावत्वनियमात् वृत्तिमद्वृत्तेस्तत्कूटाधिकरणवृत्तिताभावस्य यावत एव हेतौ सत्वादतिव्याप्तिर
तः साध्यतावच्छेदकावच्छिन्नेति॥ तथा च गुणान्यत्वाभावकर्मान्यत्वाभावयोरप्युक्तैकरूपावच्छिन्नप्रतियोगिताकत्वात्तदुभय
घटितकूटाधिकरणाप्रसिध्या वेदनातिव्याप्तिः॥ अत्रापि येन संबंधेन व्यापकता तेनैव संबंधेनाभावो निवेश्यः॥ तेन समवाया
वच्छिन्नवह्न्यभावघटितकूटाधिकरणवृत्तिताभावस्य वह्न्यवयववत्त्वादिनिष्ठस्य हेतावसत्वेपि वह्निमान् तत्पर्वतत्वादित्या
दौ नाव्याप्तिः॥ ननु विशेषणताविशेषेण वसाध्यव्यापकत्वं तादृशरूपावच्छिन्नाभावस्य ग्राह्य इति युक्तं॥ साध्यस्य गुणसा
मान्यस्याभाव इत्याद्युत्तरग्रंथविरोधात् गुणस्य दैशिकविशेषणतासंबंधेन गुणाव्यापकत्वात्॥ यत्तु साध्यतावच्छेदक
संबंधेनैव व्यापकत्वं तादृशरूपावच्छिन्नाभावं च न निवेशयंति॥ तन्तुच्छं॥ वृत्त्यनियामकसंबंधेन साध्यतायां तदवच्छिन्नप्रति
योगिताप्रसिध्या व्याप्त्यप्रसंगात्॥ धूमवान् वह्नेरित्यादावतिव्याप्तेश्च॥ संयोगेन द्रव्यस्याव्याप्यवृत्तितया व्यधिकरणध
र्मावच्छिन्नप्रतियोगिताकानामेव संयोगसंबंधावच्छिन्नद्रव्याभावानां व्याप्यवृत्तित्वात्तत्कूटाधिकरणवृत्तित्वसामान्याभा
वस्य वृत्तिमत्यवृत्तेश्च॥ तादात्म्येन प्रमेयव्यापकतावच्छेदकं यत्प्रमेयत्ववाच्यत्वादिकं तेन संबंधेन तदवच्छिन्नाभावाप्रसिध्या

जाग०
८९

तादात्म्येन प्रमेयसाध्यकसत्वे तावद्व्याप्तेरसत्त्वादावेदितत्वात्॥ न च द्रव्यं घटादित्यत्र कालिकसंबंधेन हेतावतिव्याप्तिः सा
धनसामानाधिकरण्यस्य द्रव्यत्वाभावकूटस्य कालिकसंबंधेनाधिकरणे महाकाले हेतुतावच्छेदकसंबंधेन वृत्तिमन्मात्रस्य
वृत्तेरिति वाच्यं॥ दैशिकविशेषणतया तादृशाभावस्याभावाधिकरणत्वस्य निवेशनीयत्वादिति भावः॥ तद्घटभिन्नं घटत्वादि
त्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकयावदभावाधिकरणीभूततद्घटवृत्तित्वस्य व्यधिकरणधर्मावच्छि
न्नाभावो घटत्वेपीत्यतिव्याप्तिरत उक्तं यावंत इति॥ न च दैशिकविशेषणतासंबंधेन तद्घटभिन्नत्वाभावस्याधिकरणाप्रसिद्धे
र्नातिव्याप्तिः कथं यावत्त्वविशेषणमिति वाच्यं॥ तथापि तद्घटान्यत्वं प्रकारकप्रमाविशेष्यत्वाभावस्यापि यावदंतर्गतस्य सा
ध्याभावस्य तादृशसंबंधेन तदधिकरणीभूततद्घटवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वहेतौ सत्वादतिव्याप्ति
तो यावंत इति॥ वह्निमान्संयोगसामान्याभाववान् वा धूमादित्यादावव्याप्तिः साधनसमानाधिकरणस्य साध्यव्यापकता
वच्छेदकीभूतसंयोगसामान्याभावत्वावच्छिन्नप्रतियोगिताकस्य वह्निसंयोगाद्यात्मकाभावकूटस्याधिकरणाप्रसिद्धेरतो व्या
प्यवृत्तिपदमित्याह॥ केवलेत्यादिना॥ केवलान्वयिनि इत्यनेन साध्यव्यापकत्वमाविष्कृतं॥ संयोगादीत्यादिना वह्निसंयोगत्वा
वच्छिन्नाभावस्योपग्रहः॥ तेन प्राचां मते द्रव्ये संयोगसामान्याभावस्यासत्वेपि न क्षतिः॥ दैशिकाव्याप्यवृत्तिसाध्यकेप्रयो
जनमुक्त्वा कालिकाव्याप्यवृत्तिसाध्यकेतदाह॥ एवमिति॥ ननु तादृशरूपावच्छिन्नप्रतियोगिताकानां वास्तवाभावानामे
व लक्षणघटकत्वात्संयोगाद्यात्मकाभावमादाय नाव्याप्तिरत उक्तं एवमितीत्यपि कश्चित्॥ न व्याप्यवृत्तिरिति॥ तथा च गु रामः।
८९

णसामान्याभावस्य साधनसमानाधिकरणत्वेपि व्याप्यवृत्तित्वाभावादेव गुणवान्द्रव्यत्वादित्यादौ नाव्याप्तिः॥ अन्यथा गुण
सामान्याभावस्यापि साधनसमानाधिकरणसाध्याभावतया तद्घटितकूटाधिकरणसमवेतत्वसामान्याभावस्य वृत्तिम
ति नित्ये कत्वादौ प्रसिद्धस्य द्रव्यत्वहेतावसत्वादव्याप्तिरेवस्यादिति भावः॥ स्वसमानाधिकरणेत्यस्य फलमाह॥ उक्तरू
पेति॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नेत्यर्थः॥ क्वचिदिति॥ वह्निमान्धूमादित्यादौ घटाद्यात्मकतत्तद्विपक्षावृत्तित्वा
वच्छिन्नाभावकूटस्यापि निरुक्ताभावतया तदधिकरणाप्रसिद्धिनिबंधनाव्याप्तिवारणाय धर्मे वस्वसमानाधिकरणेत्युक्त
मिति भावः॥ तत् घटभिन्नं पटत्वादित्यादौ वाच्यं ज्ञेयत्वादित्यादौ च साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका
भावकूटवत्वं तद्घट एव प्रसिद्धमतस्तत्राव्याप्त्यसंभवात्क्वचिदित्युक्तं॥ अत्र च हेत्वधिकरणे यत्किंचिद्व्यक्तौ दैशिकविशेषण
तया वर्तमानमत्वमेव हेतुसामानाधिकरण्यं बोध्यं॥ तेन पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलेतेज
सि च साधनसमानाधिकरणस्य जलत्वात्यंताभावस्य तेजोत्यंताभावस्य च निरुक्तरूपावच्छिन्नप्रतियोगिताकत्वात्तदुभय
कूटाधिकरणत्वात्यादौ हेतौ रवृत्तित्वेपि नातिव्याप्तिः॥ हेत्वधिकरणजलादिप्रत्येकनिष्ठं यत्तादृशकूटं तदधिकरण
जलादौ हेतोः सत्वादिति भावः॥ उक्तसमुदाये त्यादिता दृशाभावसमुदायाधिकरणवृत्तित्वं हेतुतावच्छेदकसंबंधेन
ग्राह्यं तेन द्रव्यभिन्नं सत्वादित्यादौ साधनसमानाधिकरणसाध्याभावकूटवति महाकाले वृत्तिमन्मात्रस्यैव कालिक
संबंधेन सत्वात्वपि नातिव्याप्तिः॥ तादृशवृत्तित्वाभावस्तादृशवृत्तित्वत्वसमनियतप्रतियोगिताको ग्राह्यः॥ तेन पर्वत

आग० ९०

वृत्तित्वसामान्याभावस्य वृत्तिमत्तानोकान्यत्वोभयत्वावछिन्नोभावस्य हेतावसत्वेपि वह्निमान् धूमाद्यायंत्वे यत्वादि
त्यादौ नासंभवः अधिकमभिहितंप्राक्॥ वृत्तिमद्वृत्तय इत्यत्रापि वृत्तिमत्वं हेतुतावछेदकसंबंधेन ग्राह्यं तेन सयु
क्तत्वसामान्याभावस्यापि तादृशस्य समवायेन वृत्तिमतिज्ञात्यादौ प्रसिद्धस्य हेतावसत्वेपि वह्निमान् धूमादित्या
दौ नाव्याप्तिरित्यर्थः॥ साध्यवत्ताज्ञानविरोधिताघटकसंबंधेनेव कूटाधिकरणतायाः पूर्वमुक्तायाः प्रकृतेलक्षण
घटकत्वात्तन्नोक्तं इत्यादि कमित्यादिपदेन गुरोः प्रतियोगितावछेदकत्वमतेतादृशावृत्तित्वावछिन्नाभाववृत्तिमद्वृत्ते
योयावंतस्तद्वत्वमित्यादेः सूचनं॥ अभावबुद्धेः प्रतियोगितावछेदकविशिष्टप्रतियोगिज्ञानत्वेन हेतुतायाः स्वयमन
गीकाराशयार्थमाह॥ विशेषणेति॥ ननु घटत्वेन पटो नास्तीति बुद्धे घटत्वादिविशिष्टवैशिष्ट्यावगाहित्वमेवासिद्धमत
आह॥ अभावेत्यादि॥ नत्वातंत्र्येणेति॥ न घटत्वादेः प्रतियोगिवृत्तित्वमविषयीकृत्येत्यर्थः॥ तद्धर्मावछिन्नप्रतियो
गित्वसंसर्गकाभावप्रत्यक्षस्य तादृशसंबंधेन तद्धर्मविशिष्टवैशिष्ट्यावगाहित्वनियमादिति भावः॥ ननु तद्घटत्वेन
घटो नास्तीत्याकारे समानाधिकरणधर्मावछिन्नाभावप्रत्यक्षेव्यभिचारान्नोक्तनियम इत्यत आह॥ घटो नास्तीत्य
वेति॥ तथाच विशेषधर्मेण सामान्याभावोऽसिद्ध एवतद्व्यक्तित्वेन घटो नास्तीति प्रतीतेर्घटेतद्व्यक्तित्वाभावमात्रा
वगाहित्वावद्वृत्तत्वनहेतभावादेव न व्यभिचारः॥ अन्यथासामान्यरूपेणापि विशेषाभावस्वीकारापत्तेः वाच्यत्वेन
घटो नास्तीतिप्रत्ययप्रसंगादिति भावः॥ प्रकृते योजयति॥ तदिहेति॥ इहघटत्वेन पटो नास्तीत्यभिलापस्थले॥

राम० ५०

तस्य॥ व्यधिकरणधर्मस्य॥ अथावगाहत इति॥ व्यधिकरणधर्मेण विशिष्टं प्रतियोगिनमित्युक्तेनान्वयः॥ नचतत इति॥ प्र
माया एवार्थसाधकत्वादिति भावः॥ ननूक्तव्याप्त्याव प्रयोजकत्वात् घटत्वादेः प्रतियोगिवृत्तित्वमनवगाह्यापि तदवछेदकत्वाव
गाहिप्रत्ययसंभवाद्व्यधिकरणधर्मावछिन्नाभावसिद्धिरित्यत आह॥ यदि पुनरिति॥ स्वरसवाही॥ यथार्थः स्वपटेघटत्वा
नवगाहनएव संभवतीतिभावः॥ घटत्वेन पटो नास्तीत्यादिपदेन घटत्वेन द्रव्यंनास्ति द्रव्यत्वेन घटो नास्तीत्याद्यनुभवस्योप
ग्रहः॥ तुल्ययुक्त्यात् तद्वृत्तिधर्मेण तस्य वृविशेषरूपेण सामान्यस्य सामान्यरूपेण च विशेषस्याभावे बाधकाभावादिति
ध्येयं॥ घटत्वेन घटो नास्तीतिपाठे घटत्वेनेत्यस्य घटत्वत्वविशिष्टेनेत्यर्थः॥ तेन नतावद्रूप्येण प्रतियोग्यंशे घटत्ववत्ताम
नवगाह्य जाते समानाधिकरणधर्मावछिन्नाभावप्रत्यक्षएवोक्तनियमस्य व्यभिचारो दर्शितः॥ तादृशाभावेति॥ स्वस
मनियतान्यधर्मावछिन्नप्रतियोगिताकाभाववारणमित्यर्थः॥ तेन सामान्यरूपेण विशेषस्य विशेषरूपेण च सामा
न्यस्याभावः संगृहीतः॥ यत्तु द्रव्यत्वेन घटो नास्तीतिप्रतीतिर्घटत्वाद्यवछिन्नाभावेनैवोपपत्तौ सामान्यरूपेण विशेषा
भावादौ मानाभाव इति तत्प्रागेव दूषितमिति॥ यदपि संयोगसंसर्गकघटत्वावछिन्नाभावत्वावछेदेनव्याप्यवृत्तितादृशसं
बंधेन घटत्वावछिन्नस्य विरोधित्वे कल्पनात्संयोगेन घटादिमतिघटत्वादिना पटाद्यभावस्यासंभव इति केचिदुक्तं॥ तद
पि मंदं॥ तावतापि गगनत्वादिनाघटादेर्वाच्यत्वत्वादिनाज्ञेयत्वादेश्च व्यधिकरणधर्मावछिन्नाभावस्य दुर्वारत्वादिति गग
नादेरधिकरणस्य स्वरूपसंसर्गकवाच्यत्वत्वावछिन्नाभावस्याप्रसिध्यातत्र विरोधस्य कल्पयितुमशक्यत्वादिति दिक्॥
॥ ॥ ॥ समाप्तोयं व्यधिकरणधर्मावछिन्नाभावः॥ ॥ ॥ छ॥ ॥ श्री॥ ॥ ॥

जागदी०
८१

व्याधिकरण
ध०

रामः
५१